॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः ॥

**श्रीश्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं**

# श्रीमद्भगवद्गीताभाष्यम्

**देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।**
**परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि लेशतः ॥**

## श्रीपद्मनाभतीर्थकृता गीताभाष्यटीका भावप्रदीपिका

गुणगणनिलयं प्रणम्य कृष्णं जगदघहननं च वासवीसूनुम् ।
गुरुकुलतिलकं सुपूर्णबोधं गुरुमपि विवृणोमि गीतिकाभाष्यम् ॥

श्रीमद्भगवद्गीतां व्याख्यातुकामो भगवानाचार्यः स्वेष्टदेवतात्वेन गुरुत्वेन च नारायणं नत्वा ग्रन्थारम्भं प्रतिजानीते– **देवमिति** ॥ 'आन् विष्णून्' इति बहुवचनं गुरुत्वाभिप्रायेण । 'मुख्यस्य निर्विशेषेण शब्दः' इति वचनात् गीतेति भगवद्गीतोच्यते ॥

## श्रीनरहरितीर्थविरचिता गीताभाष्यभावप्रकाशिका

देवोऽपि द्योतनाद्यः सुररिपुविजयादुच्चकान्त्या स्तुतोऽयं
देवैस्तैरात्मभक्तैर्व्यवहितकरणात् सर्वगत्या च रत्या ।
सर्वैर्दोषैर्विहीनस्त्वमितगुणतनुः सर्वसामर्थ्यपूर्णः
श्रीमन्नारायणस्तं श्रुतिनुतिपरमं कृष्णगीतं नमामि ॥ १ ॥

क्षीराब्धेरेत्य तीरं विधिहरमुखराशेषदेवेशनुत्या
प्रीतः प्राप्तः क्षितिं यः स्वखिलगुणतनुः भारतं भारताद्यः ।
चक्रे चक्राब्जलक्ष्मारुणकरचरणस्तं बदर्यां मुनीन्द्रैः
सेव्यं ब्रह्मादिविद्भिर्दशसुमतिगुरुं व्यासमीशं नमामि ॥ २ ॥

तस्माच्छ्रुत्वा शुकान्तर्गतवरवपुषा भारतीड्यो सुविद्या-
माद्यां वायुः प्रधानः प्रधनमुपगतान् हन्ति विष्णुद्विषो यः ।
वाचा यद्वत् स्वदोष्णा स पुनरिह कलौ कृष्णगीतासुभाष्यं
चक्रे भूचक्रगस्तं शरणमहमगां श्रीमदानन्दतीर्थम् ॥ ३ ॥

तत्कारुण्याप्तविद्याः सुभरितहरितः पद्मनाभार्यतीर्था-
दित्या यत्सम्भवन्तो हरिचरणगता मायिदैत्यान् क्षिपन्ति ।
तत्पादाब्जे प्रणम्य प्रणतसुसुखदे कृष्णगीतासुभाष्यं
व्याख्यास्ये तत्प्रसादान्मम मतिममलास्ते प्रसन्नाः पुनन्तु ॥ ४ ॥

श्रीमद्भगवद्गीताभाष्यमारभमाणो भगवानाचार्यः तत्प्रतिपाद्यलक्षणं श्रीभगवन्तं नारायण-मिष्टदेवतां परां नमस्कृत्य, तत्प्रणेतृत्वात्, साक्षात्स्वोपदेष्टृत्वात्, हृद्गतत्वेन सर्वविद्या-प्रवर्तकत्वेन गुरुत्वेनापि तमेव श्रीबादरायणं पृथङ्नमस्कृत्य ग्रन्थारम्भं प्रतिजानीते– **देवमिति ॥** सर्वदाऽपि भगवत्प्रवणान्तःकरणैः कार्यविशेषात् पृथग्विशेषात् क्रियते । तत्कथनं सदाचारपरिपालनाय । आन् इति गुरुविशेषणम् । अकारवाच्यान् विष्णूनित्यर्थः । गीतेति कृष्णगीतैव उच्यते । तथा 'मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः' इति ॥ तन्मुख्यत्वं च सर्वलोकसिद्धम् ॥

## श्रीजयतीर्थमुनिविरचिता प्रमेयदीपिका

गुणगणनिलयं पतिं रमायाः जगदघदहनं च वासवीसूनुम् ।
मुनिकुलतिलकं च पूर्णबोधं गुरुमपि परमं गुरुं च मे वन्दे ॥ १ ॥

आनन्दतीर्थभगवत्पादाचार्यविनिर्मितम् ।
व्याख्यास्ये भगवद्गीताभाष्यं तत्करुणाबलात् ॥ २ ॥

## श्रीरघूत्तमतीर्थप्रणीता भावबोधाभिधा टिप्पणी

नत्वा श्रीशं मध्वमुनिं जयार्यं गुरोर्गुरुं गुरुमप्यादरेण ।
श्रीमद्गीताभाष्यटीकासुभावं वक्ष्ये शक्त्या गुरुशिक्षानुसारात् ॥

श्रीमद्गीताभाष्यं व्याचिख्यासुर्जयतीर्थश्रीमच्चरणो विघ्नविघातादिप्रयोजनं स्वेष्टदेवतानमनरूपं मङ्गलमादावाचरति– **गुणगणनिलयमिति ॥** वासवीसूनुं चेति पूर्णबोधं चेति आद्यद्वितीयच-शब्दसम्बन्धः । रमापतौ वासवीसूनौ च प्रथमविशेषणसमुच्चयार्थश्चाद्यश्चशब्दः । वेदव्यासस्य रमापतित्वेऽपि व्याचिख्यासितभाष्यमूलभूतगीताकर्तृत्वेन पृथङ्नमनमिति ज्ञातव्यम् । रमापतिं वासवीसूनुमित्यनयोरेकं विशेषणमेकं विशेष्यमिति वा । ग्रन्थारम्भकाले सकलवाङ्मनस-नियामिकाया रमाया वन्दनेन भाव्यम् । तस्य च पृथक् कर्तुमयोग्यत्वाद्रमाया इत्युक्तम् ॥

## श्रीराघवेन्द्रतीर्थविरचितः भावदीपः

लक्ष्मीनारायणं नत्वा तथा मध्वादिदेशिकान् ।
प्रमेयदीपिकाभावदीपं कुर्यां यथामति ॥ १ ॥

ग्रन्थादौ मङ्गलमाचरति– **गुणगणेति ॥** गुणगणपदेन ज्ञानानन्दबलौदार्यद्युतिप्रभृतयो भावधर्माः जरामरणाद्यभावरूपधर्माश्च गृह्यन्ते । प्रतिपाद्यदेवताया रमापतेः, गीताकर्तुर्व्यासस्य, भाष्यकर्तुः पूर्णबोधस्य च वन्द्यत्वोपपादनाय प्रत्येकं 'गुण' इत्यादि त्रीणि विशेषणानि । कृष्णार्जुनसंवादव्याजेन परापरतत्त्वोपदेशेन जगच्छब्दितसाधुलोकपापहारिणमित्यर्थः । **मे गुरुम्** अक्षोभ्यतीर्थम् । **परमं गुरुं** माधवतीर्थम् । **चापि**शब्दाः वन्द्यानामन्योन्यसमुच्चये **॥**

व्याख्याने बीजं वदन् चिकीर्षितं प्रतिजानीते– **आनन्दतीर्थेति ॥ 'भगवत्पाद'** इत्युक्त्या तत्कृतस्यात्युपादेयत्वं व्याख्यानबीजं सूचितम् ॥

## श्रीपाण्डुरङ्गिकेशवाचार्यविरचितः व्याकरणार्थस्पृष्टप्रमेयदीपिकावाक्यार्थप्रदीपः

॥ श्रीवेदव्यासाय नमः ॥ श्रीगुरुराजो विजयतेतराम् ॥

यद्विद्याधीशगुरोः शुश्रूषान्या न रोचते तस्मात् ॥
अस्त्वेषा भक्तियुता श्रीविद्याधीशपादयोः सेवा ॥ १ ॥

**गुणगणनिलयमिति ॥** गुणगणाश्रयत्वाद् गुणगणनिलयमित्यर्थः । निर् निश्चितमयते प्रवर्ततेऽस्मिन्निति । निरुपपदादयतेः अधिकरणपुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः । नन्वेवं

निरय इति स्यान्नतु निलय इति । 'कृपो रो ल' इति विशेषस्मरणेनात्र लत्वासम्भवात् । न चोपसर्गस्यायतावितिं सूत्र उपसर्गस्याप्ययतौ परे लत्वविधानादत्र तदुपपत्तिरिति वाच्यम् । निस्दुस् इत्येतयोः सान्तयोरुपसर्गयो रुत्वस्यासिद्धत्वाल्लत्वाप्राप्तिरिति वृत्तावुक्तत्वेनात्र उपसर्गस्यायतावित्यनेनापि लत्वाप्राप्तेरिति चेत् न । 'रो ल' इति योगविभागात्तदुपपत्तेः । तदुक्तं सुधायाम्– 'रो ल इति योगविभागाल्लत्वम्' इति । न च योगविभागाश्रयणेऽपि न लत्वसम्भवः । ससजुषोरुरिति रुत्वस्य पूर्वत्रासिद्धमिति लत्वं प्रत्यसिद्धत्वादिति वाच्यम् । योगविभागस्येष्टसिद्ध्यर्थत्वेन तत्सामर्थ्येन रुत्वस्यासिद्धत्वाभावस्यापि सिद्धत्वात् । अन्यथा योगविभागाश्रयणानर्थक्यापातात् ।।

ननु निरिति रेफान्त उपसर्ग एवायम् । तस्य चोपसर्गस्यायतावित्यनेनैव लत्वसिद्धेरनर्थकं योगविभागाश्रयणम् । नच सान्तव्यतिरेकेण रेफान्त उपसर्ग एव नास्ति । तत्कथं तदाश्रयणे-नोक्तनिर्वाह इति वाच्यम् । 'निरः कुषः' इति सौत्रनिर्देशानुसारेण रेफान्तस्यापि तस्याकर एव स्थितत्वात् । यथोक्तम्–'निरः कुष' इति सूत्रव्याख्यानावसरे निसिति वक्तव्ये निरिति निर्देशेन रेफान्तमप्युसर्गान्तरमस्तीति ज्ञायते । तस्य च निलयनमिति उपसर्गस्यायतावितिं लत्वं भवति । निसो हि रुत्वस्य सिद्धत्वाल्लत्वं न स्यादिति । उक्तं च हरदत्तेन 'उपसर्गस्यायतौ' इति सूत्र-व्याख्यावसरे सकारान्तपरोऽयं ग्रन्थः । रेफान्तयोस्तु भवितव्यमेव लत्वेनेति । उक्तं च नव्येनापि । निरःकुषः सुदुरोरधिकरण इत्यादि निर्देशात् रेफान्तावप्युपसर्गौ स्तः । तयोस्तु भवितव्यमेव लत्वेनेति । तत्किमर्थं योगविभागाश्रयणमिति चेदुच्यते । प्रादिषु निस्दुसिति सान्तयोरेव पाठात् । तथा 'निसस्तपतावनासेवन' इति सान्ततया सौत्रनिर्देशात् । 'अयोग-वाहानामविशेषण' इति प्रकरणे निष्कृतमित्युदाहृत्य, 'इगुपधस्य सकारस्य यो विसर्जनीय' इति भाष्यकारोक्तेः, 'उपसर्गस्यायतौ' इति सूत्रे निस्–दुस् इत्येतयोः रुत्वस्यासिद्धत्वात् 'निरयणं दुरयणमित्यत्र लत्वं न भवति' इति वामनोक्तेश्च, सान्त एवायमुपसर्गः । 'निरःकुष' इति 'सुदुरोरधिकरण' इति रेफान्तयोरनयोः सौत्रनिर्देशेऽपि प्रादिष्वपाठात्, भाष्यकारा-नभिमतेश्च, न रेफान्तत्वमाश्रयितुमुचितम् । सौत्रनिर्देशस्त्वेकमुनिनिर्देशतया मुनिद्वयनिर्देशानु-सारेण छान्दस एव । हरदत्ताद्युक्तिस्तु भाष्यविरोधादयुक्तैवेत्यभिप्रायकत्वाद्योगविभागाश्रयण-स्यादोषत्वादिति । यद्वा निपूर्वात् लीङ् श्लेषण इत्यस्मात् निलीयतेऽस्मिन्निति अधिकरणे घप्रत्यये सार्वधातुकेति गुणेऽयादेशे सति निलयशब्दनिष्पत्तिरिति द्रष्टव्यम् ।।

## श्रीसुमतीन्द्रतीर्थविरचितः भावरत्नकोशः

श्रीमन्तो जानकीजानेः पदपङ्कजपांसवः ॥
जयन्ति सीतावक्षोजकुङ्कुमश्रीविडम्बिनः ॥ १ ॥

येनाखण्डि मुदैव खण्डपरशोरुद्दण्डकाण्डासनं
भूदेवीतनयाऽप्यलाभि सरसैरङ्गैरपाङ्गैरपि ।
सद्धर्मद्युतिहर्म्यनिर्मितलसन्नर्मोत्थशर्मोदयः
श्रीरामो मम मानसे विलसतात् सीतासहायस्सदा ॥ २ ॥

सज्जनाम्भोरुहपुषे वेदव्यासाभिधाजुषे ।
तमस्तोममुषे तस्मै परस्मै ज्योतिषे नमः ॥ ३ ॥

आमोदं यो व्यतानीद् रघुकुलतिलके सेवया श्रीहनूमान्
भीमात्मा कृष्णदेवे प्रबलधरणिपव्याजवैरीन्द्रहत्या ।
मध्वाख्यो ब्रम्हसूत्रप्रभृतिकृतिकृतान्योक्तभाष्यादिकृत्या
श्रीवेदव्यासदेवे स दिशतु सुदृशं श्रीमदानन्दतीर्थः ॥ ४ ॥

यस्मादभ्युदगाद् दशप्रकरणीमन्दारवल्ली मणि-
श्रेणीमेयसुदीपिकादिकृतिरास्वाद्या बुधैस्सा सुधा ।
वादावल्यमृतांशुमूर्तिरमला तत्त्वप्रकाशेन्दिरा
भूयाच्छ्रीजयतीर्थदेशिकपयोम्भोधिर्विभूत्यै स मे ॥ ५ ॥

श्रीमध्वशास्त्रदुग्धाब्धिमामथ्योद्धृतमादरात् ।
ग्रन्थत्रयामृतं येन व्यासराजं तमाश्रये ॥ ६ ॥

श्रीराघवेन्द्रतीर्थश्रीचरणामरभूरुहम् ।
कामिताखिलकल्याणकलनोन्मुखमाभजे ॥ ७ ॥

भूरिमनीषागमचितकरणान् श्रीजयतीर्थव्रतिकृतिशरणान् ।
सन्ततमीडे सुचरितवरणान् वेङ्कटनारायणगुरुचरणान् ॥ ८ ॥

अथ तत्कृपया श्रीमज्जयतीर्थार्यनिर्मिताम् ।
**श्रीमद्गीताभाष्यटीकामहं सेवे यथामति ॥ ९ ॥**

श्रीमान् जयतीर्थार्यवर्यः प्रारिप्सिताविघ्नपरिसमाप्त्यादिप्रयोजनं विशिष्टेष्टदेवतागुरुप्रणामरूपं मङ्गलं ग्रन्थादौ निबध्नाति– **गुणगणेति** ॥ देवतावन्दनानन्तरं गुरुतारतम्यसीमानं वेदव्यासं वन्दते– **वासवीसूनुमिति** ॥ वसोरपत्यं स्त्री वासवी सत्यवती । तस्यास्सूनुं सुतं वेदव्यास-मित्यर्थः । जगदघदहनं तत्त्वोपदेशेन सल्लोकमोक्षदमिति यावत् । चशब्दो गुणगणनिलयत्वस्य रमापतित्वस्य चानुकर्षणार्थः । पूर्णबोधं सर्वज्ञार्यम् । **मे** मम । **गुरुम्** अक्षोभ्यतीर्थम् । **परमं गुरुं** माधवतीर्थम् । इदं च पद्यं भाष्याद्यपद्यत्रिपादीव्याख्यानरूपम् । गुणगणनिलयमिति परिपूर्णपदस्य, रमायाः पतिमिति नारायणपदस्य, जगदघदहनमिति सर्वदोषविवर्जितपदस्य, वासवीसूनुमिति आनितिपदस्य, गुरुमपि परमं गुरुमिति गुरूनित्यस्य, वन्द इति नत्वेत्यस्य च स्पष्टीकरणात् । सकलवाङ्मनसदेवतायाः श्रीदेव्या ग्रन्थारम्भकाले वन्दनीयत्वात् पृथग् वन्दन-स्यानुचितत्वात् तद्वन्दनमपि भगवदुपसर्जनत्वेन कर्तव्यमिति दर्शयितुं रमायाः पतिमित्युक्तम् । व्याचिख्यासितभाष्यमूलभूतगीताकर्तृत्वेन मूलगुरुत्वेन च वासवीसूनुर्वन्दितः ॥

भाष्ये देवतागुरुप्रणामानन्तरं चिकीर्षितप्रतिज्ञादर्शनात् टीकाकारोऽपि स्वव्याख्येयभाष्य-प्रामाण्यादिकं सूचयंश्चिकीर्षितं प्रतिजानीते– **आनन्दतीर्थेति** ॥ अत्र भगवत्पदेन भाष्यकारस्य विवक्षितार्थतत्त्वज्ञानाद्युक्त्या तत्प्रोक्तत्वेन भाष्यस्य प्रामाण्यं सूचितम् । गीताभाष्यमित्युक्त्या च गीताविषयाद्येवास्यापि विषयादीत्यपि । व्याख्यास्य इत्यत्र चक्षिङः ख्यादेशे तस्य ञित्वाद् व्याख्यानफलस्य पुण्यादेः कर्तृगामित्वाच्च आत्मनेपदम् । 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्युक्तेः । अत एव ख्याधातोः परस्मैपदित्वात् सार्वधातुकमात्रविषयत्वस्य वैयाकरणैरुक्तत्वाच्च कथं व्याख्यास्य इति प्रयोग इति निरस्तम् । तत्करुणाबलात् आनन्दतीर्थभगवत्पादाचार्य-करुणाबलादिति वदन् सर्वप्रज्ञप्रणीतभाष्यव्याख्याने स्वस्य सामग्रीसम्पत्तिमभिसन्धत्ते ॥

## श्रीनिवासतीर्थविरचिता भावदीपिका

नमामि तर्काभयचक्रशङ्खपाणी सदा मध्वकराभिपूज्यौ ।
श्रीव्यासकृष्णौ परिपूर्णबोधांस्तथा जयार्यानितरान् गुरूंश्च ॥

वेदेशयोगिनं वन्दे यादवार्यगुरोर्गुरुम् ।
छान्दोग्यभाष्यटीकायाः कर्तारमहमादरात् ॥

अध्यात्मदर्शने दक्षान् शापानुग्रहयोः पटून् ।
कृष्णनाम्नः पितॄन् वन्दे कृष्णपादाब्जदर्शिनः ॥

श्रीमन्न्यायसुधाया यैर्भावः सम्यक् प्रकाशितः ।
तान् वन्दे यादवाचार्यान् सदा विद्यागुरून् मम ॥

अथैतत्कृपया श्रीनिवासाख्यायुतसूरिणा ।
गीताभाष्यस्य टीकायाः क्रियते भावदीपिका ॥

बुधैरपि सुदुर्बोधे ग्रन्थे यन्मम साहसम् ।
तत् पारयन्तु निपुणा गुरुपादरजःकणाः ॥

सर्वज्ञकल्पाष्टीकाकारा जयतीर्थश्रीचरणाः श्रीमद्गीताभाष्यं यथावद् व्याख्यातुकामा विघ्नविघातादिप्रयोजनं स्वेष्टदेवताया लक्ष्मीपतेस्तथा मूलगुरोरादिगुरोः परमगुरोः स्वगुरोश्च वन्दनरूपमङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थादावुपनिबध्नन्ति– **गुणगणनिलयमिति** ॥ वाङ्मनसव्यापाररूपग्रन्थारम्भसमये सकलवाङ्मनसदेवताया रमाया वन्दनस्यावश्यं कर्तव्यत्वात् पृथग् वन्दनस्य च 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्' इत्यादिनोत्तरत्र भगवता निराकरणान्नारायणविशेषणत्वेनैव सा वन्दनीयेति सूचयितुं रमायाः पतिमित्युक्तम् ॥ **वासवीसूनुमिति** ॥ वसोरपत्यं स्त्री वासवी सत्यवती, तत्सूनुं कानीनं बादरायणमित्यर्थः । चशब्दाद् गुणगणनिलयमिति रमापतिविशेषणस्यात्राप्यनुकर्षः । व्याचिख्यासितभाष्यमूलभूतगीताकर्तृत्वोपाधिना पृथङ्नतिरिति द्रष्टव्यम् । व्याचिख्यासितभाष्यकर्तृत्वोपाधिना पूर्णबोधान् प्रणमति– **मुनीति** ॥ मुनिमण्डलालङ्कारभूतम् । चशब्दाज्जगदघदहनमित्यस्य विशेषणस्यानुकर्षः । **परमं गुरुं** श्रीपद्मनाभतीर्थश्रीचरणम् । **मे** गुरुम् अक्षोभ्यतीर्थश्रीचरणम् ॥ १ ॥

एवं देवतादिप्रणाममाचरित्वा स्वचिकीर्षितं प्रतिजानीते– **आनन्दतीर्थेति** ॥ भगवच्छब्दः पूज्यार्थः । पादशब्दः स्वरूपवाची । 'उत्तमानां स्वरूपं तु पादशब्देन भण्यते' इति वचनात् ।

तथाचाऽनन्दतीर्थाख्या ये पूज्यस्वरूपवन्तः आचार्यास्तैर्विनिर्मितं विशेषेणेतरवैलक्षण्येन निर्मितमित्यर्थः । भगवद्गीताभाष्यमिति सामान्योक्त्याऽन्यकृतभाष्यप्रसक्तौ सत्यां तत्परिहारायेदं विशेषणमिति ज्ञातव्यम् । तेषां पूर्ववन्दितानां करुणाबलात् ॥

## उमर्जीकृष्णाचार्यविरचितः भावप्रकाशः

श्रीशेषशयनं नौमि निःशेषगुणबृंहितम् ।
अशेषदोषरहितं विशेषज्ञं विमुक्तिदम् ॥ १ ॥

वेदयन् वेदसारार्थं खेदयन् हृद्गतं तमः ।
मोदयन् साधुसङ्घातं कृष्णोष्णांशुः प्रसीदतु ॥ २ ॥

ध्वंसितान्यमतध्वान्तं श्रीमध्वब्रध्नमाश्रये ।
जयतीर्थं च सूक्तार्थं सत्सार्थात्यर्थसंस्तुतम् ॥ ३ ॥

रघुनाथपदासक्तं रघूत्तममुनीश्वरम् ।
भावबोधकृतं वेदभावबोधप्रसिद्धये ॥ ४ ॥

समस्तसल्लोकनुतोरुकीर्तिं प्रशस्तविद्यांशुसमेतमूर्तिम् ।
निरस्तनिःशेषजनान्तरार्तिं श्रीतिर्मलाचार्यमहं प्रपद्ये ॥ ५ ॥

भावबोधकृदुक्तार्थं वदन्नेव तदुज्झितम् ।
वाक्यादि व्याकरिष्येऽहं सफलस्तेन मे श्रमः ॥ ६ ॥

प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्याद्यर्थं कृतमिष्टदेवतादिस्तुतिनतिरूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति– **गुणगणेति ॥** ग्रन्थस्य वाङ्मुखव्यापारसाध्यत्वात्तद्देवतात्वेनावश्यं वन्दनीया रमा पृथङ् न वन्दनीयेति ज्ञापयितुं रमायाः पतिमित्युक्तम् । नारायणप्रणामवद्व्यासप्रणामोऽप्यवश्वं कार्यः व्याचिख्यासितभाष्यमूलगीताकर्तृत्वादिति भावेनाह– **जगदघदहनश्चेति ॥** वासवीसूनुं चेत्यन्वयः । अत्रापि पूर्वविशेषणं ग्राह्यमिति ग्राहयितुं विशेषणानन्तरं चशब्दप्रयोगः । परमगुरुमपि पद्मनाभतीर्थादिकं च । मे गुरुश्च अक्षोभ्यतीर्थं चेत्यर्थः ॥ १ ॥

व्याख्येयत्वोपयुक्तं प्रामाण्यं विषयादिकं च सूचयन्नेव चिकीर्षितं निर्दिशति– **आनन्देति** ।। अत्र भगवत्पदेन भाष्यकर्तुर्विवक्षितार्थतत्वज्ञानाद्युक्त्या आप्तोक्तत्वेन भाष्यस्य प्रामाण्यं सूचितम्। गीताभाष्यमित्यनेन गीताविषयादिकमेवास्य विषयादीति सूचितम् । **व्याख्यास्ये इति** ।। 'चक्षिङ् व्यक्तायां वाची'त्यस्य 'चक्षिङः ख्याञि'ति ख्याञादेशे तस्य ञित्वाद्व्याख्यानफलस्य पुण्यादेः कर्तृगामित्वादात्मनेपदम्। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्युक्तेरिति बोध्यम् । तेन ख्याधातोः परस्मैपदित्वात् सिद्धान्तकौमुद्यादौ सार्वधातुकमात्र-विषयत्वोक्तेश्च कथमेतत् रूपमित्यपास्तम् । यत्कचिद्व्याख्यास्यामीति प्रायोजि तत् क्रियाफलस्य कर्तृगामित्वाविवक्षयेति ।। २ ।।

## प्रमेयदीपिका

प्रारिप्सितविघ्नविघातादिप्रयोजनं समुचितविशिष्टेष्टदेवतागुरुप्रणामं ग्रन्थारम्भप्रतिज्ञां चादौ निबध्नाति भगवान् भाष्यकारः– **देवमिति** ।। अत्र देवशब्दो देवताशब्दपर्यायः प्रतिपाद्यमाह । सन्निधानाच्च 'भगवद्गीतायाः' इति लभ्यते । तेनेदानीं नारायणस्य प्रणामे समुचिततामाचष्टे । अज्ञानपारतन्त्र्यादिभिः सर्वदोषैर्विशेषेण सर्वदा सर्वात्मना वर्जितं परितो देशतः कालतो गुणतश्च पूर्णमिति वैशिष्ट्यमाचष्टे । परमवैष्णवस्य भगवतो भाष्यकारस्य विष्णुरिष्टदेवतेति प्रसिद्धमेव ।।

## भावबोधः

**सन्निधानादिति** ।। व्याचिख्यासितत्वेन बुद्धिसन्निधानात् गीतार्थमिति शाब्दसन्निधाना-च्चेत्यर्थः । वीत्युपसर्गार्थमाह– **विशेषेणेति** ।। तमेव स्पष्टयति– **सर्वदेति** ।। नम्यत्वे हेतुतया आवश्यकत्वेन समुचितत्वादिवदिष्टत्वं प्रतिज्ञातम् । तत्कुतो भाष्यकृता नोक्तमित्यत आह– **परमेति** ।।

## भावदीपः

**प्रारिप्सितेति** ।। सम्भावितविघ्नानां शिष्यप्रभृतीनामिति योज्यम् ।। आदिपदेन प्रचयः ।

बहुव्रीहिः । प्रणामो विशेष्यम् ॥ **समुचितेति** ॥ सम्यग्योग्येत्यर्थः ॥ देवताप्रणामस्य समुचितत्वे हेतवः– **विशिष्टेष्टदेवतेति** ॥ तत्त्रयमग्रे व्यक्तम् ॥ 'आदौ' इत्युक्त्या गुरुदेवता-प्रणामस्य ग्रन्थावयवत्वं सूचयति ॥ मूले 'नत्वा' इत्युक्तावपि प्रकृष्टनतिरभिप्रेतेति 'प्रणामम्' इत्युक्तम् ॥ 'देवम्' इत्यस्य कृत्याप्रतीतेराह– **अत्र देवेति**॥ स्तुत्यर्थाद् दीव्यतेः कर्मणि घञ्प्रत्ययान्त इति भावः ॥ **सन्निधानाच्चेति** ॥ 'गीतार्थम्' इति गीतापदसन्निधानादित्यर्थः ॥ गीतानां च वेणुभ्रमरभिक्षुगीतादिरूपेणानेकत्वाद् 'भगवद्गीता' इति विशेषणोक्तिः ॥ **तेनेति** ॥ गीताप्रतिपाद्यत्वविशेषणकथनेन ॥ **समुचिततामाचष्ट इति** ॥ प्रतिपाद्यस्य स्वविषयग्रन्थार्थाव-बोधसम्पादकत्वात् प्रणतदेवतैव तत्सम्पादनहेतुरिति भावः ॥ 'वि' इत्युपसर्गार्थः– **विशेषेणेति** ॥ तद्व्यनक्ति– **सर्वदा सर्वात्मनेति** ॥ निश्शेषत इत्यर्थः ॥ **इतिवैशिष्ट्यमिति** ॥ 'विशेषणद्वयेन भावाभावरूपेतरासाधारणधर्मवत्वमाचष्टे' ॥ वक्ति भाष्यकार इत्यर्थः । 'तेन नारायणप्रणामस्य समुचिततामाचष्टे' इत्यनुषङ्गः । विशिष्टदेवताया एव विघ्नविघातादौ शक्तत्वादिति भावः ॥

ननु भक्त्यादिप्रकर्षयुक्ता नतिरिष्टदेवतायामेव भवतीति प्रणामस्य समुचितत्वोपपादनाय इष्टता नारायणस्य कुतो नोक्ता? इत्यत आह– **परमवैष्णवस्येति** ॥

## भावरत्नकोशः

भगवद्गीतां व्याचिख्यासुर्भाष्यकारः किमिति प्रथमश्लोकेन देवतागुरुप्रणाममाचरतीत्य-तस्तत्प्रयोजनं दर्शयन्नाह– **प्रारिप्सितेति** ॥ शिष्याणां विघ्नसम्भावनयोक्तम्– **विघ्नविघातेति** ॥ ननु नारायणस्य देवत्वाव्यभिचाराद् देवमिति विशेषणं नातीव प्रयोजनमावहतीत्यत आह– **अत्र देवशब्द इति** ॥ ऋग्भाष्यटीकारीत्या दीव्यतेः स्तुत्यर्थात् कर्मणि घञि निष्पन्नो देवशब्दः स्तुत्यं प्रतिपाद्यं वक्तुमेव प्रवृत्तः । नतु देवत्वोपस्थापनाय । येन नातिप्रयोजनं विशेषणमिति शङ्केति भावः । ननु 'या तेनोच्यते सा देवता' इत्युक्तेः प्रतिपाद्ये देवताशब्दस्यैव दृष्टेः कथमसौ प्रतिपाद्यं ब्रूयादित्यत उक्तम्– **देवताशब्दपर्याय इति** ॥ देवताशब्द एव समुदायशक्त्या प्रतिपाद्यार्थस्य वाचकः । देवशब्दश्च तत्पर्यायः । 'देवात् तल्' इत्यत्र 'देवशब्दात् स्वार्थिक-तल्प्रत्यये देव एव देवता' इति वृत्त्यादावुक्तत्वात् 'स चेत्ता देवतापदम्' इत्यत्र 'देवताशब्दो

देवशब्दपर्यायः' इति ऋग्भाष्यटीकातश्च, 'छन्दोऽनुष्टुप् तथा देवो भगवान् विश्वरूपधृक्' इत्यादावपि देवशब्द एवमेव व्याख्यातव्यः । तथा च 'अग्निमीळे' इत्यत्र यास्कः 'यो देवस्सा देवता' इति देवशब्दस्य देवताशब्दपर्यायत्वमाह । प्रयुक्तश्च देवतायां देवशब्दः 'यच्चिद्धित्वं गृहे गृहे' इत्यृग्भाष्ये 'सोमामात्यो परो देवो वनस्पतिः' इति ॥

एतेन क्रीडादिगुणविशिष्टार्थस्य विबुधत्वजात्याक्रान्तिमुपस्थापयन्नयं शब्दः प्रतिपाद्यं कथं ब्रूयादिति प्रत्युक्तम् । कर्मणि घञन्तस्य देवताशब्दबोध्यप्रतिपाद्यार्थकत्वादित्युक्तमेव । प्रतिपाद्यत्वस्य सप्रतियोगित्वादाह– **सन्निधानाच्चेति** ॥ व्याचिख्यासितत्वेन, गीतार्थमिति गीताशब्देन च बुद्धौ विपरिवर्तनादित्यर्थः । लभ्यते चेति चशब्दसम्बन्धः ॥

यद्यपि गीतार्थं नारायणमित्यन्वये अर्थशब्दस्याभिधेयार्थत्वेन नारायणस्य गीतार्थत्वं लभ्यत इति तेन समुचिताख्यानं सम्भवति । सति चैवं देवताशब्दपर्यायत्वं, सन्निधानाच्च गीताया इति लभ्यत इति च नाऽदरणीयम् । तथाऽपि गीतार्थपदस्यातिदूरस्थत्वात्, वक्ष्यामीति क्रियान्वयिसमर्पकत्वादावृत्तिप्रसङ्गाद्, देवशब्ददेवताशब्दयोरतिभेदाभावात्, प्रतिपाद्यस्य सर्वप्राधान्यज्ञापनाय आदौ तद्ग्रहणस्यौचित्यात्, देवशब्दस्य माङ्गलिकत्वाच्च आदावुपादानमिति भावेनैवमुक्तम् । तेन गीतायाः प्रतिपाद्यमित्यर्थकेन देवशब्देन । इदानीं गीताव्याख्यानप्रारम्भकाले । विशब्दार्थो विशेषेणेति । तस्यैव विवरणं **सर्वदा सर्वात्मनेति** ॥ परिशब्दार्थ एव परितश्शब्दार्थ इति भावेन तदर्थमाह– **परितो देशत इति** ॥ **वैशिष्ट्यम्** उत्तमत्वम् । पूर्णमित्यत्र चशब्दोऽनुवर्तनीयः । 'समुचितविशिष्टेष्ट' इत्यत्र प्रतिज्ञातमिष्टत्वं कुतो नोक्तमित्यत आह– **परमेति** ॥ वैष्णवस्येति क्वचित् पाठः ।

## भावदीपिका

नन्वाद्यपद्यं व्यर्थम् । नचेष्टदेवताप्रणामग्रन्थारम्भप्रतिज्ञयोः करणाय सार्थकमिति वाच्यम् । ग्रन्थारम्भप्रतिज्ञाया वक्ष्यमाणप्रयोजनाय कार्यत्वेऽपि न प्रणामस्य कर्तव्यता, प्रयोजनप्रमाणयोरभावान्नम्यत्वप्रयोजकीभूतानां समुचितत्वादीनामभावाच्चेत्यत आह– **प्रारिप्सितेति** ॥ अन्येषामिति शेषः । निरन्तरायत्वाद् भाष्यकाराणाम् । तथा च प्रारब्धुमिष्टं प्रारिप्सितम् । तत्र अन्येषां प्रतिबन्धकीभूता ये विघ्नास्तेषां यो विघातः स आदिः कारणं यस्याः समाप्तेः प्रचयस्य च

(तस्याः तस्य च प्रयोजनं हेतुः । यद्वा सा च स च प्रयोजनं फलं यस्य तमिति ।) तत्तत्प्रयोजनमित्यर्थः । तथात्वेन शिष्टाचारपरम्परावगतमिति यावत् । अनेन प्रणामेन समाप्त्यादौ जननीये विघ्नध्वंसोऽवान्तरव्यापार इति सूचितं भवति ॥

समुचितत्वं नाम ग्रन्थप्रतिपाद्यत्वरूपमधिकृतत्वमिति ध्येयम् । वैशिष्ट्यं सर्वोत्तमत्वम् । प्रणामं कृतमिति शेषः । अन्यथाऽकृतस्य निबन्धे प्रतारकत्वप्रसङ्गात् । प्रणामं नतिस्तुतिरूपम् । असन्निहितशिष्यशिक्षायै इति पूरणीयम् ॥ **ग्रन्थारम्भप्रतिज्ञां च** ॥ वक्ष्यमाणप्रयोजनायेति शेषः । नम्यत्वप्रयोजकीभूतं समुचितत्वादिकं केन पदेन सूचितमित्यतस्तद् दर्शयति– **अत्रेत्यादिना** ॥

ननु 'या तेनोच्यते सा देवता' इति वचनाद् देवताशब्दस्य प्रतिपाद्यार्थकत्वेऽपि न देवशब्दस्य तदर्थकत्वम् । नह्यत्र देवताशब्दः श्रूयत इत्यत आह– **देवशब्दो देवताशब्दपर्याय इति** ॥ देवताशब्दो हि 'या तेनोच्यते सा देवता' इति निरुक्तिबलात् प्रतिपाद्यवाची । 'रुद्रोऽहङ्कारदेवता' इत्यादिवचनादभिमानिदेवतावाच्यपि भवति । एवं च प्रकृते देवशब्दो देवताशब्दपर्याय इत्येवोक्ते अभिमानिदेवतापरताऽपि प्रतीयेत । ततश्चासङ्गतिः स्यात् । अतः **प्रतिपाद्यमाहे**त्युक्तम् । देवशब्दः प्रतिपाद्यमाहेत्येवोक्ते देवशब्दस्य प्रतिपाद्यार्थकत्वाभावाद् देवताशब्दपर्याय इत्युक्तमिति ज्ञातव्यम् ॥

ननु प्रतिपाद्यत्वस्य सापेक्षत्वात् कस्य ग्रन्थस्य प्रतिपाद्यमिति न ज्ञायते । नच गीताया इति वाच्यम् । असन्निहितत्वात् तस्या इत्यत आह– **सन्निधानाच्चेति** ॥ व्याचिख्यासितत्वेन बुद्धिसन्निधानात्, गीतार्थमिति शब्दसन्निधानाच्चेत्यर्थः ॥ **तेनेति** ॥ गीताया देवं प्रतिपाद्यमिति कथनेनेत्यर्थः । **वीत्युपसर्गस्यार्थो विशेषेणेति** ॥ तमेव व्यनक्ति– **सर्वदेत्यादिना** ॥ ननु नम्यत्वप्रयोजकीभूतसमुचितत्ववैशिष्ट्यवदिष्टत्वं कुतो नोक्तं भाष्यकृतेत्यत आह– **परमवैष्णवस्येति** ॥ तस्यैकान्तभक्तोत्तमत्वादिति भावः ॥

## भावप्रकाशः

ननु विबुधवाचीदेवशब्दः कथं प्रतिपाद्यार्थ इत्यत उक्तम्– **देवताशब्दपर्याय इति** ॥ तथा च पचाद्यजन्तो विबुधवाचकोऽस्तु । अत्र प्रयुक्तस्तु या तेनोच्यते सा देवतेत्युक्तेः प्रतिपाद्यार्थो यो देवताशब्दस्तत्पर्यायः कर्मणिघञन्तः । ततो युक्तं प्रतिपाद्यार्थत्वमिति भावः ।

दीव्यतेरनेकार्थत्वात् कर्मणिघञन्त इत्युक्ते न विवक्षितसिद्धिरित्यतः कर्मणिघञन्त इत्यनुक्त्वा देवताशब्दपर्याय इत्याहेति मन्तव्यम् ॥

केचित्तु नेदं पचाद्यजन्तव्यावर्तकं किन्तु प्रतिपाद्यार्थत्वे हेतुभूतं देवताशब्दपर्याय इति विशेषणम् । तदर्थस्तु स्वार्थिकप्रत्ययान्तदेवताशब्दप्रकृतिभूत इति । अयमाशयः । या तेनेत्युक्तेः देवताशब्दस्तावत् प्रतिपाद्यार्थः । स च देवात्तलिति स्वार्थे तलन्तो नत्वखण्डस्तद्धितान्ततायाः स्पष्टप्रतीतेः । अतो देवशब्दोऽपि प्रतिपाद्यार्थः । यः स्वार्थिकप्रत्ययान्तशब्दप्रकृतिभूतः स तत्समानार्थ इति सामान्यव्याप्तेः सौख्यादिशब्दसमानार्थे सुखादिशब्दे दृष्टत्वात् । तदयं प्रयोगः। देवशब्दो देवताशब्दवाच्यप्रतिपाद्यार्थकः स्वार्थिकप्रत्ययान्तदेवताशब्दप्रकृतित्वात् सामान्येन सुखादिशब्दवत् इति स्वार्थिकस्थले प्रकृतिप्रत्ययान्तयोः पर्यायत्वाभिप्रायेण पर्याय इत्युक्तम् । एतेन देवशब्दस्य देवताशब्दपर्यायत्वेन प्रतिपाद्यार्थत्वसाधने विबुधादिशब्दे व्यभिचारः देवशब्दः पुष्पार्थः सुमनः । शब्दसामानार्थत्वादित्याभाससाम्यं च निरस्तमित्याहुः ॥

**सन्निधानादिति** ॥ व्याचिख्यासितत्वेन बुद्धिसन्निधानाद्गीतार्थमिति शाब्दसन्निधाना-च्चेत्यर्थः। वीत्युपसर्गार्थमाह– **विशेषेणेति** ॥ विशेषमेव स्पष्टयति– **सर्वेदेति** ॥ ननु समुचित्वादिवत् प्रतिज्ञातमिष्टत्वं कुतो नोक्तमित्यत आह– **परमेति** ॥

## प्रमेयदीपिका

यद्वा भगवद्गीताप्रतिपाद्यत्वं नारायणस्य न परेषामिव जीवत्वनिर्विशेषत्वादिरूपेण । किं नाम? सर्वदोषवर्जिततया, परिपूर्णतया चेति पदद्वयेनाख्याति ॥ **आन्** व्यासान् । 'अ आ अं अः पुराणर्षिर्व्यासः शाखासहस्रकृत्' (वा.स.ना.२७५) इत्यकारस्य तन्नामसु पाठात् । बहुवचनं च गौरवादेव ॥ 'गीता' इति भगवद्गीतैवाभिप्रेयते । 'मुख्यामुख्ययोर्मुख्ये कार्य-सम्प्रत्ययः' इति न्यायात् ॥ यद्यपि बह्वर्था गीता, शक्तश्चाहं तद्वचने । तथाऽपि श्रोतॄणां मन्दां मतिमपेक्ष्याल्पमेवोच्यत इति भावेनोक्तम्– **लेशतः इति** ॥ इत्थम्भूतलक्षणार्थतृतीयान्तात् तसिः । अर्थशब्देन सर्वार्थग्रहणप्रसक्तौ सर्वेषां च भाष्येऽदर्शनाद् वन्ध्येयं प्रतिज्ञेति मन्दाशङ्का-निरासायेदमुदितम् ॥

## भावबोधः

**तन्नामस्विति ॥** वासुदेवसहस्रनाम्नि व्यासनामस्वित्यर्थः । **गौरवादेवेति ॥** एवकारेण व्यासान्तरसाहित्येन बहुत्वं वारयति । **इत्थम्भूतेति ॥** कश्चित्प्रकारं प्राप्तः इत्थम्भूतः । अत्रार्थः लेशरूपं प्रकारं प्राप्त इत्यर्थः । **मन्दाशङ्केति ॥** गीतार्थमित्यर्थशब्दस्य सामान्यशब्दत्वेनाल्पार्थ-परत्वस्यापि सम्भवादिति भावः ॥

## भावदीपः

'परिपूर्णम्' इत्यनेनैव वैशिष्ट्यलाभात् 'सर्व' इत्यादेः नातीव कृत्यमिति मन्वान आह– **यद्वेति ॥** जीवत्वस्यानेकदोषयुक्तत्वात् 'सर्व' इत्यादिविशेषणेन तन्निरास इति भावः ॥ **तन्नामस्विति ॥**

'............व्यासः शाखासहस्रकृत् ॥
महाभारतनिर्माता कवीन्द्रो बादरायणः ॥
कृष्णद्वैपायनः सर्वपुरुषार्थैकबोधकः' (वा.स.ना.२७५,२७६)

इति वासुदेवसहस्रनामस्वित्यर्थः ॥ **गौरवादेवेति ॥** नतु व्यक्तिबाहुल्याभिप्रायेणेति भावः । कुतः? इत्यत आह– **मुख्येति ॥** वेणुगीतादेरमुख्यत्वेन भगवद्गीताया एव मुख्यत्वादिति भावः ।

मुख्यत्वं चाग्रे भाष्य एव व्यक्तमिति भावः ॥ **इत्थम्भूतेति ॥** 'प्रतियोगे पञ्चम्यास्तसिः' (पा.सू.५.४.४४) इति सूत्रे 'आद्यादिभ्य उपसङ्ख्यानम्' इति वार्तिके (वा.३३३९) प्रथमादिविभक्त्यन्तादप्याद्यादिशब्दग्रहणात् पञ्चमी इत्युक्तेरिह तृतीयार्थे तसिः । सा चेत्थम्भूत-लक्षणार्था ।

'इत्थम्भूतलक्षणे तृतीया'(पा.सू.२.३.२१) इति सूत्रात् । छात्रेणोपाध्यायत्वप्रकारक-ज्ञानम् इतिवत् लेशेन गीतार्थत्वप्रकारं वक्ष्यामीत्यर्थः । कश्चित्प्रकारं प्राप्तस्येत्थम्भूत-शब्दार्थत्वात् ॥

यद्वा,'अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्' (ऋ.१.३८.१३) इत्यत्र ऋग्भाष्य-

टीकायाम् 'जरायै जरया' इति व्यत्ययेन 'इत्थम्भूतलक्षणे तृतीया' इत्युक्त्वा 'जरात्वेन स्तुतित्वप्रकारं प्राप्तया गिरा' इत्युक्तदिशा अल्पत्वप्रकारं प्राप्तमित्यर्थः ॥ **वन्ध्येति** ॥ अर्थहीनेत्यर्थः ॥ **मन्दाशङ्केति** ॥ सर्वगीतार्थमित्यनुक्त्या शङ्कानुदयात् 'मन्द' इत्युक्तम् ॥

## वाक्यार्थप्रदीपः

ननु पञ्चम्यास्तसिरिति विधानात् लेशस्यापादानत्वहेतुत्वयोरभावेन पञ्चम्या एवासम्भवात् तसेरनुपपत्तिरित्यत आह– **तृतीयान्तादिति** ॥

ननु च कर्तृकरणयोस्तृतीयेति स्मरणात् लेशस्य च कर्तृत्वकरणत्वयोरसम्भवेन तृतीयानुपपत्तेः न तृतीयान्तादपि तसिर्युक्त इत्यतो नायं कर्तृकरणयोस्तृतीयेति कर्तृत्वाद्यर्थकतृतीयान्तात्तसिः, अपितु इत्थम्भूतलक्षण इति सूत्रविहितेत्थम्भूतलक्षणार्थतृतीयान्तादेवेत्याह– **इत्थम्भूतलक्षणार्थेति** ॥ कश्चित् प्रकारं प्राप्त इत्थम्भूत इत्युच्यते । प्रकारवचने इदमःस्थमुप्रत्यये इत्थमित्यस्य निष्पन्नत्वेन इत्थमित्येनन कश्चित्प्रकारमित्यस्य लाभात् प्राप्त्यर्थकभूधातोः क्तान्तस्य भूत इति निष्पत्तेर्भूत इत्यनेन प्राप्त इत्यर्थस्य लब्धत्वात् । सामान्यस्य च भेदको विशेषः प्रकारः । तस्य कश्चित्प्रकारं प्राप्तस्य । लक्षणम्–लक्ष्यते चिन्ह्यतेऽनेनेति लक्षणं चिह्नम् । तदर्था या तृतीया तदन्तात्तसिरित्यर्थः । अत्र चार्थत्वसामान्यस्य बह्वर्थत्वं प्रकारः, तं प्रकारं प्राप्तस्य गीतार्थस्य लेशो ज्ञापकत्वात् लक्षणम् । अनेनैव प्रकारेण सर्वोऽपि गीतार्थो ज्ञातव्य इति भवति तत्र तृतीया । यथा मनुष्यत्वसामान्यस्य उपाध्यायत्वमध्यापकत्वं च प्रकारः, तमुपाध्यायत्वप्रकारं प्राप्तस्य चिह्नं छात्रः । यतस्दनुयायिनं छात्रं दृष्ट्वोपाध्यायोयं लक्ष्यते । उपाध्यायलक्षणं छात्र इति तत्र तृतीया । यथा वा मनुष्यत्वसामान्यस्य छात्रत्वं प्रकारः, तं प्रकारं प्राप्तस्य कमण्डुलुर्लक्षणम् । छात्रोपाध्याययोः गच्छतोः छात्रस्य हस्ते कमण्डुलुर्भवति । कमण्डुलुना छात्रोऽयं ज्ञातवानित्यर्थः । यद्येवमीदृशज्ञाने कमण्डुलोः करणत्वादेव तृतीयासिद्धेः व्यर्थोऽयं प्रयास इति चेत् । एवं तर्हि यदायं प्रमाता प्रमितिदशायामेव प्रतीतिविशेषं प्रतिपादयितुं वाक्यं प्रयुङ्क्ते कमण्डुलुनायं छात्र इति तदा ज्ञानक्रियायाः अप्रतिभासात् अप्रतिपाद्यत्वात् च करणात्वासम्भवेन तृतीयाऽसिद्धिप्रसङ्गेन वैय्यर्थ्यात् । उदाहरणं त्वेवं व्याख्येयम् । कमण्डुलुना छात्र इत्येवं रूपं ज्ञानमस्याभूदिति कोऽर्थः । अद्राक्षीदिति निर्दिष्टस्य द्रष्टुः ज्ञानविशेषोऽत्र कथ्यते न प्रयोक्तुरिति सकलमकलङ्कम् ॥

## भावरत्नकोशः

ननु प्रसिद्धत्वाभिप्रायेण वाचकपदानुपादाने विशिष्टत्वोपस्थापकपदमपि नोपादातव्यमेव । भाष्यकारस्य नारायणे विशिष्टत्वस्यापि प्रसिद्धत्वात् । एकेनैव पदेन विशिष्टत्वस्य प्रतिपादन-सम्भवाच्चेत्यतः पक्षान्तरमाह– **यद्वेति । न परेषामिवेति ॥** 'क्षेत्रज्ञं चापि मां विद्धि', 'ममैवांशो जीवलोके', 'निर्गुणं गुणभोक्तृ च' इत्यादिवाक्यानां प्रतीतार्थप्रच्यावनस्य व्याख्यास्यमानत्वादिति भावः । देवताप्रणामानन्तरं गुरूनपि नमति भाष्यकारः **गुरूंश्चाऽनिति**। अत्राऽशब्दार्थमाह– **आन् व्यासानिति । तन्नामस्विति ॥** 'महाभारतनिर्माता कवीन्द्रो बादरायणः' इति वासुदेवसहस्रनाममध्ये व्यासनामस्वित्यर्थः ॥

ननु कथमेकस्मिन् व्यासे बहुवचनम् । 'बहुषु बहुवचनम्' इति व्यक्तिबाहुल्य एव तदनु-शासनादित्यत आह– **बहुवचनं गौरवादेवेति ॥** व्यक्तिबाहुल्यनिबन्धनत्वं व्यावर्तयितुमेव-शब्दः । 'आत्मनि गुरावेकेषाम्' इति प्राचामाचार्याणां वाचा बहुवचनमेकस्मिन्नपि प्रतिपत्ति-पारवश्यात् प्रयोगमर्हति । 'एकस्मिन् बहुवचनमन्यतरस्याम्' इत्यनुवृत्तेरिति भावः । तथा च कर्मनिर्णयटीका 'धिया वो मेधसातये' इत्यत्र 'वो मेधसातये । व इति गुरुत्वाद् बहुवचनम्' इत्यत्र 'युष्मदि गुरावेकेषामिति वचनादिति भावः' इति ॥ यद्यपि तत्र युष्मच्छब्दोऽस्ति । अत्र तु न । तथाऽप्युक्तवचनादत्र तदुपपत्तिरित्याहुः ॥ **भगवद्गीतैवेति ॥** तस्या एव भ्रमरगोपिका-गीताद्यपेक्षया मुख्यत्वादिति भावः ॥

ननु लेशत इति कथम् ? गीतार्थमिति सन्निधानेन तसेर्द्वितीयान्तशब्दादुत्पत्तिशङ्कया लेशं गीतार्थमिति प्रतीत्यापत्तेः । न चैतद् युक्तम् । 'दशार्थाः सर्वभारते' इति भारतस्यैव बह्वर्थत्वेन तत्सारभूतगीतायास्ततोऽप्यतिबह्वर्थत्वस्य वक्तव्यतया तस्यैव प्रतिज्ञातव्यत्वौचित्यात् । न च वक्तुरशक्त्याऽल्पवचनं प्रत्यज्ञायीति वाच्यम् । 'सर्वज्ञः सर्वशक्तिः', 'एतदर्थमतिसूक्ष्ममपि त्वं शक्त एव' इत्यादौ सर्वशक्त्याद्यावेदनादिति चेत् सत्यमेतत् समस्तमित्यभिप्रायेण तत्पद-भावमाह– **यद्यपीत्यादिना ॥** वर्णितो भावः कथं तेन लभ्यत इत्यत आह– **इत्थम्भूतेति ॥** कञ्चित् प्रकारं प्राप्त इत्थम्भूतः । तस्य लक्षणमित्थम्भूतलक्षणं तत्र तृतीयाविभक्तिर्भवतीति 'इत्थम्भूतलक्षणे' इति सूत्रार्थः । अत्र च गीतार्थत्वप्रकारं प्राप्तो गीतार्थ इत्थम्भूतः । तस्य लक्षणे लेशे तृतीयायां तदन्ताच्च 'आद्यादिभ्य उपसङ्ख्यानम्' इति तसिप्रत्यये 'सुपो

धातुप्रातिपदिकयोः' इति तृतीयाया लुकि लेशत इति रूपम् । लेशेनेत्यर्थः । लेशेन लक्षणेन लक्षितं यद् गीतार्थत्वं तद्विशिष्टं गीतार्थं वक्ष्यामीत्युक्ते गीतार्थानां बहुत्वेऽप्यत्र भाष्येऽल्पमेवार्थं वक्ष्यामीति लभ्यत इति भावः ॥

केचित्तु, लेशशब्दस्य द्वौ व्यापारौ । तत्राविनाभावेन गीतार्थे बहुत्वानुमापनमेको व्यापारः । अभिधाशक्त्या तत्राल्पत्वबोधनमपरो व्यापार इति ॥ तत्राविनाभावशक्त्या स्वानुमापितबहुत्व-रूपधर्ममुपस्थापयति । अभिधाशक्त्या च गीतार्थस्याल्पत्वमिति लेशेन गीतार्थं वक्ष्यामीति प्रतिज्ञावाक्यस्य लेशज्ञापितबहुत्वविशिष्टे गीतार्थेऽल्प एव वचनकर्मेत्यर्थः सम्पद्यत इति भावेन 'इत्थम्भूतलक्षणार्थतृतीयान्तात् तसिः' इत्युक्तमिति व्याकुर्वते ॥

अपरे तु, सूत्रे लक्षणशब्दो व्यावर्तकरूपचिह्नपरः । एवञ्च लेशव्यावर्तितबहुत्वविशिष्टो गीतार्थोऽत्र वक्षमाण इति सिद्धौ लेशपदेन गीतार्थे बहुत्वे व्यावर्तिते बहुषु गीतार्थेषु सत्स्वपि स्वल्प एवोच्यत इति लभ्यते । कश्चित् प्रकारं बह्वर्थत्वरूपं प्राप्तो गीतार्थ इत्थम्भूतः । तल्लक्षणे तच्चिह्ने व्यावर्तके लेशे तृतीयेति तदन्तात् तसिरित्यस्यार्थः । तेन बहुत्वस्य गीतार्थे प्रकारत्वे बहुत्वविशिष्टस्य गीतार्थस्य वचनक्रियान्वयः स्यात् । कमण्डलुना छात्रं, छात्रेणोपाध्याय-मद्राक्षीदित्यादौ प्रकारविशिष्टस्य दर्शनक्रियाकर्मत्वान्वयदर्शनात् । अत्र न बहूनामर्थानां वक्ष्यामीत्युक्तक्रियान्वयो युक्तः अदर्शनात् लेशत इत्युक्तिव्याघाताच्चेति दूषणानवकाशः । लक्षणशब्दस्य व्यावर्तकचिह्नार्थत्वस्य प्रसादकारकृष्णपण्डितादिभिरभ्युपगतत्वादिति व्याचक्षते । इतरे तु, मन्दमतिमच्छ्रोतृद्देश्यकत्वं गीतार्थे प्रकारः । लेशपदेन च तत्प्रकारावच्छिन्नो गीतार्थोऽत्र वक्ष्यमाणत्वेनोक्तः । मन्दमतिमच्छ्रोतृद्देश्यको गीतार्थ इति लेशपदेन लभ्यते । न चोक्तप्रकारस्य शब्दबोध्यत्वाभावात् कथं तस्य लेशेन ज्ञाप्यत्वम् ? कमण्डलुना छात्र इत्यादौ प्रकारस्य शब्दबोध्यत्वदृष्टेरिति वाच्यम् । लेशपदेन ज्ञाप्यस्यापि शाब्दत्वमस्तीत्यभिसन्धाना-दित्याहुः ॥

लेशपदप्रयोजनमाह– **अर्थशब्देनेति** ॥ इदं लेशत इति पदम् ॥ **शिष्यशिक्षार्थमिति** ॥ ग्रन्थमन्तरा मनसा वाचा च कृतेन नमनेनैव प्रारिप्सितपरिसमाप्त्यादिसम्भवेऽपि यद्ग्रन्थे तन्निबध्नाति तदाचार्यस्य मङ्गलाचरणदर्शनादस्माभिरपि तदाचरितव्यमिति शिष्याणां तत्र प्रवृत्तिः स्यादिति शिष्यानुशासनार्थमित्यर्थः । अस्य प्रतिज्ञाया ग्रन्थे निवेशनस्य । **यतिभङ्ग**

यतिविच्छेदः । 'पादः पद्यचतुर्थांशो यतिर्विच्छेदसंज्ञिता' इति केदारवचनात् । 'श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः' इति दण्डिवचनाच्च । यत्र यतिः पादान्ते पदस्य विच्छेदः कर्तव्यस्तदकरणं यतिभङ्गः । स एव दोषः । 'पादान्ते पदमध्यं चेद् यतिभङ्गः प्रकीर्तितः । तस्मात् पादावसाने तु पदमेव समापयेत्' इति शास्त्रेण पादान्ते पदसमापनस्यैवाऽवेदितत्वेन गुरूंश्चाऽन् गीत्यत्र पादान्ते पदमध्यदर्शनाद् यतिभङ्गः छन्दश्शास्त्रवादिभिर्दोषत्वेनोक्त इत्यर्थः ॥ **काव्येति ।** कविसमयानुरोधेन निबद्धौ शब्दार्थौ काव्यम् । तत्र 'भग्नच्छन्दो यतिभ्रष्टम्' इत्यादौ यतिभङ्गो दोषत्वेनोक्त आलङ्कारिकैरिति तद्विषय एवायं दोषो न शास्त्र इत्यर्थः । अभियुक्त-वाक्यं कुसुमाञ्जलावुदयनवाक्यम् । इतिशब्दस्य न यतिभङ्गो दोष इति पूर्वेणान्वयः । आद्यपद्यव्याख्यासमाप्तौ वेतिशब्दः ॥

## भावदीपिका

**जीवत्वेति ॥** 'क्षेत्रज्ञं चापि मां विद्धि' इति प्रतिपादनादिति भावः ॥ **निर्विशेष-त्वादीति ॥** 'निर्गुणं गुणभोक्तृ च' इत्यादिप्रतिपादनादिति भावः । सर्वदोषविवर्जितमित्युक्त्या न जीवत्वरूपेण, तथात्वे दोषित्वापत्तेरित्याख्याति । परिपूर्णतया चेत्युक्त्या न निर्विशेषत्वादि-रूपेणेत्याख्यातीति ज्ञेयम् । जीवत्वनिर्विशेषत्वप्रतिपादनपरतया प्रतीयमानानां वाक्यानामन्यथा व्याख्यास्यमानत्वादित्याशयः ॥ **तन्नामसु पाठादिति ॥**

'अ आ अं अ पुराणर्षिर्व्यासः शाखासहस्रकृत् ॥
महाभारतनिर्माता कवीन्द्रो बादरायणः ॥
कृष्णद्वैपायनः सर्वपुरुषार्थैकबोधकः ।
वेदान्तकर्ता ब्रह्मैव व्यञ्जकः पुरुवंशकृत् ॥'

इति वासुदेवसहस्रनाम्नि व्यासनामसु पाठादित्यर्थः । व्यासस्यैकत्वेन 'आन्' इति कथं बहुवचनमित्यत आह– **बहुवचनमिति ॥** गौरवादेव, न तु द्रौण्यादिव्यासान्तरसाहित्येन, येन तेषामपि भाष्यकारवन्द्यत्वं स्यादित्याशयः । 'गुरावात्मनि चैकेषाम्' इति स्मरणादिति ध्येयम् । गीतार्थमिति सामान्योक्त्या कलिङ्गादिगीताप्रसक्तौ सत्यां तत्परिहारायाऽह– **गीतेति ॥** न कलिङ्गादिगीतेत्यर्थः । कुत इत्यत आह– **मुख्येति ॥** मुख्यत्वं च निर्विशेषशब्दवाच्यत्वेन व्यासवदिति

'मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ।
यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥' इत्युक्तन्यायेन द्रष्टव्यम् ॥

ननु लेशत इत्ययं तसिस्तावत् तृतीयान्तात् लेशशब्दाज्जातोऽस्ति । तसेः सार्वविभक्तिकत्वात् । अत्र च तृतीयैव कथम् ? । ' कर्तृकरणयोस्तृतीया' इति कर्तरि करणे च तृतीया विहिता । 'रामेण बाणेन हतो वाली' इति प्रयोगदर्शनात् । प्रकृते च 'गीतार्थं वक्ष्यामि' इत्यत्र वचनक्रियां प्रति लेशस्य कर्तृकरणत्वयोरभावात् कथं तृतीया ? कथं च तदन्ताच्छब्दात् तसिरित्याशङ्कायां न 'कर्तृकरणयोस्तृतीया' इति सूत्रप्राप्ततृतीयान्तात् तसिः किन्त्वन्यस्मादेवेत्याह– **इत्थम्भूतलक्षणार्थतृतीयान्तात् तसिरिति ॥** इत्थम्भूतलक्षणमर्थो यस्यास्तृतीयायास्तदन्ताल्लेशशब्दात् तसिरित्यर्थः । अयं भावः । 'इत्थम्भूतलक्षणे' कश्चित् प्रकारं प्राप्त इत्थम्भूतस्तल्लक्षणे तृतीया स्यादिति सूत्रार्थः । छात्रेणोपाध्यायमद्राक्षीदित्युदाहरणम् । तत्र उपाध्यायत्वरूपं प्रकारं प्राप्तः पुमानित्थम्भूतः । तत्प्रकारस्य लक्षणे छात्रे तृतीया जाता । तत्र लक्षणशब्दो व्यावर्तकत्वार्थः । उपाध्यायत्वस्यान्यत्र प्रसक्तौ सत्यां छात्रस्य तद्व्यावर्तकत्वात् । एवं प्रकृतेऽपि गीतार्थं वक्ष्यामीत्यत्र वचनविषयत्वरूपं प्रकारं प्राप्तो गीतार्थ इत्थम्भूतः । तल्लक्षणे तद्व्यावर्तके लेशे तृतीया । गीतार्थं वक्ष्यामीत्युक्ते सर्वस्यापि गीतार्थस्य वचनविषयत्वरूपप्रकारत्वप्रसक्तौ लेशस्य तद्व्यावर्तकत्वात् । सर्वस्मिन्नपि गीतार्थे वचनविषयत्वरूपप्रकारस्य तेन व्यावर्तनादिति ॥

एवं सौत्रलक्षणशब्दस्य व्यावर्तकार्थत्वमभिप्रेत्योक्तं विवृणोति– **अर्थशब्देनेति ॥** इयं प्रतिज्ञा गीतार्थं वक्ष्यामीति प्रतिज्ञा । गीतार्थमित्यर्थशब्दस्य सामान्यशब्दत्वेनाल्पार्थपरत्वमपि सम्भवतीत्यतो मन्दाशङ्केत्युक्तम् ॥ **इदमुदितमिति ॥** लेशत इति पदमुदितमित्यर्थः ॥

नन्वेकस्यैव व्यावर्तकव्यावर्त्यत्वयोर्लोकेऽदर्शनात् प्रकृते च लेशरूपगीतार्थस्यैव व्यावर्तकताया गीतार्थस्यैव च व्यावर्त्यतायाश्चाङ्गीकारेणेत्थम्भूतलक्षणार्थत्वमयुक्तमिति चेत्, उच्यते । वृक्षत्वशिंशुपात्वयोरिव सामान्यविशेषभावाङ्गीकारेण व्यावर्तकत्वादेः सम्भवात् । गीतार्थस्य सामान्यरूपत्वात् । लेशरूपगीतार्थस्य विशेषरूपत्वादिति ध्येयम् । यद्वा, गीतार्थं वक्ष्यामीत्यत्र वचनमेव प्रकारः । तं प्राप्तो गीतार्थस्तल्लक्षणो लेशरूपो धर्म इति तत्र तृतीया । तदन्तात् तसिरित्यर्थः । अत्र लेशशब्दो नार्थपरः । किन्तु तन्निष्ठधर्मपर इति द्रष्टव्यम् । तथाच गीतार्थं

लेशेन अल्पतया वक्ष्यामीत्यर्थो द्रष्टव्यः । वचनस्यैव प्रकारत्वमभिप्रेत्योक्तं विवृणोति– **अर्थशब्देनेति ॥ सर्वार्थग्रहणेति ॥** सर्वार्थवचनेत्यर्थः ।

## भावप्रकाशः

**तन्नामस्विति ॥** व्यासनामस्वित्यर्थः । ननु व्यासस्यैकत्वात् तत्र एकवचनं युक्तं बहुवचनं तु कथमित्यत आह– **बहुवचनं गौरवादेवेति ॥** व्यासरूपबाहुल्यप्रयुक्तं बहुत्वं व्यवच्छेत्तु-मेवेत्युक्तं। ननु बहुवचनं गौरवादिति कथं मुनित्रयानुक्तत्वादिति चेत् नेदं व्याकरणशास्त्रीयं बहुवचनं किन्तु यथाऽनुशासनाभावेऽपि 'सत्यंभिदे'त्यादि वाक्यस्य शपथत्वेन त्रिःप्रयोग ऐच्छिकः तथैदमिति गौरवद्योतनायैच्छिकमेव । यद्वा शिष्टप्रयोगरूपज्ञापकसिद्धं तथाहि श्रुतौ प्रयोगः 'नवै नूनं भवावन्तस्त एतदवेदिषु'रिति । भागवते च'भवद्भिस्तीर्थकाः कृताः' येषां संस्मरणात् पुंसामित्यत्र शुकं प्रति भवद्भिरिति येषामिति च परीक्षिता प्रयोगः कृतः । अत एव प्रयोगः प्रामाण्यमाश्रित्य कैयटेन गुरुवाचकशब्दे बहुवचनं समर्थितं, ज्ञापकसिद्धं न सर्वत्रेति न्यायेन गुरुं च मे वन्द इत्यादावेकवचनप्रयोगोपि सङ्गच्छत इति।। केचित्तु आत्मनि गुरावेकेषामिति प्राचामाचार्याणां वचनाद् बहुवचनं युक्तमित्याहुः ।।

**इत्थम्भूतेति ॥** कश्चित् प्रकारं प्राप्त इत्थम्भूतस्तस्य यल्लक्षणं तत्रार्थे या तृतीयेत्थम्भूतलक्षण इति सूत्रेण वीहिता तदन्तात् तसिरित्यर्थः । अत्र गीतार्थो वक्ष्यमाणत्वं गीतार्थत्त्वं वा प्रकारं प्राप्त इति इत्थम्भूतस्तस्य लक्षणं लेशः व्यावर्तकत्वात् । अत एवोक्तमर्थशब्देन सर्वार्थप्रसक्ता-विति अल्पमेवोच्यत इति च अतस्तत्र तृतीयेति भावः । ननु सूत्रे इत्थम्भूतलक्षणशब्देन प्रकारविशिष्टज्ञापकमेव विवक्षितम्, छात्रेणोपाध्यायो जटाभिस्तापस इत्युदाहरणात् । जटा-ज्ञाप्यतापसत्वविशिष्ट इति भट्टोजिव्याख्यानाच्च । लेशश्च व्यावर्तक एवेत्युपपादितं तत्कथ-मुक्तसूत्रेणात्र तृतीयेति चेत् सत्यं तथापि प्रकारविशिष्टं प्रति व्यावर्तकमपीत्थम्भूतलक्षणशब्देन विवक्षितं सूत्रे ज्ञापकव्यावर्तकसाधारणलक्षणशब्दप्रयोगात् । लक्षणं चिह्नमिति साधारण्येन कृष्णपण्डितादिभिः व्याख्यातत्वाच्च। अन्यथा सूत्रे विशिष्य ज्ञापकशब्दप्रयागो लक्षणं ज्ञापकमिति व्याख्यानश्च स्यादित्याशयात् ।

यद्वा अस्तु ज्ञापकमेव लक्षणमिति तथापि व्यावर्तकस्य ज्ञापकविशेषत्वात् तत्रेत्थम्भूत-

सूत्रेण तृतीयोक्तौ न दोषः। नन्वित्थम्भूतलक्षण इति समभिव्याहारात् प्रकारविशिष्टज्ञापकत्वं लभ्यते व्यावर्तकं च न प्रकारविशिष्टज्ञापकमतः कथमुक्तसूत्रेण तृतीयेति चेन्न । यस्य च भावेन भावलक्षणमित्यत्र भावस्य कालविशेषवैशिष्ट्यज्ञापकमिति व्याख्यानवदिहापीत्थम्भूतस्य व्यावृत्ति ज्ञापकमिति व्याख्यानोपपत्तेः । समभिव्याहारस्य चोक्तस्थले व्यभिचारेणाप्रयोजकत्वात् ॥

वस्तुतस्तु कारकचक्रे इत्थम्भूतसूत्रतात्पर्यमुक्तम् अत्र चोपलक्षणत्वे तृतीयाविधानमिति। शब्दकौस्तुभे च 'किति चे'त्यत्र लक्षणशब्द उपलक्षणार्थ इति सूचितं । तथा च लेशात इत्यत्रे-त्थम्भूतसूत्रेण तृतीयोपपत्तिः। लेशस्यापि व्यधिकरणत्वे सति व्यावर्तकत्वेनोपलक्षणत्वात् । न च लेशस्य गीतार्थनिष्ठत्वेन प्रत्याप्यव्यावृत्तिसामानाधिकरण्यात् कथं व्यधिकरणत्वमिति वाच्यं तस्यापि भिन्नविभक्त्यन्तपदवाच्यत्वरूपशाब्दवैयधिकरण्यसम्भवात्। जटाभिस्तापस इत्यादावपि कारकचक्रमत एषैव गतिरिति दिक् ।

## प्रमेयदीपिका

नन्वस्तु नमस्कारग्रथनं शिष्यशिक्षणार्थम्। प्रतिज्ञा तु किमर्थं ग्रन्थे निवेशनीया? उच्यते । बहुभिर्व्याख्यातृभिः भगवद्गीताया व्याख्यातत्वाद् व्यर्थमिदं भाष्यमित्याशङ्कानिरसनं प्रयोजन-मस्याः। अन्यैस्स्वपक्षनिक्षिप्तदृष्टिभिस्स्वाभिप्रायो भगवद्गीतार्थत्वेन आरोप्योक्तः । अहं तु गीतार्थमेव वक्ष्यामीति सूचनात् ॥

न चात्र यतिभङ्गो दोषः । तस्य काव्यविषयत्वात् । शास्त्रे तु 'य उपाधिर्लगति साध्ये सम्बन्धविशेषणे'(कुसुमाञ्जली ) इत्याद्यभियुक्तवाक्ये दर्शनादिति ॥

## भावदीपः

ननु 'यतिर्विच्छेदसञ्ज्ञिता' इति वृत्तरत्नाकरोक्त्या 'श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः' (काव्यादर्शे.४.२९) इति दण्ड्युक्त्या पदस्यैव पदान्ते विरामप्राप्तेः कथनात् कथम् 'आन् गीतार्थम्' इत्यत्र पदमध्य एव पदान्ते विरामः? श्लोकेषु नियतस्थान एव पदच्छेदस्यैव यतित्वेनात्र यतिभङ्गः कथं न स्यात्? इत्याशङ्क्य निषेधति– **नचात्रेति ॥** कुसुमाञ्जल्युदाहृतश्लोकं संवादयति– **य उपाधिरिति ॥** 'दर्शनात्' इत्यस्य 'न चात्र यतिभङ्गदोषः' इति पूर्वेणान्वयः ॥

## भावदीपिका

**प्रयोजनमस्येति ॥** ग्रन्थे प्रतिज्ञानिवेशनस्येत्यर्थः । **गीतार्थमेवेति ॥** अर्थशब्दो मुख्यार्थपरः । सत एव पदार्थस्येति यथा । तथाचाहं तु गीताया मुख्यार्थमेव वक्ष्यामीत्यर्थशब्देन सूचनादित्यर्थः ॥ **यतिभङ्ग इति ॥** यतिर्विरतिः । यतिस्थानभङ्गो यतिभङ्ग इति मध्यमपदलोपी समासः । तथा च पदान्त एव विरतिर्दृष्टा न पदमध्ये । अतोऽत्र गीतेति पदस्य मध्ये गीत्यत्र कथं विरतिरिति भावः ॥ **तस्येति ॥** यतिभङ्गरूपदोषस्येत्यर्थः । नहीदं पामरमनोरञ्जनार्थं काव्यमिति भावः । ननु शास्त्रे यतिभङ्गस्यादोषत्वं कुत इत्यत आह– **शास्त्रे त्विति ॥** 'तद्विशेषणयुक्तैतदभावाभूस्तु केवले' इति वाक्यशेषेणान्वयः ॥

अत्र 'य उपाधिर्लगति साध्ये सम्बन्धविशेषणे' इत्येव पाठः । उपाधिवार्तिककारादयस्तु यतिभङ्गभीरवो 'य उपाधिर्लालगीति साध्ये वै यद्विशेषणे' इति पाठं कल्पयन्ति । तन्न । मूल-पुस्तकेष्वदर्शनात् । अतष्टीकाकारैश्चिरन्तनपाठ एवोदाहृत इति ध्येयम् । तदर्थस्तु विशेषणस्य सम्बन्धो यस्मिन् साध्ये तत्सम्बन्धविशेषणमिति विशेषणशब्दस्य परनिपातः । भू सत्ता । अभूरभावः । एवञ्च 'वायुः प्रत्यक्ष प्रत्यक्षस्पर्शाश्रयत्वात्' इत्यत्र यस्य बहिर्द्रव्यत्वरूप-विशेषणस्य सम्बन्धवति प्रत्यक्षत्वरूपे साध्ये य उद्भूतरूपवत्त्वाख्य उपाधिर्लगति तद्विशेषण-युक्तैतदभावाभू बहिर्द्रव्यत्वरूपविशेषणयुक्तोद्भूतरूपवत्त्वरूपोपाधेरभावस्याभावः केवले प्रत्यक्षत्वरूपे शुद्धसाध्य एवोपाधिः । ततश्च बहिर्द्रव्यत्वावच्छिन्नोद्भूतरूपवत्त्वाभावाभावो विशिष्टाभावरूपः । स च प्रत्यक्षे रूपादौ गुणे विशेष्यसत्त्वेऽपि विशेषणाभावेन, घटादौ च विशेषणसत्त्वेऽपि विशेष्याभावेनानुगत इति शुद्धसाध्यव्यापकः । पक्षीभूते च वायौ विशेषण-विशेष्ययोरुभयोरपि सत्त्वेन विशिष्टाभावरूपोपाधेरभावात् साधनाव्यापकश्च भवतीति ॥ १ ॥

## भावप्रकाशः

**यतिभङ्ग इति ॥** पादान्ते पदमध्यत्वमित्यर्थः । यथोक्तं पादान्ते पदमध्यश्चेद्यतिभङ्गः प्रकीर्तितः । तस्मात् पादावसाने तु पदमेव समापयेदिति । **काव्यविषयत्वादिति** गुणालङ्कार-सहितौ शब्दार्थौ दोषवर्जितौ गद्यपद्योभयमयं काव्यं काव्यविदोविदुरिति लक्षणमुक्त्वा के ते दोषा यद्वर्जितत्वं लक्षणमित्यपेक्षायां तद्दोषपरिगणनावसरे भग्नच्छन्दो यतिभ्रष्टमिति यतिभङ्गस्य

दोषत्वोक्त्यन्यथानुपपत्तेर्दोषः काव्यापकर्षस्य हेतुरिति काव्यघटितस्यैव दोषलक्षणस्योक्तत्वाच्चेति भावः । शास्त्रेपि दोषः किं न स्यादिति मन्दाशङ्कानिरासायाह– **शास्त्रे त्विति ॥** य उपाधिरिति तद्विशेषणयुक्तैतदभावाभूस्तु केवल इत्युत्तरार्धः । अवच्छिन्नसाध्यव्यापकोपाधिस्थलेऽपि शुद्ध-साध्यव्यापक एवोपाधिर्वक्तुं शक्य इति प्रतिपादनार्थमयं श्लोकः प्रवृत्तः । अस्यार्थः । विशेषणस्य सम्बन्धो यस्मिन् तत्संबन्धविशेषणम् आहिताग्न्यादित्वात् परनिपातः । तस्मिन् सम्बन्धविशेषणे विशेषणविशिष्ट इत्यर्थः । उत्तरत्र तदिति श्रवणाद्यदिति वक्तव्यम् । उत्तरार्धे एतच्छब्द उपाध्यर्थः । अभूरभावः । तथा च यद्विशेषणविशिष्टे साध्ये यो धर्म उपाधिर्लगति तद्विशेषण-विशिष्टतद्धर्माभावस्याभावः केवले साध्ये उपाधिः सम्भवत्येवेति । यथा वायुः स्पार्शनोऽनुद्भूत-रूपानधिकरणत्वे सति प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र द्रव्यत्वविशिष्टचाक्षुषत्वाभावस्याभावः । अयं च विशिष्टाभावरूपोपाधिः । साध्यवति स्पर्शादौ द्रव्यत्वरूपविशेषणाभावेन घटादौ तु चाक्षुषत्वाभावरूपविशेष्याभावेनानुगत इति शुद्धसाध्यव्यापक इति । यद्यपि य उपाधिर्लालगीति साध्ये वै यद्विशेषण इत्येव पाठो दृश्यते । तथापि प्राचां पाठमनुसृत्यैवमुक्तम् । वस्तुतस्तु उक्तयुक्तावेव तात्पर्यम् ॥

**भाष्यम्– नष्टधर्मज्ञानलोककृपालुभिः ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोऽवततार ॥**

## भावप्रदीपिका

श्रीगीतायाः प्रामाण्ये इष्टसाधनावबोधकत्वे सिद्धे स्याद्व्याख्येयत्वम् । तदेव कुतः ? इत्याशङ्क्य, गीताया भारतान्तर्गतत्वात्, भारतस्येष्टसाधनावबोधकत्वं च साधयितुमाह– **नष्टेत्यादि ॥** नष्टे धर्मज्ञाने यस्य लोकस्य तस्मिन् कृपालुभिः ब्रह्मादिभिः ज्ञानप्रदर्शनार्थमर्थितो भगवान् नारायणो व्यासोऽवततार ।

## भावप्रकाशिका

दशार्थत्वात् सर्वस्यापि भारतस्य, भाष्ये(भारते च इति भाव्यमिति भाति) च गीतानां पृथक् दशार्थत्वात्, तासां महाभारतान्तर्गतत्वात् तस्य महाप्रामाण्यं साधयितुं, तत्कर्तुराप्तत्वं तावदाह– **नष्टधर्मेत्यादिना ॥** अयं भावः पौरुषेयं हि वाक्यमाप्तोक्तत्वात् प्रमाणम् । यो हि

वक्ष्यमाणार्थाभिज्ञत्वेन सम्यज्ज्ञानानुकूलः, तदनुकूलं श्रोतारं प्रसङ्गं च प्राप्तः, स आप्तः । उक्तवाक्यमाप्तवाक्यम् । अत्र भगवतः सुरार्तिहरावतारस्य नारायणस्य व्यासरूपेण वक्तृत्वात् । सुराणां ब्रह्मादीनाम्, तत्कृपाभाजां च श्रोतृत्वात्, तैरेव ज्ञानप्रदर्शनाय प्रार्थितत्वात्, तस्याप्तत्वमिति ॥

## प्रमेयदीपिका

ननु प्राधान्येन व्याख्येयता प्रामाण्ये अधिकारिविषयप्रयोजनाभिसम्बन्धे दुर्गमार्थत्वे च सति सम्भवति । तत्कथं भगवद्गीतायाः प्रामाण्यादिकम्? सति वा तस्मिन् तथाविधग्रन्थान्तर-परिहारेणास्या एव व्याख्याने को हेतुः? इत्याशङ्क्य महाभारतान्तर्गतत्वाद् भगवद्गीतायास्तस्य प्रामाण्यादिसिद्धौ तस्या अपि तत्सेत्स्यतीत्याशयवान् महाभारतस्य प्रामाण्यादिकं साधयितु-माह– **नष्टधर्मज्ञानेति॥**

किमनया कुटिलिकया? गीताया एव पृथक् प्रामाण्यादिकं साध्यताम् । मैवम् । महावाक्यप्रमाण्याद्यनधिगतावान्तरवाक्यप्रामाण्यादेरसम्भावनाग्रस्तत्वेन साधयितुमशक्यत्वात् । यथोक्तम्– 'सम्भावितः प्रतिज्ञाया अर्थस्साध्येत हेतुना' इति ॥ नष्टशब्दोऽदर्शनवाची । 'णश अदर्शने'(पा.धा.११९४) इति स्मरणात् । धर्मो निवृत्तिलक्षणः । ज्ञानशब्देन ज्ञेयं परं तत्वं वासुदेवाख्यमपरं च प्रकृत्यादिकं लक्ष्यते । लक्षणायाश्च प्रयोजनम् यथा धर्मो ज्ञात्वा उत्पादनीयः न तथेदम् । किन्तु ज्ञानपरम्परैव तद्विषयाऽनुष्ठेयेति ज्ञापनम् ।

'लोकः' इति सज्जनो विवक्षितः । नष्टेऽदर्शनं गते धर्मज्ञाने यस्य तस्मिन् लोके विषये कृपालुभिः ॥

## भावबोधः

**ज्ञानशब्देन ज्ञेयमिति ॥** 'ज्ञानप्रदर्शनाय' इत्युत्तरत्र तावत् ज्ञानशब्देन ज्ञेयमेव ग्राह्यम् । ज्ञानस्य प्रदर्शनायोगात् । अन्यथा उत्पादनायेत्यवक्ष्यत् । ततश्चात्रापि तदनुरोधात् ज्ञानशब्दो ज्ञेयपर इति भावः ॥

## भावदीपः

**प्राधान्येनेति** ॥ इष्टोपायतयाऽवश्योपादेयत्वेनेत्यर्थः ॥ **अभिसम्बन्ध इति** ॥ अधिकार्यादित्रयस्यान्योन्यमभिसम्बन्धे चेत्यर्थः ॥ **साधयितुमाहेति** ॥ भारतस्वरूपाद्युक्तिपूर्वं तदुत्पत्तिप्रकारमाहेत्यर्थः ॥ **किमनयेति** ॥ महाभारतान्तर्गतत्वाद्युक्त्येत्यर्थः ॥ **यथोक्तं** तार्किकैः– 'ऋजुमार्गेण सिद्ध्यतोऽर्थस्य वक्रेण साधनायोगात्' इति ॥ ध्वस्तता(त्व)भ्रान्ति-निरासायाऽह– नष्टेति ॥ नष्टपदस्याज्ञातार्थतोक्तेः तदानुगुण्याय अर्थमाह– ज्ञानशब्देनेति ॥ लक्ष्यत इति ॥ ज्ञानपदस्य भावार्थे रूढत्वादिति वा, कर्मव्युत्पत्त्या ज्ञेयमात्रस्य लाभेऽ-प्यत्राभिमतपरापरतत्त्वस्यालाभादिति वा अभिप्रायः ॥

## भावरत्नकोशः

ननु 'गीतार्थं वक्ष्यामि' इति प्रतिज्ञाय उत्तरभाष्येण भारतागतिक्रमतत्प्रामाण्यसमर्थनादिक-मसङ्गतमुच्यत इति शङ्कां परिहर्तुमुत्तरभाष्यमवतारयति **ननु चेति** ॥ 'ननु च स्याद् विरोधोक्तौ' इत्यभिधानात् ननु चेति निपातसमुदायो विरोधोक्तौ । प्राधान्येन अनन्यार्थतया । तस्य भारतस्य। प्रामाण्यादिसिद्धौ प्रामाण्यविषयप्रयोजनादिसिद्धौ । तत् प्रामाण्यादि । आह– **भारतागतिक्रमम्** । कुटिलिकया वक्रगत्या । साध्यताम् । इति चेदिति शेषः । ध्वंस-प्रतियोग्यर्थत्वे तस्य प्रदर्शनायोगः । ज्ञानशब्दोक्तपरतत्त्वादौ नित्यत्वाद् ध्वंसायोगश्चेत्यत आह– **नष्टशब्द इति** ॥ अदृष्टवाचित्वं व्युत्पादयति **णश अदर्शन इति** ॥ धात्वादेर्णो नत्वे सति फलिताभिप्रायेण नश अदर्शन इति च क्वचित् पाठः । ननु स्वर्गाद्युद्देश्यक धर्माज्ञानिनि लोके कृपा कुतः ? कुतश्च तत्प्रदर्शनार्थं भगवतोऽवतारः ? प्रवृत्तधर्मस्य हेयत्वादित्यत उक्तं– **धर्मो निवृत्तिलक्षण इति** ॥ निवृत्तिः फलाभिसन्धित्यागः लक्षणं यस्य स निवृत्तिलक्षणः । फलकामनादित्यागपूर्वकं भगवत्प्रीत्युद्देशकं कर्म अत्र धर्मशब्दार्थ इत्यर्थः ॥

यद्वा, निवृत्तिः संसारनिवृत्तिरूपा परमगतिर्लक्ष्यते प्राप्यतेऽनेनेति निवृत्तिलक्षणः । संसारनिवृत्त्यनुकूल इत्यर्थः । तथा च मोक्षधर्मे 'निवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत् । प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत्' इत्युक्त्वा 'प्रवृत्तिः पुनरावृत्तिः निवृत्तिः परमा गतिः' इत्युक्तम् । निवृत्तलक्षण इत्यपि क्वचित् पाठः । स च 'निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते। निवृत्तं सेवमानस्तु ब्रह्माप्येति सनातनम्' इति स्मृत्यनुगुणः ॥

ज्ञानशब्दस्य भावे ल्युडन्तत्वे ज्ञप्त्यर्थकत्वं प्राप्तम् । तदयुक्तम् । ज्ञानप्रदर्शनायेत्यादौ ज्ञप्तेः प्रदर्शनायोगादित्यत आह– **ज्ञानशब्देनेति** ॥ तत्त्वं लक्ष्यत इत्येव वक्तव्ये यज्ज्ञेयमित्याह– **तद् विषयविषयिभावसम्बन्धलक्षणाबीजं वक्तुम्** । इतरत्तु ज्ञेयद्वयस्वरूपनिरूपणाय । भावे करणाधिकरणयोरेव च ल्युडनुशासनेन कर्मव्युत्पत्तेरनाश्रयणम् । 'कृत्यल्युटो बहुलम्' इति बाहुलकाश्रयणं त्वगतिका गतिः । तदाश्रयणे वा तत एव धर्मस्यापि ज्ञानकर्मतया लाभ-सम्भवाद्धर्मपदवैयर्थ्यं स्यात् । वक्ष्यमाणप्रयोजनालाभश्चेति भावः । इदं ज्ञानशब्दोदितं परमपरं च तत्त्वम् । तथा उत्पादनीयम् । असज्जनस्य मोक्षायोग्यतया तत्र धर्मज्ञानोत्पादनाय भगवतोऽवतारायोगेन ब्रह्मादिकृपाविषयत्वाभावादाह– **लोक इति सज्जन इति** ॥ धर्मज्ञान-लोकेति द्वन्द्वभ्रमं निरसितुमाह– **नष्ट इति** ॥ गते इत्यत्र 'गत्यर्थाकर्मक' इत्यादिना कर्तरि क्तः । सप्तम्यर्थोक्तिः **विषय इति** ॥

## भावदीपिका

**प्राधान्येन व्याख्येयतेति** ॥ अनन्यार्थतया व्याख्येयतेत्यर्थः । इतरपरित्यागेनास्या एव व्याख्येयतेति यावत् ॥ **तथाविधेति** ॥ प्रामाण्याद्युपेतेत्यर्थः ॥ **आहेति** ॥ व्यासावतारप्रयोजनं तदवतारेण भारतकरणप्रयोजनं चाऽदावाहेत्यर्थः ॥ **अनया कुटिलिकयेति** ॥ महाभारतान्त-र्गतत्वेन गीतायाः प्रामाण्यसिद्ध्येत्यर्थः ॥ **पृथगिति** ॥ भारतान्तर्गतत्वेन प्रामाण्यसाधनमन्तरे-णेत्यर्थः । स्वातन्त्र्येणेति यावत् ॥ **अशक्यत्वादिति** ॥ तथाच भारताख्यमहावाक्य-प्रामाण्याद्यधिगतौ सत्याम् असम्भावनाशङ्काया अभावेनावान्तरवाक्यभूतगीतायाः प्रामाण्यादिकं साधयितुं शक्यमिति भावः । असम्भावनाशङ्काग्रस्तस्य साधयितुमशक्यत्वे सम्मतिमाह– **यथोक्तमिति** ॥ 'न तस्य हेतुभिस्त्राणमुत्पन्नश्चैव यो मृत' इति वाक्यशेषः ॥

ननु वक्ष्यमाणरीत्या ज्ञानशब्दस्य परापरतत्त्वरूपभगवत्प्रकृत्यादिपरत्वात् तयोश्च नित्यत्वेन नष्टत्वायोगात् तथा निवृत्तधर्मस्यापि 'नहास्य कर्म क्षीयते' इति वाक्यबलेन नष्टत्वायोगाद् व्याचष्टे– **नष्टशब्द इति** ॥ नष्टशब्दप्रकृतिभूतो णश्धातुरित्यर्थः । तत्र नियामकमाह– **णश इति** ॥ **स्मरणादिति** ॥ धातुव्याख्यानादित्यर्थः । तथाच कर्मणि क्तप्रत्यय इति भावः । केचित्तु नष्टशब्दोऽदर्शनगतवस्तुवाचीत्याहुः । धर्मशब्देन प्रवृत्तधर्मग्रहणे तस्यादर्शनोक्तौ

निवृत्तधर्माचरणस्यैव सिद्ध्या तदर्थं ब्रह्मादिप्रार्थनाया अयोगादाह– **धर्म इति ॥** उत्तरत्र ज्ञानप्रदर्शनायेत्यत्र ज्ञानशब्देन तावद् ज्ञेयमेव ग्राह्यम् । ज्ञानस्य प्रदर्शनायोगात् । अन्यथोत्पादनायेति वक्तव्यत्वापातात् । अतस्तदनुसारेणात्रापि ज्ञानशब्दो ज्ञेयपर इत्याह– **ज्ञानशब्देनेति ॥** ननु परापरतत्त्वयोर्ज्ञायित इति कर्मव्युत्पत्त्या ज्ञानशब्दवाच्यत्वेन लक्ष्यत्वाभावाल्लक्ष्यत इति कथमुक्तमिति चेदुच्यते । यदा ज्ञानशब्दाद् ज्ञेयत्वप्रकारको ज्ञेयविशेष्यको बोधो जायते तदा ज्ञानशब्दस्य ज्ञेये शक्तिरेव न लक्षणा । यदा पुनर्ज्ञानशब्देनैव परापरतत्वप्रकारकपरापरतत्त्वविशेष्यकबोधो जायते तदा ज्ञानशब्दस्य परापरतत्त्वे लक्षणैव । तथाच प्रकृते एवमेव बोधस्य विवक्षित्वात् तदभिप्रायेण लक्ष्यत इत्युक्तमिति सम्प्रदायविदः ॥

**लक्षणायामिति ॥** विषयलक्षकविषयिवाचिशब्दप्रयोग इत्यर्थः । **उत्पादनीयः** पुरुषकृत्येति शेषः । इदं ज्ञानशब्दोक्तं परापरतत्त्वरूपं ज्ञेयं धर्मवद् ज्ञात्वा नोत्पादनीयं नित्यत्वादित्याशयः। लक्षणाबीजसम्बन्धोपपादनायोक्तम्– **ज्ञेयमिति ॥ अनुष्ठेया** उत्पाद्या । असज्जने ब्रह्मादीनां कृपालुताया अयोगादाह– **लोक इति ॥**

## भावप्रकाशः

**कुटिलिकयेति ॥** वक्रगत्येत्यर्थः। ध्वंसार्थत्वे प्रदर्शनायेत्यस्वारस्यं स्यात् । ज्ञानशब्दोक्ते परतत्त्वादौ ध्वंसायोगश्च नित्यत्वादित्यत आह– **नष्टशब्द इति ॥ नश् अदर्शन इति ॥** णोन इति नत्वे सति फलितपाठाभिप्रायेणेदम् । ननु प्रवृत्तधर्माज्ञानिनि कुतः कृपा कुतश्च तत्प्रदर्शनार्थं भगवदवतारः प्रवृत्तधर्मस्य हेयत्वादित्यत आह– **धर्मो निवृत्तिलक्षण इति ॥** निवृत्तिः फलकामनादित्यागो लक्षणं चिह्नं यस्येति फलकामनादित्यागपूर्वक इत्यर्थः । अन्ये तु तत्त्वज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवर्तनेन तत्त्वज्ञानमुत्पाद्य संसारं निवर्तयतीति निवृत्तिलक्षण इत्याहुः । ज्ञानशब्दस्य ज्ञप्त्यर्थत्वे ज्ञानप्रदर्शनायेत्यत्रापि तदापत्तौ प्रदर्शनायेत्यनुपपन्नं स्यात् । ज्ञप्तेः प्रदर्शनायोगादित्यत आह– **ज्ञानशब्देनेति ॥** 'ल्युट् च', 'करणाधिकरणयोश्चे'ति सूत्राभ्यां भावकरणाधिकरणेष्वेव ल्युडनुशासनेन ज्ञायत इति कर्मव्युत्पत्त्यनुपपत्तेराह– **लक्ष्यत इति ॥** कृत्यल्युटो बहुलमिति बाहुलकाश्रयणेन कर्मणि ल्युडङ्गीकारे तु तत एव धर्मस्यापि लाभसम्भवाद्धर्मपदवैयर्थ्यं स्यादिति भावः । असज्जनस्य ब्रह्मादिकृपाविषयत्वाभावादाह–

**सज्जनो विवक्षित इति ॥** धर्मज्ञानलोकेति द्वन्द्वः ततो नष्टशब्देन कर्मधारय इति भ्रान्तिं निराह– **नष्टे इति ॥**

## प्रमेयदीपिका

यद्यपि 'स्पृहिगृहि' (पा.सू.३.२.१५८) इत्यादिना कृपेरालुचूप्रत्ययो न विहितः । तथाऽपि व्याकरणान्तरबलादवगन्तव्यः ॥ कलशवाची वा आलुशब्दः । कृपापूर्णकलशै-रित्यर्थः ॥ मोक्षसाधनयोः धर्मज्ञानयोरदर्शनात् संसारे क्लिश्यमानान् सज्जनानवलोक्योत्पन्न-कृपैरिति यावत् । अन्यपदार्थानां देवानां 'ब्रह्मरुद्रेन्द्रादिभिः' इति यद्विशेषणं तत् प्रसिद्ध-प्रभावानामपि भगवदितरेषामशक्यमिदं कार्यमिति ज्ञापनार्थम् । ज्ञानपदेन धर्मोऽप्युपलक्ष्यते । समकक्षत्वनिरासाय स्वशब्देनाग्रहणम् । एतच्च पूर्वेणोत्तरेण च सम्बद्ध्यते । ज्ञानप्रदर्शना-यार्थितो ज्ञानप्रदर्शनायावततार इति ॥ भगवान् समग्रज्ञानैश्वर्यवैराग्यादिगुणसम्पन्नो नारायणः व्यासरूपेण अवततार इत्यर्थः ॥

## भावबोधः

**कलशवाचीति ॥** 'गर्गर्यालुर्गलन्तिका' इत्यभिधानादित्यर्थः । **अन्यपदार्थानां देवाना-मिति ॥** ब्रह्मरुद्रेन्द्रा आदयो येषामित्यत्रान्यपदार्थभूता देवा एव । 'सङ्कीर्णबुद्धयो देवाः' इत्यादिवचनात् । ततश्च लाघवात् कृपालुभिर्देवैरिति वक्तव्ये ब्रह्मरुद्रेन्द्रादिभिरिति **यद्विशेषणं** विशि(शे)ष्य कथनमित्यर्थः । यद्वा विशेष्यरूपान्यपदार्थभूतदेवानां यद्ब्रह्मरुद्रादित्वरूप-विशेषणमित्यर्थः ।

## भावदीपः

**स्पृहीति ॥** 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्'(पा.सू.३.२.१५८) इति सूत्रेण 'क्लृपू सामर्थ्ये' (पा.धा.७६२) इति धातोरित्यर्थः ॥ **व्याकरणान्तरादिति ॥**

'इन्द्रश्चन्द्रः काशकृत्स्नोऽपिशलिः शाकटायनः ।
पाणिन्यमरजैनेन्द्रा एतेऽष्टावादिशाब्दिकाः'

इत्युक्तेर्व्याकरणानामनेकत्वादिति भावः । महाव्याकरणादिति वा अर्थः। यद्वा, व्याकरणं व्याख्यानम् । व्याख्यानविशेषादित्यर्थः ।। 'स्पृहि' इत्यादि सूत्रे आलुच्प्रत्ययविधानेनापि 'स्पृहयालुः' इत्यादिरूपसिद्धेरालुज्विधानं शयालुरित्यादिरूपसिद्ध्यर्थम्' इत्यभियुक्तव्याख्यानात् कृपेरालुच्। 'कृत्सञ्ज्ञापूर्वको विधिरनित्यः' इति गुणाभावे बहुलग्रहणात् कृपेरालुचि 'कृपो रो लः' (पा.सू.८.२.१८) इति लत्वभावे च कृपालुरिति रूपसिद्धेरिति भावः ।। **कलशवाची वेति** ।। 'कर्कर्यालुर्गलन्तिका' (अमर.२.१६५) इत्यमरोक्तेरिति भावः ।। **ब्रह्मरुद्रादिभिरिति** ।। बहुव्रीहिपदस्य विशेष्यवाचिपदाप्रतीतेः **'देवैः'** इति पदमन्यपदार्थप्रधान-बहुव्रीहेः विशेष्यपदमिति दर्शयन् 'देवैः' इत्येव वाच्ये तद्विशेषणतया विशिष्य **'ब्रह्मरुद्रादिभिः'** इत्युक्तेः कृत्यमाह– **अन्यपदार्थेति** ।। **ज्ञानपदेनेति** ।। परापरतत्त्वलक्षकज्ञानपदेनेत्यर्थः ।। कुतो 'ज्ञानधर्म' इति नोक्तम्? इत्यत आह– **समेति** ।। **परापरतत्त्वस्य धर्मस्य चेति योज्यम्** ।। **स्वशब्देन** वाचकशब्देन धर्मस्येत्यर्थः ।। **समग्रेति** ।।

'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' (वि.पु.६.५.७४) इत्युक्तेरिति भावः ।।

विशेष्यानुक्तेर्व्यास एव रूपान्तरेणावततारेति प्रतीतेश्चाऽह– **नारायण इति** ।।

## भावदीपिका

**स्पृहिगृहीत्यादिनेति** ।। 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' । एभ्य आलुच्प्रत्ययः स्यात् । स्पृहयालु, गृहयालु, पतयालु, दयालु, निद्रालु, तन्द्रालु, श्रद्धालु– **इत्युदाहरणानि** ।। **व्याकरणान्तरबलादिति** ।। पाणिनीयव्याकरणभिन्नचन्द्रादिकृत-व्याकरणान्तरबलादित्यर्थः । व्याकरणान्तरे 'हरे कृपालो नः पाहि' इति प्रयोगबलात् कृपेरालुच्प्रत्ययो विहितोऽस्तीति भावः । इदमुपलक्षणम् । स्पृहिगृहीत्यत्रैव लुश्विधानमात्रेणैव स्पृहयालुरित्यादिरूपनिष्पत्तिसम्भवे आलुचो विधानमनर्थकमित्याशङ्क्य महाभाष्ये लुशम-विधायाऽलुच्करणमन्यत्रापि यथा स्यात् । तेन कृपालुरिति सिद्ध्येदित्युक्तत्वान्न दोष इत्यपि द्रष्टव्यम् । अत एवास्वरसादाह– **कलशेति** ।। 'गर्गर्यालुर्गलन्तिका' इत्यभिधानादित्यर्थः ।। **अन्यपदार्थानामिति** ।। ब्रह्मरुद्रेन्द्रा आदयो येषामित्यत्र येषामित्यन्यपदार्थतया देवा एवावश्यं

वाच्याः । 'सङ्कीर्णबुद्धयो देवा' इत्यन्यत्रोक्तेः । अतः कृपालुभिर्देवैरर्थित इत्येव लाघवाय वक्तव्ये ब्रह्मरुद्रेन्द्रादिभिरिति यद् विशेषणं विशिष्य कथनमित्यर्थः ।

यद्वा, विशेष्यभूतान्यपदार्थानां देवानां यद् ब्रह्मरुद्रेन्द्रादित्वं विशेषणं व्यावर्तकधर्म-कथनमित्यर्थः ॥ **प्रसिद्धप्रभावानामपीति** ॥ वेदप्रसिद्धजगत्कर्तृत्वसंहर्तृत्ववर्षणादिप्रभाव-वतामित्यर्थः । **इदं कार्यं** ज्ञानप्रदर्शनरूपम् । नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्माद्यैः प्रार्थिते सति ज्ञानप्रदर्शनायावततारेत्युक्त्या धर्मप्रदर्शने शक्तिर्नास्तीति शङ्का स्यादत आह– **ज्ञानपदेनेति** ॥ ननु धर्मज्ञानप्रदर्शनायेत्येव कस्मान्नोक्तमित्यत आह– **समेति** ॥ मोक्षे जननीये धर्मज्ञानयोरु-भयोरिति शेषः । वस्तुतो धर्मापेक्षया ज्ञानस्य मोक्षजननेऽधिकसाधनत्वात् ज्ञानप्रदर्शनायेत्ये-वोक्तमिति भावः ॥ **स्वशब्देनेति** ॥ स्ववाचकधर्मशब्देनेत्यर्थः । वक्त्रानुकूल्यमुपपादयितुं भगवच्छब्दं व्याचष्टे– **भगवानिति** ॥ 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्य-योश्चैव षण्णां भग इतीरणा' इति वचनादित्यर्थः ।

## वाक्यार्थप्रदीपः

ननु च कृपालुभिरिति कथम् । न च कृपेरालुचि कृपालुशब्दनिष्पत्तिरिति वाच्यम् । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुजिति स्पहादिभ्य एवालुच्प्रत्ययविधानेन कृपेश्च स्पृहादिष्वपाठेनालुच्प्रत्ययानुपपत्तिरिति शङ्कते– **यद्यपीति** ॥ उदाहृतव्याकरणेन तदसिद्धावपि चन्द्रादिव्याकरणान्तरात्तत्सिद्धिरप्रत्यूहेति समाधत्ते– **तथापीति** ॥ यद्वा व्याकरणस्य स्पृहि-गृहीत्यादिरूपस्य यदान्तरं लुश्विधिनैव स्पृहयालुरित्यादिरूपसिद्धावपि यदालुच्करणं विधान-रूपं तस्मादित्यर्थः । मुखतः उदाहृतव्याकरणस्योक्तार्थसाधकत्वाभावेऽपि आलुच्विधाना-न्यथानुपपत्तिबलेनोक्तार्थगमकत्वान्नोक्तानुपपत्तिरिति भावः । ननु आलुज्विधौ अयामाना-ल्वाय्येन्विष्णुषु इति सूत्रेण णेरयादेशात्तत्सिद्धावपि लुश्विधौ कथं स्पृहयालुरिति रूपसिद्धि-रिति चेत्– शृणु । स्पृहेर्लशि तस्य शित्वेन तिङ्शित्सार्वधातुकमिति सार्वधातुकतया 'कर्तरि शप्' इति शपि सार्वधातुकार्धधातुकयोरिति गुणेऽयादेशे अतो दीर्घो यञीति दीर्घतायां च सत्यां स्पृहयालुरिति रूपसिद्धेरप्रत्यूहत्वात् । सत्यप्येवं लुशविधानमात्रेणापि विवक्षितसिद्धौ आलुच्करणमन्यत्रापि यथा स्यादित्यस्यार्थस्य ज्ञापकम् । तथा च तद्बलात् कृपेरालुचि कृपालुशब्दनिष्पत्तिरपि युक्तैव ॥

ननु च लुश्विधौ न विवक्षितसिद्धिः ॥ लुश् विधौ लकारस्येत्संज्ञाप्रसङ्गात् । स्पृहयालुरिति दीर्घानुपपत्तिश्च । तिङ् इत्यनुवृत्त्या तिङि यञि परत एव अतो दीर्घो यञि इत्यनेन दीर्घत्वविधानात् । श्रद्धालुश्च न सिद्ध्येत् । श्रत्पूर्वाद्धाधातोर्लुशि शपि तस्य जुहोत्यादित्वात् श्लुभावे 'श्लौ'इति द्विर्भावे 'ह्रस्वः' इति ह्रस्वत्वे चर्त्वे च 'श्नाभ्यस्तयोरातः' इति आलोपे च श्रद्धालू इति प्रसङ्गात् । अतो लुश्विधौ स्पृहयालुरित्यादि विवक्षितरूपासिद्धिप्रसङ्गतया तत्सिद्ध्यर्थमेव आलुच्करणसार्थक्यात् न तदन्यथानुपपत्त्या अन्यत्रापि आलुच्प्रत्ययविधायकत्वमस्येति चेत् । उच्यते । लुश्विधावपि यादित्वादित्संज्ञाभावोपपत्तेः । यकारश्च लुप्तनिर्दिष्टः क्रियते । प्रयोजनाभावाद्वेत्संज्ञाभावः । नह्यत्र लित्स्वरप्रत्ययस्वरयोर्विशेषोऽस्ति । उभयत्र एकादेश उदात्तेन उदात्त इत्युदात्तत्वस्य भावात् । नापि स्पृहयालुरिति दीर्घानुपपत्तिरिति द्वितीयो दोषः । अतो दीर्घो यञीत्यत्र 'तुरुशम्यमः सार्वधातुके' इत्यतः सार्वधातुकग्रहणस्यैवानुवृत्त्या तिङ्ग्रहणाननुवृत्तेः । नाप्यन्त्यो दोषः । अनेकार्थत्वात् धातूनाम् अत्र विषये दधात्यर्थे वर्तमानस्य धेटो भविष्यति । न च शिदाश्रयोऽशितीत्यात्वप्रतिषेधात् तदनुपपत्तिः । एवं तर्हि, श्रद्धा आश्रद्धेत्याकारप्रश्लेषादात्वं भविष्यति । अथवा दधातेरेव संज्ञापूर्वको विधिरनित्य इति द्विर्वचनं प्रवर्तिष्यते । ततश्च लुश्विधिनैवोपपत्तावपि ज्ञापनार्थमालुच् विधीयते । एतत् ज्ञापयति । यत्रालुचैव रूपसिद्धिः ततोप्ययं भविष्यतीति कृपेरप्यलुच्प्रत्यय इति । यद्यपि च संज्ञापूर्वको विधिरनित्य इत्येतत् भाष्ये नोक्तम् । तथाऽपि प्रयोगबाहुल्यादुक्तमिति ध्येयम् । अस्मिन्पक्षे प्रतिपत्तिगौरवं भवतीत्यतो नायमालुच्प्रत्ययः, अपितु आलुशब्द इत्याह– **कलशवाची वेति** ॥ ञ्रो रश्च ल (उ.११५)इति सूत्रे ञ्रोरिति छित्वा ऋधातोरपि प्रश्लेषात् ऋ गतावित्यतः तेन सूत्रेण उणि अचो ञ्णिति इति वृद्धौ रपरत्वे रस्य लत्वे च आलुरिति रूपनिष्पत्तिः । पूर्णत्वस्य वृत्तावन्तर्भावात् तदप्रयोगो न दोषायेति मन्तव्यम् ॥

## भावरत्नकोशः

**स्पृहिगृहीत्यादिनेति** ॥ 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' इति सूत्रेण 'आलुचि शीङ् ग्रहणम्' इति वार्तिकेन वेत्यर्थः । कृपेः, कृपू सामर्थ्ये इति धातोः । **व्याकरणान्तरात्** महाव्याकरणात् । चान्द्रादिव्याकरणात् वा ॥

ननु व्याकरणान्तरं नेदानीं व्यवहारोपयोगि । कलौ पाराशरस्मृतेरिव मुनित्रयव्याकरणस्यैव ग्राह्यतया यङ्लुक्प्रकरणे मनोरमादौ स्थापितत्वादित्यतः पक्षान्तरमाह– **कलशेति ।** 'गर्गर्यालु-र्गलन्तिका' इत्यमरोक्तेरिति भावः । यद्यपि 'अलिञ्जरः स्यान्मणिकः गर्गर्यालुर्गलन्तिका । पिठरः स्थाल्युखाकुण्डः कलशस्तु त्रिषु द्वयोः । घटः कुटनिपौ' इत्यमरः कलशशब्दमालु-शब्दार्थादर्थान्तरवाचिनमभ्यधत्त । तथा च व्याख्यातारोऽर्थभेदमवदन् । तथाऽप्यालुशब्दो भाण्डविशेषार्थक एव । इह प्रत्यायनाय तु कलशतात्पर्यको व्याख्यातः । उपलक्षणमेतत् । 'स्पृहिगृहि' इति सूत्रमहाभाष्ये 'लुजेवोच्यते । का रूपसिद्धिः स्पृहयालुः । शपि कृते 'अतो दीर्घो यञि' इति दीर्घो भविष्यति । एवं तर्ह्यपि यदालुचं शास्ति तज्ज्ञापयत्याचार्योऽ-न्येभ्योऽप्ययं भवति' इति ग्रन्थेन 'आलुचि शीङ्ग्रहणं कर्तव्यम्' इति वार्तिकं प्रतिक्षिप्तम् । यदि लुजेवोच्येत तर्हि श्रद्धालुरिति रूपं न स्यात् । द्विर्भावलकारयोः प्राप्त्या श्रद्धध्लुरित्य-निष्टरूपमापद्येतेत्यादि चोद्यं कैयटादौ समाहितमित्यन्यदेतत् । तत्र सूत्रे आलुजित्यत्राऽकारो-च्चारणसामर्थ्यादन्यस्मादपि धातोरालुज्भवतीत्युक्त्या कृपेरालुचि 'सञ्ज्ञापूर्वको विधिरनित्यः' इति गुणाभावे बाहुलकात् 'कृपो रो लः' इति लत्वभावे च कृपालुभिरिति रूपं साध्विति द्रष्टव्यम् ॥

केचित्तु, व्याकरणान्तरादवगन्तव्य इति वाक्यं 'क्रप कृपायां गतौ' इति धातोः क्रपेः 'सम्प्रसारणम्' इति सूत्रात् सम्प्रसारणेऽङि च कृपाशब्दनिष्पत्तौ तदुपपदात् ला आदाने इति धातोः 'मितद्र्वादिभ्य उपसङ्ख्यानम्' इति डुप्रत्यये कृपां लाति आदत्त इति कृपालुशब्दो व्याख्यानान्तरात् साधुरवगन्तव्यः । अत एव 'स्युर्दयालुः कारुणिकः कृपालुः सुरतः समाः' इत्यमरोक्तरीत्या व्याख्यातः इत्याचक्षते ॥

ननु सज्जनेषु ब्रह्मादीनां कृपैव नोत्पत्तुमर्हति । परक्लेशप्रहाणेच्छारूपायास्तस्या उत्पत्तौ निमित्ताभावात् । न च परेषु क्लेशदर्शनमेव निमित्तम् । तत्र क्लेशे हेत्वभावात् । नच सांसारिक-त्वमेव हेतुरिति वाच्यम् । आकस्मिकसंसारस्यैवायोगादित्यतो नष्टधर्मेत्यादिविशेषण-तात्पर्यमाह– **मोक्षेति ॥** अवलोक्येत्यनन्तरं स्थितैरत एवोत्पन्नकृपैरिति योज्यम् । तेन ल्यबुपपत्तिः । अन्यपदार्थानां ब्रह्मरुद्रेन्द्रा आदयो येषामित्यत्र यच्छब्दार्थानाम् । 'सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः' इत्यत्र देवानामेव विशेष्यतयोपादानाद् देवानामित्युक्तम् । प्रसिद्ध-

प्रभावानां लोकविख्यातसामर्थ्यानाम् । 'कृत्यानां कर्तरि वा' इति षष्ठी । धर्मज्ञानयोरुभयोरपि प्रस्तुतत्वादाह **धर्मोऽप्युपलक्ष्यत इति** ।। न केवलं ज्ञानपदेन परापरतत्त्वे उपलक्ष्येते । अपि तु निवृत्तधर्मोऽपि लक्षणया गृह्यत इत्यर्थः । लक्षणायां प्रयोजनमाह– **समकक्ष्यत्वेति** ।। 'कर्मणा ज्ञानमातनोति', 'ज्ञानेनामृतीभवति', 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इत्यादि श्रुतिस्मृतिभिर्धर्मस्य ज्ञानसाधनत्वावगमेन ज्ञानसमानतया स्वर्गे दर्शपूर्णमासयोरिव मोक्षे साधनत्वायोगादिति भावः ।।

**स्वशब्देनेति** ।। निवृत्तधर्मवाचकधर्मशब्देनेत्यर्थः । सम्बद्ध्यत इत्युक्तविवरणम् **ज्ञान-प्रदर्शनायेति** । भगवानिति भाष्यपदं योगरूढम् । योगरूढं च पङ्कजादिपदमवयवशक्त्या पङ्कजनिकर्तृत्वं समुदायशक्त्या पद्मत्वं चोपस्थापयतीति सुप्रसिद्धम् । एवमेव भगवानिति पदमिति तदनूद्य यौगिकमर्थं वदन्नेव रूढार्थमाह– **भगवान् समग्रज्ञानैश्वर्यवैराग्यादिगुण-सम्पन्नो नारायण इति** ।।

'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा'

इति छान्दोग्यभाष्योपात्तप्रमाणानुसारेणैश्वर्यस्याऽदौ वक्तव्यत्वेऽपि ज्ञानस्याऽदौ ग्रहणं ज्ञानोपदेशानुकूलाप्तत्वस्य विवक्षितार्थतत्त्वज्ञानकरणपाटवाविप्रलिप्सारूपस्य ज्ञानप्रधानत्वात् तत्राऽस्यन्तर्गतज्ञानप्रदर्शनाय । करणपाटवज्ञापनायैश्वर्यग्रहणम् । अविप्रलिप्साद्योतनार्थं वैराग्य-ग्रहणमिति ज्ञातव्यम् । 'व्यासोऽवततार' इत्युक्त्या व्यासस्य रूपान्तरेणावतारः प्रतीयेतापि तद्व्युदासाय व्यासरूपेणेत्युक्तम् । केचित्तु भगवानित्यस्य विशेष्यपदं व्यास इति प्रतीतिं निरसितुमेवमुक्तमित्याहुः । यथोक्तम् 'भगवान् नारायणो व्यासत्वेनावततार' इति ।।

## भावप्रकाशः

**स्पृहिगृहीत्यादिनेति** ।। स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुजिति सूत्रेणेत्यर्थः । ननु न व्याकरणान्तरमिदानीमग्राह्यम् । मनोरमायां यङ्लुक्प्रकरणे, कलौ पाराशरस्मृतिवत् मुनित्रयव्याकरणस्येदानीमग्राह्यतया सिद्धान्तितत्वादित्यरुचेराह– **कलश इति** ।। मृद्भाण्ड-विशेषेत्यर्थः । कर्कर्यालुर्गलन्तिकेत्यमरोक्तेरिति भावः । ननु लोकस्य दुःखाभावात् निरुपाधि-

परदुःखप्रहाणेच्छारूपा कृपा लोके ब्रह्मादेरयुक्ता । अस्तु वा दुःखं, तथापि तस्य स्वाभाविकत्वे काकीयकार्ष्ण्योच्छेदेच्छावत्तदुच्छेदेच्छानुपपत्तिः । आगन्तुकत्वे वा स्वरूपसतस्तस्याहेतुत्वात् कृपोत्पत्त्ययोग एवेत्यत आह– **मोक्षसाधनयोरिति** ॥

ननु ब्रह्मरुद्रेन्द्रादिभिरित्यत्र देवा अन्यपदार्थाः सङ्कीर्णबुद्धयो देवा इत्युक्तेः । ततश्च देवैरित्येवोच्यतां किमुक्तविशेषणेनेत्यत आह– **अन्यपदार्थानामिति** ॥ धर्मज्ञानेति पूर्व-वाक्यानुसारादाह– **धर्मोप्युपलक्ष्यत इति** ॥ भगवच्छब्दस्य पूज्यार्थत्वेन व्यासस्य परमाप्तत्व-लाभ इत्यत आह– **भगवानिति** ॥ आप्त्यन्तर्गततत्त्वज्ञानप्रदर्शनाय समग्रज्ञानेत्युक्तम् । पटुकरणत्वं द्योतयितुमैश्वर्येति । अविप्रलिप्सां सूचयति– **वैराग्येति** ॥

भाष्यम्– ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद् वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सर्ववेदार्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च सर्वप्राणिनाम् अवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूप-परां परोक्षार्थां महाभारतसंहिताम् अचीक्लपत् ॥

## भावप्रदीपिका

ततश्च भारतसंहितामचीक्लपत् इति भारतस्याप्तिमूलत्वमुच्यते । संसारे क्लिश्यमानानां मोक्षो भवेत् इत्यनेनैवोपादेयत्वमुच्यते । संसारे क्लेशे कारणमाह– **इष्टेति** । वेदादेवेष्टा-निष्टप्राप्तिपरिहारावगतिसम्भवात् किं भारतनिर्माणेन ? इत्यत उक्तम्– **वेदार्थेति** । मोक्षार्थत्वे भारतस्य धर्मनिरूपकत्वं कुतः ? इत्यत उक्तम्– **धर्मेति** । धर्माज्ज्ञानं ज्ञानद्वारा मोक्ष इत्यर्थः । नित्यमुक्तः किमर्थं भारतं चकार ? इत्यत आह– **कृपालुरिति** ॥ एवमाप्तिमूलत्वं भारतस्यो-क्त्वा श्रुतिमूलत्वमाह– **सर्वेति** । नैतावता वेदसमं भारतमित्याह– **वेदानुक्तेति** । वेदानुक्तार्थत्वे निर्मूलत्वं स्यादित्यत आह– **केवलेश्वरेति** ॥ अर्थदुर्गमत्वादप्रयोजकं भारतमित्यत आह– **सर्वेति** ॥ भारतार्थस्य सर्वैः पठ्यमानत्वात् कथमनवगाह्यता ? इत्यत आह– **केवलेति** । भगवत्स्वरूपपरताऽनवगाह्यतेत्यर्थः । भगवत्स्वरूपपरत्वे कुतस्तथा न दृश्यते? इत्यत आह– **परोक्षेति** ॥

## भावप्रकाशिका

ननु तस्याप्तत्वं तद्वाक्यात्? वेदाद्वा? नाद्यः । जीवादेरपि तत्तद्वाक्यात् आप्तत्वापत्तेः । न द्वितीयः । वेदादेव श्रेयःसाधनावगतौ भारतवैयर्थ्यात् । न च वेदानुक्तोक्त्या तत् सप्रयोजनम् । निर्मूलत्वेनाप्रामाण्यापत्तेः । नित्यमुक्तश्चासौ सर्वेशः किमर्थं शास्त्रमारभते ? धर्मादिप्रयोजनाभावात् तस्येत्याशङ्क्याह– **ततश्चेत्यादिना ॥**

अयं भावः, न तावत् तद्वाक्यात् तस्याप्तत्वेऽतिप्रसङ्गः । न हि जिनादिनोक्तेनापीष्टानिष्टप्राप्तिपरिहारसाधनं दृश्यते इति वाच्यम् । मतभेदाद्येनाप्तत्वमापाद्यते । भगवतस्तु .................. 'इतिहासपुराणः पञ्चमो वेदानां वेदः' इति वेदत्वेन श्रूयते । इतिहासपुराणात्मकसर्ववाक्यादाप्तत्वावगमात् । न चैवं वेदाच्छ्रेयस्साधनावगतौ भारतवैयर्थ्यम् । नहि इतिहासपुराणाभ्यां विना वेदार्थो दृश्यते तदधिकारिभिरपि । किमुत तदनधिकारिभिः स्त्रीशूद्रादिभिः ? अतः स्वयं सदाऽऽप्तकामत्वेन प्रत्युपकारधर्मादिप्रयोजनानपेक्षोऽपि भगवानाप्ततमस्तेषां सतां निष्कामधर्मसाध्यज्ञानद्वारा मोक्षो भवेदिति कृपयैव महाभारतसंहितामचीक्लृपत् ।

एवमाप्तोक्तत्वात् प्रमाणतमं भारतम् । श्रुतिमूलत्वेनापि तत्प्रमाणतममिति भावेनाह– **सर्ववेदाद्यर्थोपबृंहितामिति ॥** आदिशब्देन पुराणानि । तदुक्तं मात्स्ये

'अष्टादशपुराणानि स्मृत्वा सत्यवतीसुतः ॥
भारताख्यानमखिलं चक्रे तदुपबृंहितम् ।
लक्षेणैकेन तत्प्रोक्तं वेदार्थपरिबृंहितम्' इति ॥

न चैतदन्येन कर्तुं शक्यमिति भावेनाह– **तदनुक्तकेवलेश्वरज्ञानदृष्टमिति ॥** न चैतावताऽस्य निर्मूलत्वेनाप्रामाण्यमापाद्यम् । 'यतो वाचो निवर्तन्ते' इति वेदानुक्तार्थस्यापि सूचनात्। तत्कर्तुर्भगवतः सर्वज्ञत्वादिश्रुतेः, स्वकृतग्रन्थस्य वेदत्वश्रुतेश्च । इतरेषां तत्त्वपरिज्ञानमेव दुर्लभं किमु तत्करणम् ? इति भावेनाह– **सर्वप्राणिनामिति ॥** 'ब्रह्माऽपि तन्न जानाति' इत्यादेः । ननु भारतकथायाः सर्वैरपि कथ्यमानत्वात् कथमनवगाह्यता ? इत्यत आह– केवलेति ॥ न हि भारतेऽन्येषां केवलभगवत्स्वरूपपरता प्रतीयते । भगवत्स्वातन्त्र्यादि-

सकलगुणपूर्णस्वरूपप्रतिपत्तये ह्यन्यदुच्यते । एवमास्तीकाद्यर्थत्वेऽप्यनवगाह्यता भारतस्य, किमुत मन्वाद्यर्थत्वे ? इति भावेनाह– **परोक्षेति** ॥ तदुक्तम्–

'भारतार्थस्त्रिधा प्रोक्तः स्वयं भगवतैव हि ॥

मन्वादि केचित् ब्रुवते' इत्यारभ्य, 'एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते' इत्यादि ॥

## प्रमेयदीपिका

ततः किं प्रकृते? इत्यत आह– **ततश्चेति** ॥ तस्माद् धर्मज्ञानप्रदर्शनार्थम् अवतीर्णत्वादेव । अवतारानन्तरमेव वा । विजातीयव्यापाराख्य व्यवधानमन्तरेणेति यावत् ।

धर्मज्ञानप्रदर्शनाय **महाभारतसंहितां** महाभारताख्यं शास्त्रम् **अचीक्लपत्** समर्थितवान् । 'व्यासः' इति सम्बन्धः । धर्मादिज्ञानमपुरुषार्थं कथं शास्त्रप्रयोजनमभिप्रेतवान्? इत्यत उक्तम्– **धर्मज्ञानलक्षणया द्वारा सज्जनानां मोक्षो भवेद् इत्यभिप्रायेणेति** । अत्र ज्ञानशब्दो मुख्यार्थ एव ॥

एतद्ग्रन्थनिर्माणे भगवतः किं प्रयोजनम्? इत्यत उक्तम्– **कृपालुरिति** ॥ संसारे स्वाभाविके मोक्षार्थं प्रयत्नः काकीयकार्ष्ण्यापनयनार्थप्रयत्नतुल्य इत्यत उक्तम्– **इष्टानिष्टप्राप्तिपरिहार-साधनादर्शनात् संसारे क्लिश्यमानानामिति** ॥ मोक्षस्य पुरुषार्थतासमर्थनार्थं वादिविप्रतिपत्तेः तत्स्वरूपनिर्धारणार्थं च **इष्ट** इत्याद्युक्तम् । 'आत्यन्तिक' इति चोपस्कर्तव्यम् ।

साधनं च धर्मज्ञानस्वरूपम् ॥ ननु वेदानामुद्धृतत्वात् तत एव धर्मादिप्रतिपत्तिसम्भवात् किं भारतनिर्माणेन? इत्यत उक्तम्– **सर्ववेदार्थेति** ॥ अनेन वेदाधिकारिणां त्रैवर्णिकानां पुंसां वेदार्थज्ञानोपायो भारतमिति सूचयति ॥

किञ्च वेदानधिकारिणां वेदतुल्यत्वाच्च तन्निर्माणं युक्तमित्याशयवानाह– **वेदेति** ॥ तदनेन परमाप्तिमूलत्वान्महाभारतस्य प्रामाण्यम् । धर्मः परमपरं च तत्वं विषयः । तज्ज्ञानं चावान्तर-प्रयोजनम् । मोक्षः परमम् । सज्जनाश्चाधिकारिण इत्युक्तं भवति । **'नष्टधर्म'** इत्यादिना बहुशो विषयप्रयोजनाभिधानेन तयोरनन्यलभ्यत्वं सूचितम्। यदभावात् सतां संसारक्लेशः, यदर्थं देवातानां प्रार्थनम्, यदर्थश्च भगवतोऽवतारस्तद्भारतनिर्माणेनैव पर्यवसितमिति ॥

## भावबोधः

**अवतीर्णत्वादेवेति ।** चशब्द एवार्थ इत्युक्तं भवति ॥ ननु महाभारततात्पर्यनिर्णये 'द्वैपायनस्सोऽथ जगाम मेरुम्' इत्यादिना वेदव्यासः मेरुं गत्वा तत्र वेदोद्धारसर्वशास्त्रब्रह्मसूत्र-करणानन्तरं 'चक्रे महाभारतनामधेयम्' इति भारतनिर्माणोक्तेः, कथमवतारानन्तरमेवेत्युक्त-मित्यतोऽभिप्रायमाह– **विजातीयेति ॥** वेदोद्धारादेर्ज्ञानसाधनव्यापारत्वेन विजातीयत्वा-भावादिति भावः । **धर्मज्ञानप्रदर्शनायेति ॥** अनेन ज्ञानप्रदर्शनायेत्येतदत्राप्यनुवर्तते इत्युक्तं भवति । **समर्थितवानिति ।** 'क्लृपू सामर्थ्ये' इति धातोरित्यर्थः । **धर्मज्ञानरूपमिति ॥** अत्र ज्ञानशब्दो ज्ञेयपरम् इत्यत्र ज्ञातव्यम् । **परमाप्तिमूलत्वादिति ॥** भगवान् व्यास इति वक्त्रानु-कूल्यस्य, ब्रह्मरुद्रेन्द्रादिभिरिति संसारे क्लिश्यमानानामिति च श्रोत्रानुकूल्यस्य, अर्थितो ज्ञान-प्रदर्शनायेति प्रसङ्गानुकूल्यस्य चोक्तेः परमाप्तिमूलत्वादित्यर्थः । पर्यवसितमित्यनन्यलभ्यत्वं सूचयतीत्यन्वयः ॥

## भावदीपः

'चशब्दोऽवधारणे' इत्युपेत्य 'ततश्च' इत्यस्य प्रतिपदं वदन्नेवार्थमाह– **तस्मादिति ॥ धर्मेति ॥** ज्ञानस्याप्युपलक्षणम् ॥ क्वचिद् धर्मज्ञानेत्यपि पाठः॥ आनन्तर्यार्थत्वमुपेत्याऽह– **अवतारेति ॥** 'नतु गुरुकुलवासादिना विद्यां सम्पाद्य' इत्येवकारार्थ इति भावेनाऽह– **विजातीयेति ॥**

एतेन– 'द्वैपायनः सोऽथ जगाम मेरुं चतुर्मुखाद्यैरनुगम्यमानः ।
उद्धृत्य वेदानखिलान् सुरेभ्यो ददौ मुनिभ्यश्च यथाऽऽदिसृष्टौ ॥
सर्वाणि शास्त्राणि तथैव कृत्वा विनिर्णयं ब्रह्मसूत्रं चकार ।
तच्छुश्रुवुर्ब्रह्मगिरीशमुख्या सुरा मुनीनां प्रवराश्च तस्मात् ॥
समस्तशास्त्रार्थनिदर्शनात्मकं चक्रे महाभारतनामधेयम् ॥
वेदोत्तमम् ...' (म.भा.ता.नि.१०.५७५९)

इति भारततात्पर्यनिर्णयदशमाध्यायविरोधो निरस्तः ॥ वेदोद्धारादेर्ज्ञानहेतुतया सजातीय-त्वादिति ॥ भारतकृतौ प्रयोजनं वदन्नेव 'ततश्च' इत्यस्यान्वयमाह– **धर्मज्ञानेति ॥ समर्थित-**

**वानिति** ।। 'क्लृपू सामर्थ्ये'(पा.धा.७६२) इति धातोरिति भावः । अकरोदिति यावत् । इतिशब्दः प्रकारार्थ इत्युपेत्य शेषोक्त्याऽन्वयमाह– **इत्यभिप्रायेणेति ।। मुख्यार्थ इति** ।। न लक्षणया परापरतत्त्वपर इत्यर्थः ।। बाधनिरासायाऽह– **आत्यन्तिकेति चोपस्कर्तव्यमिति** ।। 'प्राधान्येन' इत्यादिना पूर्वं कृतचोद्यस्य 'नष्टधर्मे' इत्यादिग्रन्थेन कथं परिहारः? इत्यत आह– **तदनेनेति ।।** 'नष्ट' इत्यादिना 'अचीक्लृपत्' इत्यन्तेनेत्यर्थः ।। 'वक्तृश्रोतृप्रसक्तीनां यदाप्ति-रनुकूलता' (अनु.व्या.१.१..)इत्यनुभाष्योक्तेः, अत्र च 'देवैर्ज्ञानार्थं प्रार्थितो हरिर्व्यासो भूत्वा भारतमकरोत्' इत्युक्त्या क्रमात् प्रसङ्गवक्तृश्रोतॄणामानुकूल्यरूपा आप्तिमूलता लब्धेति भावेनोक्तम्– **परमाप्तिमूलत्वाद् इति ।। धर्म इति** ।। भगवत्प्रीत्युद्देशेन क्रियमाणनिवृत्ति-लक्षणोऽग्निहोत्रादिरित्यर्थः ।। सूचितमित्येतद् व्यनक्ति– **यदभावादित्यादिना ।।** तद्भारत-निर्माणेनैव पर्यवसितं नान्येनेति हेतोः अनन्यलभ्यत्वं विषयप्रयोजनयोरित्यर्थः ।।

## भावरत्नकोशः

ततश्चेत्यस्य तथा सतीत्याद्यर्थप्रतीतौ प्रकृतानुपयोगात् समुच्चयालाभाच्च विवक्षितमर्थमाह– **यस्माद्धर्मज्ञानप्रदर्शनार्थमवतीर्णस्तस्मादेवेति ।।** चशब्द एवार्थ इत्युक्तं भवति । तस्माद्धर्म-ज्ञानप्रदर्शनार्थमवतीर्णत्वादेवेति क्वचित् पाठः । 'अथ' इति सूत्रभाष्यानुसारेण पक्षान्तरमाह– **अवतारेति ।।** तत इत्यस्याऽनन्तर्यार्थकत्वेऽपि योग्यतयाऽवतारस्य सम्बन्ध इति भावः ।।

ननु अवतारानन्तरमेवेत्ययुक्तम् । भारततात्पर्यनिर्णये 'द्वैपायनः सोऽथ जगाम मेरुम्' इत्यादिना मेरुगमनाखिलवेदोद्धारतद्दानसर्वशास्त्रकरणब्रह्मसूत्ररचनतदुपदेशादिकमभिधाय अनन्तरं 'समस्तशास्त्रार्थविनिर्णयात्मकं चक्रे महाभारतनामधेयम्' इति भारतनिर्माणाभिधानादित्यत-स्तात्पर्यमाह– **विजातीयेति ।।** यद्यप्यस्ति वेदोद्धारादि, तथापि तद्भारतार्थतत्त्वज्ञानोपयुक्तमेव । वेदादेर्भारतव्याख्येयत्वात् । व्याख्येयानुपस्थितौ व्याख्यानस्य प्रवृत्त्ययोगात् । एवमेव 'स लोकधर्माभिरिरक्षयापितुर्द्विजत्वमाप्य' इति पूर्वश्लोकोक्तद्विजत्वादिकमपि 'न ह्यस्मिन् विद्यते कर्म किञ्चिदामौञ्जिबन्धनात्' इति वचनात् परम्परया तत्त्वोपदेशप्रयोजकमेव । न चासौ न विधिबद्ध इति वाच्यम् । लोकधर्मरक्षार्थं स्वयमपि भगवान् विधिबद्ध इवाऽचरतीत्यभ्युपगमात् । अतोऽवतारतत्त्वोपदेशयोर्मध्ये विरोधिव्यापाराभावात् सर्वं तत्त्वज्ञानानुकूलमेवेति नावधारण-विरोध इति भावः ।।

संहिताशब्दस्य निरन्तरपठितवैदिकवर्णसमुदायविषये प्रसिद्धेरत्रापि तत्प्रतीतौ तन्निरासाय विवक्षितमर्थमाह– **शास्त्रमिति** ।। निर्माणे प्रयोजनाभिधानाय ज्ञानप्रदर्शनायेत्येतत् सतात्पर्यमनुवर्तितम् ।। 'कृपू सामर्थ्ये' इति धातुव्याख्यानादाह **समर्थितवानिति** । 'कृपो रो लः' इति लत्वमिति भावः । भाष्ये 'पञ्चमं वेदमुत्तमम्', 'भारतं स चकार ह' इत्यादिवचनानुसारेणाकरोदिति वक्तव्येऽपि निर्माणव्याख्यानरूपार्थद्वयलाभायाचीक्लपदित्युक्तमिति ।। **व्यासः** व्यासरूपेणावतीर्णो भगवान् ।। **कथमिति** ।। इष्टानिष्टप्राप्तिपरिहारयोरेव पुरुषैरर्थनीयत्वादिति भावः ।।

परापरतत्त्वलक्षणापक्षस्यानुपयोगादाह **अत्र ज्ञानेति** ।। भगवत इत्याप्तकामत्वमभिप्रैति । **स्वाभाविके** अनागन्तुके । अदर्शनात् **संसार इति** ।। इष्टप्राप्त्यनिष्टपरिहारसाधनादर्शननिबन्धन एव सांसारिकः क्लेशो न तु आगन्तुक इति परिहाराशयः ।। ननु मोक्षसाधनादर्शनादित्येव वक्तव्ये किमितीष्टेत्याद्युक्तमित्यतस्तत्कृत्यमाह– **मोक्षस्येति । समर्थनार्थमिति** ।। 'सुखमेव मे स्याद् दुःखं मनागपि मा भूत्' इति हि पुरुषा अर्थयन्त इति भावः ।। **वादीति** ।। केचिद् वादिन एकविंशतिदुःखध्वंस एव मोक्ष इत्याहुः । अन्ये तु दुःखप्रागभावपरिपालनमिति ।। अपरे तु निर्गुणब्रह्मभाव एव मोक्ष इति वर्णयन्ति । एवमन्येऽप्यन्यत् । तथा च एवंरूपेण नानावादिविप्रतिपत्तेः किंरूपो मोक्ष इति जिज्ञासायामिष्टानिष्टप्राप्तिपरिहाररूप इति निर्धारणार्थमित्यर्थः ।।

ननु सुखप्राप्तिसाधनं दुःखनिबर्हणसाधनं च पुरुषा बहुलमुपलभन्त एव, किं बहुना सुप्त्यवस्थामेव तथाविधां पश्यन्तीत्यत आह– **आत्यन्तिकेतीति** ।। नन्विष्टानिष्टप्राप्तिपरिहारसाधनादर्शनेन चेत् सांसारिकः क्लेशः, तर्हि तत्साधनमेवोपदेष्टव्यम् । न पुनर्धर्मज्ञाने इत्यत आह– **साधनं चेति** ।। **वेदानामुद्धृतत्वादिति** ।। 'उद्धृत्य वेदानखिलान् सुरेभ्यो ददौ मुनिभ्यश्च यथाऽऽदिसृष्टौ' इति वचनाद् भारतनिर्माणात् प्रागेव वेदोद्धार इति भावः । तत एव वेदेभ्य एव । अनेन वेदार्थाज्ञानात् संसारे क्लेश इत्यनेन ।।

ननु वेदार्थाज्ञानं वेदार्थज्ञानाभावः । अभावश्च प्रतियोगिसत्त्वापेक्षः । तच्च स्त्रीशूद्रादीनामप्रसक्तमेवेति कथं 'वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनाम्' इत्युक्तमित्यत उक्तं **वेदाधिकारिणां त्रैवर्णिकानामिति** ।। यदि भारतं त्रैवर्णिकानां वेदार्थज्ञानोपायो न स्यात्, तदा वेदार्थाज्ञानप्रयुक्तक्लेशनिवारणाय भारतनिर्माणमयुक्तं स्यादिति

भावः। चशब्दार्थः किञ्चेति । अनेन 'वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां पुंसाम्' इति त्रैवर्णिकविषयम् । 'वेदानधिकारिणाम्' इत्यादि तु स्त्रीशूद्रादिविषयमिति विभावितं भवति ॥

ननु 'ननु च प्राधान्येन व्याख्येयता प्रामाण्ये' इत्यादिना कृतचोद्यस्य कथमनेन परिहार इत्यत आह– **तदनेन इति ॥** नष्टधर्मेत्यादिना मोक्षो भवेदिति कृपालुर्व्यासो महाभारत-संहितामचीक्लृपदित्येतावता भाष्येणेत्यर्थः । 'परमाप्ति' इति वदन् वक्तुर्वेदव्यासस्य 'भगवान्' इति विवक्षितार्थतत्त्वज्ञानकरणपाटवविवक्षालक्षणानुकूल्यस्य श्रोतॄणां देवादीनां 'ब्रह्मरुद्रेन्द्रादि-भिः' इति तत्त्वज्ञानयोग्यतावक्तृप्रेमास्पदतारूपानुकूल्यस्य 'अर्थितो ज्ञानप्रदर्शनाय' इति श्रोतृप्रयोजनोद्देशरूपप्रसङ्गानुकूल्यस्य चाभिसंहितत्वात्, विमतं प्रमाणम्, आप्तवाक्यत्वात् सम्प्रतिपन्नवत् । न च असिद्धिः । विमतमाप्तवाक्यम् । अनुकूलेन वक्त्राऽनुकूलान् श्रोतॄन् प्रति तदीयहितसाधनबोधनायोपदिष्टत्वात् सम्प्रतिपन्नवदिति तत्साधनादिति भारतप्रामाण्यस्य साधन-प्रकारमभिप्रैति । यद्यप्याप्तिमूलतयैव वाक्यप्रामाण्यं वाच्यम् । तथाऽपि यदा आप्तिमात्रेणापि प्रामाण्यं तदा किमु वक्तव्यं परमाप्ताविति कैमुत्यसूचनाय परमेति विशेषणम् । यद्यपि च प्रमाण्यं स्वत एवेति भाष्यकारीयं मतम् । तथाऽप्यप्रामाण्यशङ्कानिरासार्थोऽयं प्रयत्न इत्यविरोधः । धर्मो निवृत्तिलक्षणः ॥

ननु विषयप्रयोजनयोरन्यतोऽपि वेदादेर्लाभसम्भवात् किं भारतनिर्माणनियमेनेति शङ्कां परिहर्तुमाह **नष्टधर्मेत्यादिनेति ॥** आदिपदेन 'ज्ञानप्रदर्शनाय धर्मज्ञानद्वारा' इति वाक्यं गृह्यते । तच्च विषयावान्तरप्रयोजनयोरिष्टानिष्टप्राप्तिपरिहारेति मोक्षो भवेदिति च महाप्रयोजनस्य चाभिधानेन विषयप्रयोजनयोर्वेदादिशास्त्रलक्षणान्यलभ्यत्वं निवारयतीत्यर्थः । तद् विशदयति **यदभावादिति ॥** धर्मज्ञानाभावादित्यर्थः । तत् धर्मो ज्ञानं च । पर्यवसितं सुपर्याप्तम् । **इति** हेतोरनन्यलभ्यत्वमिति सम्बन्धः ।

## भावदीपिका

चशब्द एवार्थ इत्याशयेनोक्तम्– **अवतीर्णत्वादेवेति ॥** ततश्चेत्यस्यार्थान्तरमाह– **अवतारानन्तरमेवेति ॥** ननु 'द्वैपायनः सोऽथ जगाम मेरुं चतुर्मुखाद्यैरनुगम्यमान' इति महाभारततात्पर्यनिर्णये मेरुगमनानन्तरं वेदोद्धारं कृत्वा पुराणादिसर्वशास्त्राणि विधाय

ब्रह्मसूत्राणि च कृत्वा पश्चात् 'चक्रे महाभारतनामधेयम्' इति भारतनिर्माणोक्तेः कथमवतारानन्तरमेव महाभारतसंहितामचीक्लृपदित्युच्यत इत्यत आह– **विजातीयेति** ॥ व्यापारस्य विजातीयत्वं नाम ज्ञानासाधनत्वम् । तथाच वेदोद्धारादेर्ज्ञानसाधनव्यापारत्वेन विजातीयत्वाभावादिति भावः । ज्ञानप्रदर्शनायेत्येतदत्राप्यनुवर्तत इति भावेनाऽह– **धर्मज्ञानेति** ॥ पूर्वं ज्ञानपदेन धर्मस्याप्युपलक्षितत्वाद् धर्मेत्युक्तम् । 'कृपू सामर्थ्ये' इति धातुव्याख्यानात् समर्थितवानित्युक्तम् । 'क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदश्यर्ते । प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातव' इति वचनात् अचीक्लृपदित्यस्य कृतवानिति तात्पर्यार्थः । धर्मादीत्यत्राऽदिपदेन परापरतत्त्वग्रहणम् ॥

**अपुरुषार्थमिति** ॥ सुखावाप्तितत्साधनदुखहान्यन्यतरत्वाभावादिति भावः ॥ **द्वारेति** ॥ तथाच सुखप्राप्तिसाधनत्वात् पुरुषार्थत्वं युक्तमित्यवधेयम् । पूर्वं ज्ञानशब्दस्य ज्ञेयपरतया व्याख्यातत्वादत्रापि तत्परत्वशङ्कां वारयति– **अत्रेति** ॥ **मुख्यार्थ एव** विषयिपर एव न ज्ञेयपर इत्यर्थः ॥ **कृपालुरितीति** ॥ निरुपाधिपरदुखप्रहाणेच्छा कृपा, तद्वानित्यर्थः । मोक्षस्वरूपनिर्णयेनापि किं प्रयोजनमित्यत उक्तम्– **वादिविप्रतिपत्तेरिति** ॥ स्वर्गादीष्टाहिकण्टकाद्यनिष्टप्राप्तिपरिहारसाधनदर्शनमेवास्तीत्यत आह– **आत्यन्तिकेति** ॥ आत्यन्तिकेष्टं मोक्षसुखमेव । आत्यन्तिकानिष्टनिवृत्तिर्लिङ्गभङ्ग एवेति ध्येयम् । **धर्मज्ञानरूपमिति** ॥ अत्र ज्ञानशब्दः ज्ञेयपरः । ज्ञानार्थत्वे तस्यादर्शनादित्येतदयुक्तं स्यात्, तस्य ज्ञातैकसत्त्वादिति भावः । **वेदतुल्यत्वाच्चेति** ॥ वेदस्थानीयत्वादित्यर्थः । नतु वेदसमत्वादित्यर्थः ॥

'समस्तशास्त्रार्थनिदर्शनात्मकं चक्रे महाभारतनामधेयम् ।
वेदोत्तमं तच्च विधातृशङ्करप्रधानकैस्तन्मुखतः सुरैः श्रुतम् ॥'

इति महाभारततात्पर्यनिर्णयविरोधादिति सम्प्रदायविदः ॥

नन्वेतावता प्रबन्धेन व्यासस्यावतरणे महाभारतकरणे च प्रयोजनमुक्तम् । प्रामाण्यादिसिद्धिस्तु कथमत आह– **तदनेनेति** ॥ **परमाप्तीति** ॥ वक्तृश्रोतृप्रसक्तीनामनुकूलता यत्र तत्राऽप्तिः तन्मूलत्वादित्यर्थः । तथाहि– महाभारतं प्रमाणं, आप्तवाक्यत्वात्, विमतमाप्तवाक्यमनुकूलेन वक्त्राऽनुकूलान् श्रोतॄन् प्रति तदीयहितसाधनबोधायोपदिष्टत्वात्, सम्प्रतिपन्नवदिति ।

तत्र भगवान् व्यास इति वक्त्रानुकूल्यमुक्तम् । प्रमादाज्ञानसंशयविपर्ययाणां व्यासेऽसम्भवाद्, भगवत्त्वादेव । अतो विवक्षितार्थतत्त्वज्ञानकरणपाटवसिद्धिः । विप्रलम्भस्य श्रोतृदोषनिबन्धनस्य तदभावेनाभावनिर्णयादविप्रलिप्सासिद्धिः । एतत् त्रयं वक्त्रानुकूल्यम् । 'ब्रह्मरुद्रेन्द्रादिभिः' 'संसारे क्लिश्यमानानाम्' इति श्रोत्रानुकूल्यमुक्तम् । वक्तृप्रेमास्पदत्वं तत्त्वज्ञानयोग्यत्वं च तत् । ब्रह्मादयो मोक्षयोग्याश्च सर्वे वक्तृप्रेमास्पदत्वेन तत्त्वज्ञानयोग्यत्वेन च प्रसिद्धाः । 'अर्थित' इति श्रोतुः प्रयोजनोद्देशरूपं प्रसङ्गानुकूल्यमुक्तम् । क्लेशनिर्हरणस्य प्रसक्तत्वेन प्रसङ्गदोषाभावादिति । आप्तेः परमत्वं च विवक्षितार्थतत्त्वज्ञानादेरनवधिकत्वादिना द्रष्टव्यम् ॥

नष्टधर्मेत्यादिनेत्यत्राऽदिपदेन ज्ञानप्रदर्शनाय धर्मज्ञानद्वारा मोक्षो भवेदित्येतयोः सङ्ग्रहः ॥ **पर्यवसितमिति** ॥ तयोर्विषयप्रयोजनयोरनन्यलभ्यत्वं महाभारतान्यग्रन्थालभ्यत्वं सूचितमित्यन्वयः ॥

## भावप्रकाशः

भगवान् व्यासोऽवततारेत्यत्र व्यासस्य रूपान्तरेणावतारकर्तृत्वप्रतीतिनिरासाय भगवानिति उद्धेश्यं व्यासोवततारेति विधेयमिति भावेन व्याचष्टे– **नारायण इत्यादिना** ॥ ननु ततश्चेत्यस्य तथासतीत्यर्थः तत्र तत्र दृष्टस्तद्ग्रहणे च व्यासावतारे सति भारतं चकारेति वाक्यार्थः स्यात् । नचासौ युक्तः । गोषु दुह्यमानासु गत इतिवद्भारतकरणस्य व्यासावतारसमानकालत्वप्राप्तौ भारततात्पर्यनिर्णयविरोधात् । तत्र 'द्वैपायनः सोऽथ जगाम मेरुमि'त्यादिना मेरुगमनवेदोद्धरणसर्वशास्त्रब्रह्मसूत्रकरणानन्तरं चक्रे महाभारतनामधेयमिति भातरनिर्माणोक्तेरित्याशङ्क्य ततःशब्दस्तच्छब्दप्रकृतिकः पूर्व परामर्शकश्चब्दश्चावधारणार्थ इति व्याख्याति– **तस्मादिति** ॥

यद्वा ननु शास्त्रे तत्र तत्र वक्तव्यं सर्वमुक्त्वोपसंहारार्थं ततश्चेत्युक्तिदर्शनात् प्रकृते च वक्तव्यस्यासमाप्तत्वात् कथं ततश्चेत्युक्तमित्यत आह– **तस्मादिति** ॥ बह्वर्थपरामर्शे प्रतिपत्तिगौरवमित्यरुच्या व्यासो भूत्वा चेति प्रमाणस्याद्यव्याख्यामनुसृत्य ततश्चेत्यस्यार्थान्तरमाह– **अवतारेति** ॥ अनेन तत इत्यानन्तर्यार्थो निपातश्चशब्दश्चावधारणार्थ इत्युक्तं भवति ॥

ननु भारततात्पर्यनिर्णये 'स लोकधर्माभिरक्षया पितुर्द्विजत्वमाप्ये'त्यादिना द्विजत्वप्राप्तिनिजज्ञानदानप्रत्यक्षत्ववरदानमेरुगमनवेदोद्धरणतदुपदेशसर्वशास्त्रब्रह्मसूत्रकरणतदुपदेशानन्तरं

चक्रे महाभारतनामधेयमिति भारतनिर्माणोक्तेः कथमवतारानन्तरमेवेत्युक्तमित्यत आह– **विजातीयेति ॥** सज्जनतत्त्वज्ञानाननुकूलव्यापरव्यवधानमकृत्वेत्यर्थः । अयं भावः । सज्जनतत्त्वज्ञानं हि व्याख्यानेन स्यात् । व्याख्याने उपनयनं प्रयोजकम् ।

'नह्यस्मिन्विद्यते कर्म किञ्चिदामौञ्जिबन्धनात् । नापि व्याहरयेद्ब्रह्मेति'

मनुस्मृतेः । न च भगवतो विधिबन्धाभाव इति वाच्यम् । लोकधर्मरिरक्षया तदवश्यम्भावात् । एवं मातापितृवरदानमपि तत्त्यागसम्पादकत्वात् प्रयोजकम् । अन्यथा मातापित्रोः सर्ववेदाद्यर्थज्ञानायोग्यत्वेन तत्सन्निधौ वेदादिव्याख्याने तयोरपि तत्प्राप्त्याऽनाविष्कुर्वन्नन्वयादित्यत्रोक्तस्यायोग्यानामनाविष्कारेण ज्ञानदानस्य सिद्धेः । एतेन मेरुगमनमपि व्याख्यातम् । एवं वेदोद्धारादिकमपि भारतार्थज्ञानप्रयोजकं वेदादेर्भारतव्याख्येयत्वात् । व्याख्येयोपस्थित्यभावे च व्याख्यानप्रवृत्त्ययोगात् । अतो द्विजत्वप्राप्त्यादिकं सर्वं भारतनिर्माणवत् साक्षात्परम्परया वा सज्जनतत्त्वज्ञानानुकूलमेवेति न तस्य विजातीयत्वमिति । एतेन सजातीयव्यापारव्यवधानं व्यर्थं धर्मादिप्रदर्शनार्थमवतीर्णस्य व्यासस्य प्रथममेव तत्प्रदर्शनौचित्यादित्यपि चोद्यं निरस्तम् । उक्तरीत्या द्विजत्वप्राप्त्यादेर्धर्मादिप्रदर्शनाङ्गत्वेन तेन विना तस्य कर्तुमशक्यत्वादिति दिक् ॥

सामसंहितादिशब्दस्य सामवेदाद्यतिरिक्तग्रन्थविशेषार्थवत् महाभारतसंहिताशब्दस्यापि तदतिरिक्तग्रन्थार्थत्वमिति शङ्कां निरस्यति– **महाभारताख्यं शास्त्रमिति ॥** कृपू सामर्थ्य इति धात्वर्थानुगमायाह– **समर्थितवानिति ॥** यद्यपि भारतं स चकार हेत्युक्तेः कृतवानिति वक्तव्यम् । तथाऽपि निर्माणव्याख्यानरूपार्थद्वयलाभायैवमुक्तम् । निर्माणमात्रस्य धार्मादिज्ञानाजनकत्वेन वैयर्थ्यात् । ननु इष्टानिष्टप्राप्तिपरिहारसाधनादर्शनादित्ययुक्तम् । सुप्तेरेव तथाभूताया दर्शनादित्यत आह– **आत्यन्तिकेतीति ॥**

## प्रमेयदीपिका

एतेनैतदपि प्रत्युक्तम्– यदाह भास्करः 'शास्त्रप्रयोजनाभिधाने प्रस्तुतेऽवतारप्रयोजनाभिधानमसङ्गतम्' इति । सङ्करः कृष्णावतारपुरस्कारेण गीतायाः सङ्गतिमाह ।

तदतिक्रमेण व्यासावतारपुरस्कारे को हेतुः? इति चेत्, कृष्णस्य बलकार्यत्वेन ज्ञानोपदेशस्य प्रासङ्गिकत्वम्। व्यासस्य ज्ञानकार्यत्वेन प्राधान्यमिति ॥

## भावदीपः

**एतेनेति** ॥ अवतारोक्तेः प्रामाण्योपयुक्तत्वकथनेनेत्यर्थः ॥ 'इत्येतदिति' इतिपदस्य पूर्वेणान्वयः । सङ्करस्यैवायं दोषो नास्माकमिति भावः ॥ **ज्ञानोपदेशस्येति** ॥ 'उद्धवादिकं प्रति' इति योज्यम् ॥

## भावरत्नकोशः

**एतेन** अवतारोक्तेः प्रामाण्योपयुक्तत्वकथनेन ॥ **सङ्कर इति** ॥ तथाच तदीयभाष्यम् 'स आदिकर्ता नारायणो भगवान् वासुदेवरूपेणावतीर्णो ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं मायां प्रकृतिं वशीकृत्य अजोऽव्ययो भूतानामीश्वरो नित्यशुद्ध-बुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते । स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं प्रवृत्तिनिवृत्तिलक्षणं धर्मद्वयमर्जुनाय शोकमोह-महोदधौ निमग्नायोपदिदेश' इति ॥ **सङ्गतिं** उपदेश्यत्वेनावसरप्राप्तिम् । **इति चेत्** इत्यनन्तरं 'उच्यत' इति शेषः ।

'कृष्णरामादिरूपेषु बलकार्यो जनार्दनः ।
दत्तव्यासादिरूपेषु ज्ञानकार्यस्तथा प्रभुः'

इत्यन्यत्रोक्तं हृदि कृत्वाऽह– **कृष्णस्येति** ॥ बलकार्यत्वेन बलकार्यवैरिनिबर्हणोद्देश्य-कावतारत्वेनेति यावत् । **प्रासङ्गिकत्वमिति** ॥ नारायणद्विट्तदनुबन्धिनिग्रहं कारयितुमर्जुनं बोधयंस्तन्नान्तरीयकतया ज्ञानोपदेशमपि कृतवानिति तस्याप्राधान्यं कृष्णावतारातिक्रमे हेतु-रित्यर्थः ॥ **प्राधान्यमिति** ॥ व्यासावतारपुरस्कारे हेतुरिति योज्यम् ।

यद्यपि 'तं धर्मं भगवता यथोपदिष्टं भगवान् वेदव्यासो गीताख्यैः सप्तभिः श्लोकशतैरुप-निबबन्ध' इति तदीयभाष्ये 'तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुप-निबबन्ध' इति सुबोधिन्यां च व्यासस्य गीतोपदेष्टृत्वमुक्तम् । तथाऽपि तत्रोक्तो वेदव्यासावतारः

सम्प्रदायप्रवर्तकतयाऽन्यथासिद्ध एव स्यान्न पुनः कृष्णावतार इव प्रधानम् । ज्ञानोपदेशे चोक्तप्रमाणेन स एव प्राधान्येनावगत इति स एव भाष्ये पुरस्कृत इति न परभाष्याद्युक्ति-रुपपन्नेति ॥

## भावदीपिका

**एतेनेति** ॥ अवतारप्रयोजनोक्त्याऽर्थाच्छास्त्रप्रयोजनस्यापि लब्धत्वेनेत्यर्थः । अत एव तदनेनेत्यनेनार्थाल्लब्धोऽर्थो दर्शितः ॥ **प्रस्तुत इति** ॥ निष्प्रयोजनत्वप्रयुक्तानारम्भणीयता-शङ्कानिरासायेति शेषः ॥ **अवतारप्रयोजनाभिधानमिति** ॥ नष्टधर्मेत्यादिनाऽऽदावेवेति शेषः ॥ **सङ्कर इति** ॥ 'इह खलु ज्ञानोपदेशाय सकललोकहितावतारः परमकारुणिको भगवान् देवकी-नन्दनस्तत्त्वाज्ञानविजृम्भितशोकमोहभ्रंशितविवेकतया निजधर्मत्यागेन परधर्माभिसन्धिनमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकसागरादुद्दधार । तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभि श्लोकशतैरुपनिबबन्ध' इति गीताभाष्ये सङ्करः कृष्णावतारं पुरस्कृत्य गीतायाः सङ्गति-माहेत्यर्थः ॥ **बलकार्यत्वेनेति** ॥ 'कृष्णरामादिरूपेण बलकार्यो जनार्दन' इत्युक्तेः ॥ **प्रासङ्गिकत्वम्** ॥ हेतुरिति वर्तते ॥ **ज्ञानकार्यत्वेनेति** ॥ 'दत्तव्यासादिरूपेषु ज्ञानकार्यस्तथा प्रभुः' इति वचनादित्यर्थः । प्राधान्यमित्यत्रापि हेतुरिति वर्तते । तथाच कृष्णस्य बलकार्यत्वेन ज्ञानकार्यत्वस्य प्रासङ्गिकत्वात् तदवतारपुरस्कारमतिक्रम्य व्यासावतारस्य ज्ञानकार्यत्वेन ज्ञान-प्रवर्तने तस्य प्राधान्यात् । प्रकृते च गीतायां ज्ञानोपदेशरूपत्वाद् व्यासावतारपुरस्कारेण सङ्गतिरुक्तेति भावः ॥

## भावप्रकाशः

एतेनेति ॥ नष्टधर्मेत्यादिभाष्यस्य प्रामाण्यादिसूचकत्वकथनेनेत्यर्थः । प्रासङ्गिकत्वमिति ॥ अप्राधान्यमित्यर्थः ॥

## प्रमेयदीपिका

वेदादिसंवादेनापि भारतस्य प्रामाण्यनिश्चय इत्याशयेनाऽह– **सर्वेति** ॥ नैतावता वेदादिसमं भारतम् । किन्तु तदनुक्तार्थस्यापि प्रतिपादनेन ततोऽधिकमिति भावेनाऽह–

**तदिति** ॥ तर्हि निर्मूलत्वेनाप्रामाण्यं प्रसज्यत इत्यत उक्तम्– **ईश्वरेति** ॥ **ज्ञानदृष्टः** ज्ञानविषयीकृतः । सर्वज्ञत्वस्य झटिति स्फुरणार्थं 'स्वेन' इत्यनुक्त्वा 'ईश्वर' इत्युक्तम् । ईश्वर-ज्ञानस्य कुतः प्रमाण्यम्? इत्यत उक्तम्– **केवलेति** ॥ इन्द्रियाद्यनपेक्षम् । अनेन सत्स्वप्यन्येषु ग्रन्थेषु किमेतद्व्याख्यानेन? इति परिहृतम् ॥

ननु 'नष्टधर्म 'इत्यादिना मन्दान् प्रतीदं निर्मितमिति सूचितम् । ते च वेदैकदेशार्थमपि ज्ञातुमशक्ताः । तत्कथं सर्ववेदाद्युक्तानुक्तार्थवतोऽस्य प्रणयनम्? मैवम् । ब्रह्मादीनाम् अप्यत्राधिकारित्वात्। यथोक्तम् –'वेदोत्तमं तच्च विधातृशङ्करप्रधानकैस्तन्मुखतः सुरैः श्रुतम्' (म.भा.ता.नि.१०/५९) इति । कथमेतदुभयम्? इत्यत आह– **सर्वेति** ॥ रूपशब्दोऽभिधे-यार्थः । 'स्वं रूपं शब्दस्य' (पा.सू.१.१.६८) इत्यत्र रूपशब्देन प्रसक्तस्य बाह्यार्थस्य व्यावृत्तये 'स्वम्' इत्युक्तत्वात् ।

स च व्याघातपरिहारार्थः ॥ सामान्येन द्व्यर्थं भारतम् । तत्रैकोऽर्थः सर्वप्राणिनामवगाह्यः । अपरः सर्वप्राणिनामनवगाह्यः । किन्तु केषाञ्चिदेवेति न कश्चिद्दोष इति ॥ अनवगाह्यरूपतायां हेतुमाह– **परोक्षेति** ॥ परोक्षः अत्यन्तगूढः ॥ ननु धर्माद्यनेकविषयत्वे अस्य कथमेकवाक्यता? इत्यत आह– **केवलेति** ॥ केवलम् एकमेव भगवत्स्वरूपं परं मुख्यप्रतिपाद्यं यस्यास्सा तथोक्ता। धर्मादिकं तु तादर्थ्येनामुख्यप्रतिपाद्यमिति भावः । भगवत्प्रतिपादनं न सङ्कीर्णतया। अपि तु निष्कृष्टतयेति ज्ञापनाय 'स्वरूप' इत्युक्तम् ॥

## भावबोधः

**बाह्यार्थस्येति** ॥ शब्दातिरिक्तस्येत्यर्थः । **सङ्कीर्णतयेति** ॥ तदितरसाधारणधर्मवत्तयेत्यर्थः । **निष्कृष्टतयेति** ॥ स्वरूपपदेन स्वलक्षणाभिधानादिति भावः ।

## भावदीपः

ननु 'वेदानामुद्धृतत्वात्' इत्यादिशङ्कानिरासकतया व्याख्यातमेव अन्यथाऽप्यवतार्य व्याचष्टे– **वेदादीति** ॥ **इन्द्रियाद्यनपेक्षमिति** ॥ एतेन नित्यतया निर्दोषत्वात् प्रामाण्यमित्युक्तं भवति ॥ **अनेनेति** ॥ 'सर्व' इत्यादिविशेषणद्वयकथनेन प्रागुक्तशङ्का परिहृतेत्यर्थः ॥

**यथोक्तमिति ॥** भारततात्पर्ये दशमे ॥ **उभयमिति ॥** मन्दाधिकारिकत्वं ब्रह्मादिसुराधि-कारिकत्वमित्यर्थः ॥

**स्वं रूपमिति ॥** 'स्वं रूपं शब्दस्याशब्दसञ्ज्ञा' (पा.सू. १.१.६८) इति प्रथमाध्यायाद्यपादे 'रूपं शब्दस्य' इति वक्तव्ये 'स्वम्' इति यद्विशेषणं कृतं पाणिनिसूत्रे तत्तु शब्दस्य वाच्यार्थरूपो यो बाह्योऽर्थस्तन्निरासेन वर्णमालारूपमन्तरङ्गं यद्रूपं शब्दस्य वाच्यमस्ति तस्यैव ग्रहणाय' इत्युक्तम् ॥ अन्यथा 'अग्नेर्ढक्' (पा.सू.४.२.३३) इत्यत्र अग्नेरित्यग्नि-शब्दरूपग्रहणेन 'आग्नेयम्' इति रूपं न सिद्ध्येत् तदर्थस्य वह्न्यादेरेव ग्रहणप्रसङ्गापत्तेः । (अतः) 'स्वम्' इति विशेषणमित्युक्तम् । तेन ज्ञायते रूपशब्दो वाच्यार्थपर इत्यर्थ इति । तदुक्तं वृत्तौ 'शब्दस्य स्वयमेव रूपमन्तरङ्गं यद्रूपं शब्दस्यावाच्यमस्ति, तस्यैव ग्रहणाये-त्युक्तम् । स्वमेव रूपं ग्राह्यम् ।

बोध्यं प्रत्याय्यं भवति । नतु बाह्योऽर्थः' इति ॥ **व्याघात इति॥** अवगाह्यानव-गाह्यत्वोक्तेरिति भावः ॥ **सङ्कीर्णतयेति ॥** स्वप्रतिपाद्यान्तरसाधारण्येन । किन्तु इतरा-साधारणतयेत्यर्थः ॥

## वाक्यार्थप्रदीपः

कुतो रूपशब्दस्याभिधेयार्थत्वमित्यतो व्याकरणसम्मत्या तदुपपादयति– **स्वं रूपं शब्दस्येत्यत्रेति ॥** लोके गौः उपलभ्यतामित्युक्ते अर्थ एव कार्योपयोगी गम्यते । न शब्द-रूपम् । नहि शब्दरूपमुपलभ्य कृती भवति । ततश्चाग्नेर्ढक् इत्युक्ते लोकवदर्थस्यैव प्रतिभासो युक्तः । नच अग्नेर्ढक् इत्यादौ प्रत्ययविधानादिकार्यस्य अर्थे सम्भवोऽस्ति । तेन सह पौर्वापर्यायोगात् । नहि अग्नेर्ढगिति अङ्गारेभ्यः परो ढक् कर्तुं शक्यते । अतः तद्वाचिनां सर्वेषां शब्दानां सम्प्रत्ययः स्यात् । ततश्च तद्वाचिभ्यः सर्वेभ्यः शब्देभ्यः प्रत्ययेन न भवितव्यम् । उपात्तादेव शब्दाच्च भवितव्यमिति नियमार्थमारभ्यते– **स्वरूपं शब्दस्याशब्दसंज्ञेति ।** अत्रच शब्दस्येति कृत्यानां कर्तरि वेति कर्तरि षष्ठी । अस्य चाध्याहृतेन ग्राह्यमित्यनेन सम्बन्धः । ग्राह्यमिति च णिजन्तात् घञ् । तेन शब्दस्य स्वमेव रूपं ग्राह्यम् । इह शास्त्रे शब्दः स्वमेव रूपं प्रत्याययति । न लोकवत् बाह्यार्थमिति सूत्रार्थः सम्पद्यते ॥

अत्र यद्यपि स्वात्मीयवाचिना स्वशब्देन तस्य शब्दस्येव अर्थस्य प्रतिपादनेऽपि नार्थस्य स्वत्वम् । अर्थो हि स्वप्रतीतौ सम्बन्धग्रहणमपेक्षते, पर्यायैरपि प्रत्यायनात् साधारणश्च, अनुकरणशब्दैरप्रत्यायनात् अनित्यसम्बन्धश्चेति । किन्नाम प्रतीतौ उपदेशानपेक्षत्वात्, असाधारणत्वात् नित्यसम्बन्धित्वात् शब्दरूपमेव स्वं सिद्ध्यति इत्यर्थस्याप्रसङ्गात् किं रूपग्रहणेनेति वैयर्थ्यमाशङ्क्य सति व्यावर्त्ये तत्रोपक्षयात् रूपग्रहणस्याज्ञापकत्वेऽपि प्रकृते रूपग्रहणस्य व्यावर्त्याभावेनानुपक्षीणं यत् रूपग्रहणं करोति तद् ज्ञापयति आचार्यः अस्त्यन्यत् शब्दरूपात् स्वं शब्दस्येति । किं पुनस्तद्ग्राह्योऽर्थः । ततश्च शास्त्रे शब्दस्वरूपेण समानकक्ष्योऽर्थ इति सिद्धौ स्वशब्देन बाह्यार्थस्य प्रसक्तौ तद्व्यावृत्त्यर्थं रूपपदं प्रयुक्तम् । तच्च सामान्याकारवाचकम् । तत्र व्यापकत्वाच्छब्दत्वादिसाधारणाकारस्यैव रूपपदेन विवक्षायामुक्तातिप्रसङ्गेन सूत्रस्यैवानर्थक्यापत्त्याऽसाधारणस्यैव अग्निशब्दत्वादे रूपस्य विवक्षणीयत्वेनार्थस्याप्रसङ्गात् न तद्वाचिभ्यः सर्वशब्देभ्यः प्रत्ययोत्पत्तिप्रसङ्ग इति युक्तः सूत्रारम्भ इति पदमञ्जर्यादौ निर्णीतत्वात् न रूपशब्देन प्रसक्तस्य बाह्यार्थस्य स्वशब्देन व्यावृत्त्यभिधानमुचितम् । तथाप्युक्तातिप्रसङ्गपरिहारार्थं प्रवृत्तत्वेप्यस्य सूत्रस्य रूप्यते निरूप्यत इति रूपमभिधेयम् । तच्चोभयोरपि शब्देन प्रतिभासात् शब्दोऽर्थश्चेति द्वयमपि । तत्रापि शब्दरूपमेव रूपम् । प्रतीतौ उपदेशानपेक्षत्वादिहेतुभ्यः नत्वर्थोऽपि, प्रतीतौ उपदेशादिसापेक्षत्वादिहेतुभ्यः । ततश्चान्तरेणापि स्वशब्दं रूपशब्देन स्वरूपस्यैव प्राप्तेः अव्यावर्तकत्वात् न स्वशब्देन प्रयोजनमिति शङ्कायाम्, सिद्धे सत्यपि यत्स्वग्रहणं करोति तत् ज्ञापयत्याचार्यः अस्त्यन्यत् स्वाद्रूपं शब्दस्येति । किं तत् । अर्थः । ततश्चार्थस्यापि शब्दस्वरूपसमानकक्ष्यत्वसिद्ध्या रूपशब्देन प्रसक्तिसम्भवात् तद्व्यावृत्त्यर्थं स्वशब्दोपादानम् । ततश्च बाह्यार्थव्यावृत्तस्यासाधारणशब्दरूपस्यैव लाभान्न सर्वेभ्यः प्रत्ययोत्पत्तिप्रसङ्ग इति वर्णकान्तराभिप्रायेणायं ग्रन्थ इति न किञ्चिदनुपपन्नम् ॥

## भावरत्नकोशः

'सर्ववेदार्थोपबृंहिताम्' इति यन्महाभारतसंहिताविशेषणं तत्कृत्यमाह– **वेदादिसंवादेनापीति ॥** न केवलमाप्तवाक्यत्वेन । अपि तु वेदपञ्चरात्रादिसंवादेनापीत्यपेरर्थः । संवादः समार्थत्वम् । विमतं प्रमाणं, वेदादिसंवादित्वात् सम्मतवदिति प्रयोगः । अनेन वेदाद्यर्थ-

समानार्थमिति भाष्याक्षरार्थ उक्तो भवति । एतावता वेदादिसंवादेन वेदादिसमं वेदाद्यर्थ-समानार्थम् । **तर्हि** वेदानुक्तार्थांशे वेदसंवादाभावेन वेदमूलत्वाभावे ॥

ननु निर्मूलत्वेनाप्रामाण्यमिति कथम् ? यावता वेदे मूलाभावेऽपि प्रामाण्यमभ्युपगतम् । मैवम् । पौरुषेयवाक्यस्य आप्तेः संवादस्य वा मूलत्वेन विवक्षितत्वात् । वेदे त्वपौरुषेये तत एव दोषाभावेन प्रामाण्यमिति ॥ दृष्टत्वं दृष्टिकर्मत्वम् । तत्र च ज्ञानेत्यस्यान्वयो नेत्यत आह– **ज्ञानविषयीकृत इति** ॥ दृशिः प्रकृत्यर्थो नात्र विवक्षित इति भावः ॥

यद्यपि ज्ञानशब्दस्य करणसाधनत्वमभ्युपगम्य तदीयेन्द्रियपरत्वस्वीकारे इन्द्रियजन्यदृष्टि-कर्मत्वार्थत्वसम्भवेन न प्रकृत्यर्थाविवक्षा दोषः । न च केवलशब्दस्येन्द्रियानपेक्षत्वार्थत्वायोग इति वाच्यम् । तदयोगेऽपि दोषामिश्रार्थत्वोपपत्तेः । तथाऽपि ज्ञाधातोरुत्पन्नो ल्युड् भाव एव प्राचुर्येण प्रयुज्यत इति प्रयोगप्राचुर्यानुसाराज्ज्ञानदृष्टेत्यत्र पदार्थैकदेशभूतया दृष्ट्या जन्यपद-संयोजनेऽन्वयस्याव्युत्पन्नत्वाच्चैवमुक्तम् ॥

ननु 'तदनुक्त' इति वेदाद्यनुक्तार्थदर्शनरूपं सार्वज्ञ्यं व्यासस्य न वक्तुमुचितम्, पुरुषेषु सार्वज्ञ्यानुपलम्भादित्याशङ्क्य व्यासः सर्वज्ञः, ईश्वरत्वात्, व्यतिरेकेण देवदत्तवदित्यनुमानेन व्यासस्य सार्वज्ञ्यं स्फोरयितुं प्रस्तुतत्वात्, 'केवलेनाऽत्मबोधेन' इति वक्ष्यमाणवाक्यानुसाराच्च तदनुक्तस्वज्ञानदृष्टार्थयुक्तमिति वक्तव्येऽपि प्रयोजनाभिसन्धित्सया ईश्वरेति पदमित्याह– **सर्वज्ञ-त्वस्येति** ॥ कैवल्यस्य प्रामाण्योपपादकत्वं स्फोरयितुमाह– **इन्द्रियाद्यनपेक्षमिति** ॥ ज्ञानमिति वक्ष्यमाणं विशेष्यम् । प्रामाण्यापवादकेन्द्रियदोषाणामभावाज्ज्ञानत्वाच्चोत्सर्गतस्तस्य प्रामाण्य-मिति भावः ॥

'सति वा तस्मिंस्तथाविधग्रन्थान्तरपरिहारेणास्या एव व्याख्याने को हेतुः' इति पूर्वचोद्य-स्योत्तरमुक्तं भवतीत्याह– **अनेनेति** ॥ 'सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थ-युक्ताम्' इति विशेषणद्वयेन इत्यर्थः । एवं विशिष्टग्रन्थस्यान्यस्याभावादिति भावः । मन्दांश्च प्रतीदं रचितमिति चशब्दसम्बन्धः । मन्दान् प्रतीदमित्येव क्वचित् पाठः । **सूचितमिति** ॥ मोक्षसाधनयोर्धर्मज्ञानयोरदर्शनात् संसारे क्लिश्यमानान् सज्जनानवलोक्योत्पन्नकृपैरिति दयालु-त्वोक्त्या सङ्क्षेपेणोक्तमित्यर्थः । **ते** मन्दाः । अशक्ताः मन्दपदोक्तात्यल्पप्रतिभानत्वादेवेति भावः । **अस्य** भारतस्य । **उक्तं** भारततात्पर्यनिर्णये–

'समस्तशास्त्रार्थविनिर्णयात्मकं चक्रे महाभारतनामधेयम् ।
वेदोत्तमं तच्च' इति ॥

विधात्रादीनां 'श्रुतम्' इत्यधिकारित्वमुक्तमित्यर्थः । एतदुभयं मन्दाधिकारिकत्वं ब्रह्माद्यधिकारित्वं च । यदि मन्दाधिकारिकं, तदा मन्दज्ञेयार्थस्य ब्रह्मादिभिः सर्वज्ञैर्ज्ञातत्वावश्यम्भावेन तदाधेयज्ञानातिशयलक्षणमधिकारित्वं तेषां न स्यात् । यदि ब्रह्माद्यधिकारिकं, तदा स्वदुरवगाह्यार्थत्वेन न तेषामधिकारित्वम् । अतदर्हत्वादिति भावः ॥

ननु रूपशब्दस्य स्वभावाद्यर्थत्वे महाभारतसंहिताया इयत्तया मानान्तरसिद्धायाः स्वरूपं श्रोतृप्राणिमात्रावगाह्यमित्यनवगाह्यरूपत्वं न सम्भवतीत्यतो रूपशब्दस्य विवक्षितमर्थं दर्शयति– **रूपशब्द इति ॥** रूपशब्दस्याभिधेयार्थत्वमुपपादयति– **स्वं रूपमिति ॥** 'स्वं रूपं शब्दस्याशब्दसञ्ज्ञा' इति पाणिनीयं सूत्रम् । अत्र स्वरूपस्य पर्यायाणां तद्विशेषाणां ग्रहणे प्राप्ते नियमार्थेयं परिभाषेति केचित् । अन्ये तु 'लिङ्गाभावाद् विध्यन्तरशेषभावाभावाच्च नेयं परिभाषा । अपि तु सञ्ज्ञासूत्रमिति प्रतिपन्नाः' इति कैयटः । इह शास्त्रे शब्दस्य स्वमेव रूपं प्रत्याय्यं भवति ॥

न बाह्योऽर्थः । 'दाधाघ्वदाप्', 'तरप्तमपौघः' इत्यादिशब्दसञ्ज्ञां वर्जयित्वेत्यक्षरार्थः । अत्र च स्वमित्यस्य रूपविशेषणत्वात् तेन रूपान्तरं व्यावर्त्यते । यथा नीलमुत्पलमित्यत्र नीलपदमन्यस्मादुत्पलशब्दार्थाद् व्यावर्तयति तथाऽन्यस्मादभिधेयलक्षणाद् रूपाद् रूपं व्यावर्तयति स्वमिति पदमित्यर्थस्य वृत्तिकारेणोक्तत्वादवगाह्यानवगाह्यरूपामित्यत्र रूपशब्दोऽभिधेयार्थो व्याख्यातव्य इत्यर्थः ॥

नन्विदं भाष्यविसंवादि । तत्र हि 'रूपग्रहणं किमर्थम् ? न स्वंशब्दस्याशब्दसञ्ज्ञा भवतीत्येव रूपंशब्दस्य सञ्ज्ञा भविष्यति । न ह्यन्यत् स्वंशब्दस्यास्ति अन्यदतो रूपात् । एवं तर्हि सिद्धे सति यद् रूपग्रहणं करोति तज्ज्ञापयत्याचार्योऽस्त्यन्यद्रूपात् स्वंशब्दस्येति । किं पुनस्तत् ? अर्थः' इति रूपग्रहणमाक्षिप्य समाहितम् । तथा च स्वशब्दस्यैव स्वरूपबाह्याभिधेयरूपार्थपरत्वं रूपशब्दस्य चाग्निशब्दत्वादिकं शुकसारिकापुरुषोच्चारितासु भिन्नासु शब्दव्यक्तिषु समवेतं सामान्यमभिधीयत इति स्फुटमवगम्यत इति नोक्तार्थसंवाद इति ॥

अत्रोच्यते । वृत्तौ स्वमेवेत्येवकारं विशेषणेन सङ्गमय्य व्याख्यातम् । रूपं च तत्र विशेष्यमिति स्फुटं प्रतीयते । नीलमेवेत्यादिविशेषणं च विशेष्यमन्यस्मात् तच्छब्दोपस्थाप्यादर्थाद् व्यावर्त्य क्रियान्वयि प्रत्याययतीति व्युत्पत्तिः । एवञ्च स्वमेव रूपं ग्राह्यं, नान्यद् रूपमिति रूपमेवान्यत् स्वमिति विशेषणेन व्यावर्तनीयम् । एवं व्यवच्छेद्यं दर्शयितुं 'न बाह्योऽर्थः' इत्यभिहितम् । यद्यत्र रूपशब्देनाभिधेयलक्षणबाह्यार्थो नाभिप्रेतः स्यात् तदा बाह्याभिधेयप्रसक्तेरेवाभावान्न बाह्योऽर्थ इति तन्निषेधोऽनुपपन्नः स्यात् । तेन ज्ञायते रूपशब्दस्याभिधेयरूपमग्निशब्दत्वादिसामान्यरूपं चार्थ इति ॥

भाष्ये तु स्वशब्दस्य बाह्यार्थपरत्वमग्निशब्दत्वादिसामान्यपरत्वं च प्रतीयते । तथाऽपि नैतत् प्रकृतार्थविरोधि । रूपग्रहणप्रयोजनप्राधान्येन तस्य प्रवृत्तत्वात् । वृत्तेश्च स्वग्रहणप्रयोजनप्राधान्येन प्रवृत्तेः । वृत्तिमतानुसारेण टीकावाक्यस्यात्र व्याख्येयत्वमित्यतो न कोऽपि दोष इति ॥ अत एव 'रूपं शब्दस्य' इति वक्तव्ये यत् स्वमिति विशेषणं तच्छब्दस्य वाच्यार्थलक्षणबाह्यरूपव्यावर्तनेन वर्णमालात्वमन्तरङ्गरूपं ग्राहयितुमिति वृत्तिकाररीत्या टीकां व्याकृतवन्तः स्वामिनः । व्याघातः, अवगाह्यानवगााह्यत्वयो रूपशब्दार्थयोरभिधेये विप्रतिषेधः । प्रतिपत्तृभेदेनैकस्यैव विप्रतिषिद्धरूपत्वमुपपद्यते, घटरूपस्यान्धानन्धज्ञेयाज्ञेयत्वमिवेति परिहरति– **सामान्येन द्व्यर्थमिति ॥**

'भारतार्थस्त्रिधा प्रोक्तः', 'दशार्थाः सर्वभारते', 'यस्मिन् दशार्थाः सर्वत्र' इत्यादिवचनाविसंवादायोक्तम्– **सामान्येनेति ॥** विवक्षाभेदेन त्र्यर्थत्वं दशार्थत्वं चान्यत्रोक्तम् । इह तु सामान्येनार्थे द्वैविध्यम् । तत्रैकोऽर्थः 'ईषत् सर्वोऽपि जानति' इति वचनात् सर्वजनैरवगाह्यः । अपरस्तु 'दुर्विज्ञेयमतः सर्वैर्भारतं तु सुरैरपि' इति शास्त्रात् सर्वजनानवगाह्य इति हेतोर्न व्याघातो नान्यविसंवादश्चेति भावः । 'कृत्यानां कर्तरि वा' इति प्राणिनामिति षष्ठी ॥

ननु शब्दस्य परोक्षार्थत्वं स्वभावतः । कथमनवगाह्यत्वे तद्धेतूक्रियत इत्यतोऽर्थमाह– **अत्यन्तगूढ इति ॥** तत्त्वं च 'भारतार्थस्त्रिधा प्रोक्तः','भक्तिर्ज्ञानं सवैराग्यं प्रज्ञा मेधा धृतिः स्थितिः । योगः प्राणो बलं चैव वृकोदर इतीरितः' इत्यादिना अन्यत्रोक्तं द्रष्टव्यम् ॥ **कथमिति ॥** धर्मः परमपरश्च तत्त्वं विषय इति हि प्राग् धर्मपरापरतत्त्वविषयत्वं भारतस्योक्तम् । महाभारतसंहितामिति तस्यैकवाक्यत्वं च प्रतिपिपादयिषितम् । एकवाक्यत्वं चार्थैकत्वनिबन्धनम् । यदाह–

जैमिनिः– 'अर्थैकत्वादेकं वाक्यम्' **इति** ॥ तथा च धर्माद्यनेकविषयत्वे वाक्यं भेत्तव्यमित्येकवाक्यता कथमङ्गीकार्येति भावः । केवलशब्दस्य मात्रशब्दार्थत्वे धर्माद्यसिद्धिः स्यादित्यतो व्याख्याति **केवलमेकमेवेति** ॥ धर्मादिकमित्यत्र आदिपदेनापरतत्त्वं गृह्यते । तादर्थ्येन तत्प्रतिपत्तिशेषत्वेन । ननु न स्वरूपशब्दस्यातीव प्रयोजनम् । मुख्यप्रतिपाद्यत्वस्य केवलभगवत्परामित्यनेन सिद्धेरित्यतः तत्प्रयोजनमाह– **भगवदिति** ॥ **सङ्कीर्णतया** धर्मापरतत्त्वसंवलिततया । **निष्कृष्टतया** अनितरसाधारण्येन ॥

## भावदीपिका

**तर्हीति** ॥ वेदानुक्तार्थयुक्तत्वेन वेदमूलकत्वाभावादित्यर्थः ॥ नन्वीश्वरदृष्टार्थेत्युक्त्यैवेश्वरज्ञानविषयीकृतार्थेत्यर्थलाभाद् ज्ञानपदमतिरिच्यतेऽत आह– **ज्ञानदृष्ट इति** ॥ विशिष्टपराणां शब्दानां विशेषणान्तरसमवधाने विशेष्यमात्रपरताया दृष्टत्वादत्र ज्ञानपदस्य पृथक् श्रवणात्, दृष्टपदेन विषयीकृतत्वमेव ग्राह्यमिति भावः । स्वेत्यत्र स्वशब्देन व्यासः ॥ **कुतः प्रामाण्यमिति** ॥ अस्मदादिज्ञानवत् तज्ज्ञानस्यापीन्द्रियजन्यत्वेन कदाचिदिन्द्रियदोषेण दृश्यमानत्वप्राप्तौ भ्रमत्वप्राप्त्याऽप्रामाण्यस्यापि सम्भवादिति भावः ॥ **अनेनेति** ॥ अस्य केवलेश्वरज्ञानदृष्टार्थयुक्तत्वकथनेनान्यग्रन्थानाम् एतादृशमहिमाभावस्यलाभेनेत्यर्थः ॥ **यथोक्तम्** ॥ महाभारततात्पर्यनिर्णय इति शेषः । वेदोत्तममित्यस्य पूर्वार्धः 'समस्तशास्त्रार्थनिदर्शनात्मकं चक्रे महाभारतनामधेयम्' इति ॥ **एतदुभयमिति** ॥ मन्दाधिकारिकत्वं ब्रह्मादिदेवाधिकारिकत्वं च कथम् ? न कथमपि युज्यत इत्यर्थः । मन्दाधिकारिके न ब्रह्मादीनामधिकार, अर्थित्वाभावेन वैयर्थ्यात् । ब्रह्माद्यधिकारिके न मन्दानां, सामर्थ्याभावेनासम्भावनापराहतत्वात् । अतः कथमेतदुभयमित्याशयः ॥

रूपशब्दस्याभिधेयार्थत्वे पाणिनिसूत्रसम्मतिमाह– **स्वं रूपमिति** ॥ 'स्वं रूपं शब्दस्याशब्दसञ्ज्ञा' । इह शब्दशास्त्रे स्वमेव रूपं शब्दस्वरूपमेव प्रतिपाद्यत्वेन ग्राह्यम् । न शब्दस्वरूपातिरिक्तो बाह्योऽर्थः । 'अग्नेर्ढक्' इत्युक्तेऽग्निशब्द एव ग्राह्यो न वह्निः । अशब्दसञ्ज्ञेति किम् ? 'दाधाघ्वदाप्' इत्यत्र घुशब्देन सञ्ज्ञाग्रहणमेव स्यात् । नतु सञ्ज्ञिनो धातोः । तदर्थमशब्दसञ्ज्ञेत्युक्तम् । शब्दानां धात्वादीनां यत्र घुसञ्ज्ञादिसञ्ज्ञा विधीयते तत्र

तां सञ्ज्ञां विनेत्यर्थः । तथाच तत्रार्थ एव ग्राह्य इति भावः । यद्यत्र रूपशब्दोऽभिधेयपरो न स्यात्, तदा बाह्यार्थप्रसक्तेरेवाभावेन सूत्रे स्वशब्दग्रहणमनर्थकं स्यात् । तेन ज्ञायतेऽभिधेयार्थो रूपशब्द इति ॥

**बाह्यार्थस्येति** ॥ शब्दस्वरूपातिरिक्तार्थस्येत्यर्थः । ननु भारतस्यावगाह्यत्वानवगाह्यत्वोक्तिर्व्याहतेत्यत आह– **स चेति** ॥ अभिधेयार्थको रूपशब्द इत्यर्थः । व्याघातपरिहारप्रकारमेवाऽह– **सामान्येनेत्यादिना** ॥ ननु भारतं दशार्थम्– 'यस्मिन् दशार्थाः सर्वत्र' इति वक्ष्यमाणत्वात् । अतो विरोधपरिहाराय **सामान्येनेत्युक्तम्** । दशार्थानामपि द्वित्वं विवक्षितम् । तदेव दर्शयति– **तत्रैकोऽर्थ इति** ॥ अपरोऽर्थः ॥

ननु सर्वप्राणिनामनवगाह्यरूपत्वे निरधिकारिकत्वं प्राप्तमत आह– **केषाश्चिदेवेति** ॥ ब्रह्मादिदेवानामेवेत्यर्थः ॥ **कश्चिदिति** ॥ कथमेतदुभयमिति शङ्कितो वा व्याघातरूपो वेत्यर्थः । अनवगाह्यरूपतायाम् अनवगाह्यार्थवत्तायाम् ॥ **अनेकविषयत्वे** ॥ धर्मपरापरतत्त्वरूपानेकार्थत्व इत्यर्थः ॥ **कथमेकवाक्यतेति** ॥ 'अर्थैकत्वादेकं वाक्यम्' इति जैमिनिसूत्रादेकवाक्यताया अर्थैक्यघटितत्वादनेकविषयकत्वे सा न स्यादित्यर्थः ॥ तादर्थ्येन भगवत्स्वरूपप्रतिपत्त्यर्थत्वेन । भगवत्परामित्युक्त्यैवोक्तशङ्कानिरासलाभात् स्वरूपशब्दानर्थक्यमित्यत आह– **भगवदिति** ॥ **सङ्कीर्णतयेति** ॥ तदितरसाधारणधर्मवत्तयेत्यर्थः ॥ **निष्कृष्टतयेति** ॥ सर्ववैलक्षण्येनेत्यर्थः । शुद्धवस्तुरूपस्वलक्षणार्थत्वात् स्वरूपशब्दस्येति भावः ॥

## भावप्रकाशः

कैवल्यं प्रामाण्योपपादकं यथा स्यात् तथा व्याचष्टे– **इन्द्रियाद्यनपेक्षमिति** ॥ अनेन प्रामाण्यापवादकानामिन्द्रियादिदोषाणामभावात् उत्सर्गत ईश्वरज्ञानस्य प्रामाण्यमिति सूचितम् ॥ इत्युक्तत्वादिति ॥ स्वं रूपं शब्दस्याशब्दसञ्ज्ञेति सूत्रस्येह शास्त्रे शब्दस्य स्वरूपमेव प्रत्याप्यं भवति न बाह्योऽर्थः टिघीत्यादिशब्दसञ्ज्ञां वर्जयित्वेत्यर्थः काशिकादावुक्तः । एवं च रूपशब्दस्याभिधेयार्थत्वलाभः । अन्यथा रूपशब्देनाभिधेयविशेषबाह्याभिधेयप्रसक्तेरभावान्न बाह्योऽर्थ इति स्वशब्देन तद्व्यावर्तनमयुक्तं स्यादिति भावः ॥ ननु परोक्षत्वं नानवगाह्यरूपत्वे हेतुः । देवदत्तश्चक्षुष्मानित्यादिवाक्ये व्यभिचारादित्यत आह– **परोक्षोत्यन्तगूढ इति** ॥

**सङ्कीर्णतयेति ॥** तदितरसाधारणधर्मवत्तयेत्यर्थः । **निष्कृष्टतयेति ॥** स्वरूपपदेनानतिप्रसक्त-रूपाभिधानादिति भावः ॥

**भाष्यम्– तच्चोक्तम्**

**'लोकेशा ब्रह्मरुद्राद्याः संसारे क्लेशिनं जनम् ।**
**वेदार्थाज्ञमधीकारवर्जितं च स्त्रियादिकम् ॥**
**अवेक्ष्य प्रार्थयामासुः देवेशं पुरुषोत्तमम् ।**
**ततः प्रसन्नो भगवान् व्यासो भूत्वा च तेन च ॥**
**अन्यावताररूपैश्च वेदानुक्तार्थभूषितम् ।**
**केवलेनात्मबोधेन दृष्टं वेदार्थसंयुतम् ॥**
**वेदादपि परं चक्रे पञ्चमं वेदमुत्तमम् ।**
**भारतं पञ्चरात्रं च मूलरामायणं तथा ॥**
**पुराणं भागवतं चेति सम्भिन्नश्शास्त्रपुङ्गवः ।' इति नारायणाष्टाक्षरकल्पे ।**

## भावप्रदीपिका

उक्तमेवार्थं प्रमाणैः स्पष्टयति– **तदित्यादिना ॥** व्यासो भूत्वा च मूलरूपेण च तेन व्यास-रूपेणान्यावताररूपैश्चेति चशब्दावन्योन्यसमुच्चयार्थौ । **अन्यावताररूपाणि** नारायणहयग्रीवा-दीनि । पञ्चमो वेदः शास्त्रपुङ्गव इति सम्भिन्नः । मूलरूपेणादिभागवतं चक्रे । पञ्चरात्रस्य वक्ता नारायणः । मूलरामायणं हयशीर्षश्चकार ॥ 'निर्दग्धेषु तु लोकेषु वाजिरूपेण वै मया । श्रुत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ॥'इति मात्स्योक्तेः ॥

## भावप्रकाशिका

यदेतत् भारतस्य प्रमाणतमत्वप्रतिपादकं नष्टधर्मेत्यादि श्रीमदाचार्यवचनं तत्स्वत एव प्रमाणम्, न तत्र शङ्का भवति तल्लक्षणाभिज्ञानां महात्मनाम् । तथाहि ब्रह्मतर्कादौ 'तदुक्तिमात्रे प्रामाण्यं यदि नास्यागमान्तरम् । अपेक्षितम्' इत्यारभ्य 'नाशङ्क्यं तद्वचः क्वचित्', 'तद्वाक्यं देवपूजितम्' इत्यादि तल्लक्षणानभिज्ञानां प्राकृतानां तु भवत्यपि शङ्का । साऽपि मा भूदिति भावेनाह– **तच्चोक्तमिति ॥**

न केवलं तन्मद्वाक्यादवसीयते किन्तु उक्तं च तत् ‘लोकेशाः इत्यादिना, नारायणाष्टाक्षर-कल्पादिस्थानचतुष्टये । तदेव ‘यदि विद्यात्’ इत्यादि भारतवाक्यपर्यालोचनया, ऋषिसम्प्र-दायादिहेतुना चावसीयते इत्यर्थः । प्रथमत एव भगवता ब्रह्माणं सृष्ट्वा, तस्मै वेदेतिहासादि-सर्वविद्यायाः प्रतिपादितत्वात् । हयास्यनिःसृतश्रुतेश्च वेदव्यासो भूत्वा च पञ्चमवेदं चक्र इति चकारः तेन चान्यावताररूपैश्चेति चकारो मिथःसमुच्चयार्थः । **अन्यावताररूपैः इति** हयास्य-कपिलादिरूपैः । एतदेव ऋग्भाष्ये ‘मुनिस्तु सर्वविद्यानाम्’ इत्यादिना चावगन्तव्यम् । मूल-रामायणं नाम शतकोटिप्रविस्तरं श्रीहयास्याच्छ्रुत्वा ब्रह्मणा नारदायोक्तम् । तदुक्तं मात्स्ये

‘निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया’ ।
‘श्रुत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ॥’ इत्यारभ्य,

‘वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् ।
ब्रह्मणाऽभिहितं तत्र शतकोटिप्रविस्तरम् ॥
आहृत्य नारदायैव तेन वाल्मीकये पुनः ॥’ इति ॥

स पञ्चमवेदाख्यशास्त्रपुङ्गवो भारतादिभेदभिन्न इत्यर्थः । अतः प्रमाणतमं भारतम् ।

## प्रमेयदीपिका

कुत एतत् प्रतिपत्तव्यम्? इत्यत आह– **तच्चोक्तमिति ॥** यदेतत् ‘नष्टधर्म’ इत्यादिनोक्तं तत् ‘लोकेशाः’ इत्याद्यागमचतुष्टयेन उक्तं च । न केवलमस्माभिरुच्यते **॥**

‘उपसर्गस्य घञ्यमनुष्ये बहुलम्’ (पा.सू.६.३.१२२) इत्यतः ‘अधीकार’ इति दीर्घः । स्त्रियादिकम् इति छान्दस इयङ् । व्यासो भूत्वा च व्यासो भूत्वैव । विलम्बमकृत्वा । **अभूत्वा** मूलरूपेण चेति वा । **तेन** व्यासरूपेण, अन्यावताररूपैश्च **॥ परम्** अतिशयेनोत्तमम् । कोऽसौ पञ्चमो वेदः? इत्यत आह– **भारतमिति ॥** पञ्चमवेदाख्यः शास्त्रपुङ्गवः । **इति सम्भिन्नः** प्रभिन्नः । अथवा **इति शास्त्रपुङ्गवः** । स च **सम्भिन्नः** एकार्थतया सङ्गत इत्यनेकेष्वपि ग्रन्थेष्वेकवचनमिति योज्यम् ॥ अत्र पञ्चरात्रं नारायणावतारेण कृतम् । मूलरामायणं हयग्रीवरूपेण । आदिभागवतं मूलरूपेण ॥

## भावबोधः

**पञ्चमवेदाख्य इति ॥** तथा च न वचनव्यत्ययदोष इति भावः ।

## भावदीपः

**आगमचतुष्टय इति** ॥ नारायणाष्टाक्षरकल्पोपनारदीयनारदीयस्कान्दरूप इत्यर्थः ॥ **उक्तं चेति** ॥ चशब्दार्थः– **न केवलमित्यादि ॥ उपसर्गस्येति ॥** उपसर्गस्य घञन्ते उत्तरपदे अमनुष्येऽभिधेये बहुलं दीर्घो भवतीति षष्ठतृतीयपादगतसूत्रस्यार्थः ॥ 'इको यणचि' (पा.सू. ६.३.७७) इति यणादेशे स्त्र्यादिकमिति भाव्यमित्यत आह– **छान्दस इति** (इयङादेश इति । एष आदेशः) **॥ विलम्बमिति ॥** विजातीयव्यापारमित्यर्थः ॥

'पञ्चमं वेदं चक्रे' इत्यस्य विवरणपरत्वस्य ज्ञापनाय शेषोक्तिपूर्वं वाक्यं योजयति– **पञ्चमवेदाख्यमित्यादिना ॥ इति सम्भिन्न इति** ॥ भारतादिरूपेण पञ्चधा सम्भिन्न इत्यर्थः ॥ मिश्रित इति भ्रमनिरासार्थमाह– **प्रभिन्न इति ॥ अथवेति ॥** 'शास्त्रपुङ्गवः' इत्यत्र पञ्चम-वेदाख्यमित्यनुषङ्गः **॥ एकेति ॥** अनेकेषु भारतादिपञ्चसु 'पञ्चमं वेदम्' इत्येकवचनमित्यर्थः। तत्र 'हेतुतया अपि' इति पदमावर्त्यमित्युपेत्योक्तम्– **सङ्गत इतीति** ॥ किं केन कृतम् ? इत्यतो विवेकमाह– **अत्रेति ॥** 'भारतपुराणे व्यासकृते' इत्यनुक्तिसिद्धमिति नोक्तम् ॥

## वाक्यार्थप्रदीपः

ननु चाधिकारवर्जितमिति भवितव्यम् । अधीकारेति तु कथमित्यत आह– **उपसर्गस्येति ॥** घञन्ते उपपदे अमनुष्येऽभिधेये उपसर्गस्य बहुलं दीर्घो भवतीति सूत्रार्थः । तथा च कृञो घञि ञित्वाद्वृद्धौ रपत्वे च निष्पन्नकारशब्दस्य घञन्तत्वात् तस्मिन् परतोऽधीत्युपसर्गस्य दीर्घत्वो-पपत्तिरिति भावः ॥

ननु इको यणचीति यणि स्त्र्यादिकमिति भवितव्यम् । स्त्रियादिकमिति तु कथम् । न च स्त्रिया इति इयङि स्त्रियादिकमिति सिद्ध्यतीति वाच्यम् । अजादौ प्रत्यये परत एव तत्र इयङो विधानेन आदिशब्दे परतः तदप्रसक्तेरित्यतः इयङुवङ्प्रकरणे तन्वादीनां छन्दसि बहुलं उप-सङ्ख्यानमिति त्रियम्बकं यजामहे इत्यादि प्रयोगसिद्ध्यर्थं वार्तिककृतोक्तत्वात् इतिहासपुराणः

पञ्चमो वेद इति पुराणस्यापि च्छन्दस्त्वात् इयङ् सम्भवत्येवेत्याह– **स्त्रियादिकमिति च्छान्दस इयङिति ॥**

## भावरत्नकोशः

**कुतः** कस्मात् प्रमाणात् । चशब्दस्य स्वस्थले समुच्चेयासमर्पकत्वाद् व्यत्यस्य योजयति **यदेतदिति ॥** आगमचतुष्टये अष्टाक्षरकल्पोपनारदीयनारदीयस्कान्दपुराणवचनरूपागमचतुष्टये । तेन 'लोकेशाः' इत्याद्यागमवचनानां बहुत्वोपलम्भात् कथमागमानां चतुष्ट्वमिति चोद्यं परिहृतम् । समुच्चेयं वक्तुमुक्तं **न केवलमिति ॥** नन्वध्युपसर्गपूर्वस्य करोतेर्घञि अधिकार इत्येव स्यादित्यत आह– **उपसर्गस्येति ।** उपसर्गस्य घञन्त उत्तरपदेऽमनुष्येऽभिधेये बहुलं दीर्घो भवति । अपामार्गः वीक्लेदः । अमनुष्य इति किम् ? निषादः, इति सूत्रार्थः ॥

ननु 'स्त्रियादिकम्' इत्यत्र 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण धात्विकारस्यैव इयङादेशविधानात् स्त्रीशब्दगतेकारस्यातथात्वादियङादेशाप्रसक्तौ 'इको यणचि' इति यणादेशे स्त्र्यादिकमित्येव स्यादित्यत आह– **छान्दस इयङिति ॥** इयङुवङ्प्रकरणे 'तन्वादीनां छन्दसि बहुलमुपसङ्ख्यानम्' इति त्रियम्बकमितिवदत्रापि छन्दस्तुल्ये पुराणप्रयोग इयङादेशो वक्तव्य इत्यर्थः । केचित्तु 'स्त्रियाः' इति सूत्रेणेयङादेशः । 'प्रत्यय' इति तु छान्दसत्वान्नाश्रित-मित्यर्थमाहुः । 'व्यासो भूत्वा' इत्यत्र भूत्वेत्यभूत्वेति च शक्यते पदं छेत्तुम् । 'हशि च' इति 'एङः पदान्तादति' इति च शास्त्रात् । पक्षद्वयेऽप्याद्यश्चशब्द एवार्थः । उत्तरं चशब्दद्वयं परस्परसमुच्चायकम् । तत्राऽद्ये व्यासो भूत्वैव तेन व्यासरूपेण चान्यावताररूपैश्च पञ्चमं वेदं चक्र इत्यन्वयः । अभूत्वेति पक्षे अभूत्वैव तेन च अव्यासभावेनैव मूलरूपेणान्यावताररूपैश्च पञ्चमं वेदं चक्र इत्यन्वय इति भावेन व्याचष्टे– **व्यासो भूत्वा चेत्यादिना ॥**

ननु व्यासो भूत्वैव पञ्चमं वेदं चक्र इति न युक्तम् । 'अन्यावताररूपैश्च चक्रे' इत्यनु-पपत्तेरित्यतो नात्रैवकारेणान्यावताररूपव्यावृत्तिरभिप्रेता । किन्तु ज्ञानप्रतिकूलव्यापाराभाव एवेति भावेनोक्तम् **विलम्बमकृत्वेति ॥** विजातीयव्यापारमकृत्वेत्यर्थः । अभूत्वा मूलरूपेण चेत्यस्याभूत्वैव तेन मूलरूपेण चेत्यर्थः । भूत्वेति पक्षे चशब्दं यथाश्रुतं योजयंस्तेनेत्यस्यार्थं वक्ति तेन व्यासरूपेणेति ॥ परमत्तुममिति पदयोरपौनरुक्त्यायार्थमाह– **परमतिशयेनेति ॥**

**उत्तमम् ॥** उत्तममित्यस्येदं तात्पर्यमित्यर्थः । पुंलिङ्गानुसारेण शेषमाह– **पञ्चमवेदाख्य इति ॥ इति** 'भारतं पञ्चरात्रञ्च' इत्युक्तप्रकारेण ॥

ननु सम्पूर्वो भिनत्तिः सङ्गतौ प्रसिद्धः 'यन्न दुःखेन सम्भिन्नम्' 'सुखस्य दुःखासम्भिन्नत्वम्' इत्यादौ । तत् कथं प्रभिन्न इत्युच्यते ? इत्यरुचेराह– **अथवेति ॥** इति भारतादिरूपः, शास्त्रपुङ्गवः उत्तमं शास्त्रम् । अस्मिन् पक्षे वाक्यं भेत्तव्यमिति भावेनोक्तम्– **स चेति ॥** सङ्गतः एकं वाक्यमिति यावत् । इतिशब्दमावृत्य हेत्वर्थत्वमभिप्रेत्य तत्र साध्यं पूरयति **इति हेतोरनेकेष्वप्येकवचनमिति ॥** अस्ति तावत् 'पञ्चमं वेदम्' इत्यत्रैकवचनम् । तच्चैकत्वेऽनुशिष्टम् । एकत्वं च नानाग्रन्थेष्वर्थैकत्वनिबन्धनमिति भावः । ननु सम्भवत्येकवाक्यत्वे वाक्यभेदः किमित्याश्रयणीय इति चेत्, उच्यते । 'पुराणं भागवतं चेति पञ्चमो वेद ईरितः' इति वक्तव्ये यच्छास्त्रपुङ्गवस्सम्भिन्न इत्याह– **तद् भारतादिशास्त्रस्यैकवाक्यतां ज्ञापयितुम् ।** तज्ज्ञापनं च लोकानां सांसारिकक्लेशनिवर्तनाय शास्त्रनिर्माणे प्रवृत्तस्य भगवतः परस्परविरुद्धार्थकभारतादिनिर्माणे सति न कृतार्थता स्यात् । न चैवं युक्तम् । भगवता महानुभावेन लोकानुजिघृक्षया समीहमानेन नानाधिकारिभेदेन नानाशास्त्रं निर्मितवता विषयप्रयोजनैक्येन भारतादिशास्त्राण्येकं वाक्यमिति ज्ञापनीय एव सज्जन इत्यर्थवत् । अयं चार्थो वाक्यभेदाश्रयण एव सिद्ध्यतीति तद्भेदपक्षाश्रयणमिति ॥

नन्वभूत्वा मूलरूपेणेति पक्षे भारतपञ्चरात्रमूलरामायणादिभागवतानां यथासङ्ख्यं मूलरूपव्यासनारायणावतारहयग्रीवरूपकृतत्वं न युक्तम् । भारतस्य व्यासकृतत्वप्रसिद्धेः । यथायोगमन्वयस्तु दुरवगाह इत्यत आह– **अत्र पञ्चरात्रमित्यादिना ॥ नारायणावतारेण कृतमिति ॥** 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्' इति वचनं पञ्चरात्रस्य नारायणावतारकृतत्वे मानम् । यद्यप्यत्र वक्तेत्येवोच्यते । तथाऽपि नारायणस्य स्वतः सार्वज्ञ्येन सजातीयोच्चारणानपेक्षोच्चारणसमर्थत्वात् तस्यैव चात्र कर्तृशब्दार्थत्वात् तत्कृतत्वं सिद्ध्यतीति भावेनैवमुक्तम् । तथा च यादवगिरिमाहात्म्ये नवमेऽध्याये

'वेदेष्वव्यक्तमर्थं हि व्यञ्जयन् परमः पुमान् ।
चक्रे नारायणः श्रीमान् पञ्चरात्रमशेषतः ॥ इति ॥

हयग्रीवरूपेणेत्यत्र कृतमित्यनुवर्तते । तथा च प्राचीनटीका 'मूलरामायणं नाम शतकोटिप्रविस्तरम् । श्रीहयास्याच्छ्रुत्वा ब्रह्मणा नारदायोक्तम् । तदुक्तं मात्स्ये

'निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया ।
श्रुत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ॥ इत्यारभ्य

वाल्मीकिनाऽपि यत् प्रोक्तं रामोपाख्यानमुत्तमम् ।
ब्रह्मणाऽभिहितं तच्च शतकोटिप्रविस्तरम् ॥
आहत्य नारदायैव तेन वाल्मीकये पुनः ॥ इति ॥

एवं च मूलरामायणस्य हयग्रीवकृतत्वसिद्धिः । एतेनैव अवतारेषु गणितो हयग्रीवः रूपशब्देन गृह्यत इति निरस्तम् । वाजिरूपेणेति तस्य रूपशब्देन पुराणे व्यवहारात् । **अभूत्वा** तेन मूलरूपेणेत्युक्तम् । तत्कृतं ग्रन्थमाह– **आदिभागवतं मूलरूपेणेति ॥** कृतमित्यस्ति । तन्त्रभागवतादिवद् ग्रन्थविशेष एवाऽदिभागवतम् ॥

'एतदेवाऽत्मभू राजन्नारदायेति पृच्छते ।
वेदगर्भोऽभ्यधात् सर्वं यदाह हरिरात्मने ॥
इदं भागवतं नाम यन्मे भगवतोदितम् ।
सङ्ग्रहोऽयं विभूतीनां तदेतद् विपुलीकुरु ॥'

इति द्वितीयस्कन्धभागवतश्लोकद्वये, आदिभागवतं ब्रह्मणे सर्गादौ मूलरूपेणोपदिष्टम्; प्रसिद्धभागवतं तु ततोऽन्यदिति भागवतटीकाभागवतोपासनयोर्व्यक्तम् । तथा च भागवते तृतीयस्कन्धे

'पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममाऽदिसर्गे ।
ज्ञानं परं मन्महिमावभासं यत् सूरयो भागवतं वदन्ति' इति ॥

भारतस्य व्यासकृतत्वं सुप्रसिद्धमिति तन्नोक्तम् । अनेन 'व्यासो भूत्वा च तेन च । अन्यावताररूपैश्च' इत्यत्र व्यासो भूत्वैव तेन च व्यासरूपेण च व्यासापेक्षयाऽन्यश्चासाववतारो नारायणलक्षणश्च रूपं च रूपं च रूपे, हयग्रीवमूलरूपे तैश्चेत्यर्थे व्यासावतारनारायणावतार-

हयग्रीवरूपमूलरूपाणां यथासङ्ख्यं भारतं पञ्चरात्रं मूलरामायणं पुराणं भागवतमादिभागवतं चेति वचनोक्तांश्चतुरो ग्रन्थान् प्रति कर्तृत्वमावेदितं भवति । तथा अभूत्वैव तेन मूलरूपेण चेति पक्षे अन्यानि च तान्यवताररूपाणि व्यासनारायणहयग्रीवरूपाणि चेति विग्रहः । मूलरूपान्तराभावेन अन्यत्वस्यासम्भवपरिहारायावतारेत्युक्तम् । मूलरूपापेक्षया तथाविधरूपान्तराभावेऽप्यवताररूपाणां सम्भवादुक्तं युक्तम् । एवञ्च मूलरूपेण चान्यावताररूपैश्च यथासम्भवं मूलरूपेणाऽदिभागवतं व्यासावताररूपेण भारतं नारायणावताररूपेण पञ्चरात्रं हयग्रीवावताररूपेण मूलरामायणं कृतमिति बोद्धव्यमिति विभावितं भवति ॥

ननु, 'तस्माद् वेदाः समुत्पन्ना विद्याख्या मूलिका श्रुतिः ।
सर्वोपनिषदश्चैव पञ्चरात्राख्यसंहिताः ॥
ब्रह्मसूत्राणि वेदानां व्याख्यास्तासां च विस्तरः ॥
सर्वमेतज्जगच्चैव निःसृतं तुरगाननात् ॥'

इति बृहद्भाष्ये पञ्चरात्रस्य हयग्रीवकृतत्वाभिधानात् कथं नारायणावतारकृतत्वमुच्यते ? इति चेन्न । नारायणावतारकृतपूर्वकल्पीयपञ्चरात्रस्य हयग्रीवास्योच्चारितार्थकत्वेनोक्तवचनेन तत्कृतत्वानभिधानात् । अत एव च तत्र निःसृतमित्युक्तम् । अन्यत्र च 'हयग्रीवादिमा विद्याः श्वसितत्वेन निस्सृताः' इत्युक्तम् । ऋग्भाष्यटीकायां च 'वेदादिकं सर्वं निःश्वसितमिवानायासेन आदिकाले तेनोच्चारितमित्यर्थः' इति निःश्वसितनिस्सृतशब्दयोरुच्चारणार्थत्वमेवोक्तम् । वक्ष्यते च तृतीयभाष्यटीकयोः 'निःश्वसितशब्दस्त्वक्लेशाभिप्रायः' इत्यादि । अन्यथा वेदादीनामपि तत्कृतत्वप्रसङ्गः ॥

न च वेदानामपौरुषेयत्वान्निःश्वसितत्वं निस्सृतत्वं चोच्चारितत्वमेव । पञ्चरात्रादीनां पौरुषेयाणां तु तत्कृतत्वमस्त्विति वाच्यम् । पौरुषेयत्वेऽपि हयग्रीवकृतत्वे निरवकाशप्रमाणाभावात् । 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।' इति वचनाच्च अन्यकृतस्यैवोच्चारणमित्यस्यैव युक्तत्वात् । एतेन 'ब्रह्मसूत्राणि वेदानां व्याख्या' इति ब्रह्मसूत्राणां हयग्रीवास्यनिःसृतत्वमपि व्याख्यातम् । 'भगवान् चकार ब्रह्मसूत्राणि', 'एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः', 'तदर्थनिर्णयाय ब्रह्मसूत्राणि चकार', 'विनिर्णयं ब्रह्मसूत्रं चकार' इत्यादिनिरवकाशबहुप्रमाणावगतव्यासकर्तृकत्वानां ब्रह्मसूत्राणां हयग्रीव आदिकाले पूर्वकल्पीया-

नामुच्चारयितेत्यस्यैव न्याय्यत्वात् । एवमेव 'इतिहासपुराणः पञ्चमो वेदानां वेदः' इत्युक्तस्य भारतस्य तदुक्तानां पुराणानां च व्यासकृतानां पूर्वकल्पीयानामुच्चारणमादिकाले हयग्रीवेण कृतमित्येव ज्ञातव्यम् । एवं च सति,

'ब्रह्माद्यैः प्रार्थितो विष्णुर्भारतं स चकार ह ।',

'भारतं चापि कृतवान् पञ्चमं वेदमुत्तमम् ।',

'स्वयं नारायणो देवो ब्रह्मरुद्रेन्द्रपूर्वकैः ।
अर्थितो व्यासतां प्राप्य केवलं तत्त्वनिर्णयम् ॥
चकार पञ्चमं वेदं महाभारतसञ्ज्ञितम् ।
कृष्णद्वैपायनं व्यासं विद्धि नारायणं परम् ।
को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद् भवेत् ॥',

'समस्तशास्त्रार्थविनिर्णयात्मकं चक्रे महाभारतनामधेयम् । वेदोत्तमम्', 'महाभारतसंहितामचीक्लृपत्' इत्यादीनि, 'अष्टादशपुराणानां कर्ता सत्यवतीसुतः' इत्यादीनि च निरवकाशप्रमाणान्यनुकूलितानि भवन्ति ॥

केचित्तु, बृहद्भाष्ये कतिपयसंहितानामेव हयग्रीवकृतत्वमुच्यते । न समस्तपञ्चरात्रस्य । 'पञ्चरात्राख्यसंहिता' इति संहितापदप्रयोगात् । अत्र पुनः सर्वस्य पञ्चरात्रस्य नारायणावतारकृतत्वमभिप्रेतम् । कृत्स्नस्येति विशेषणात् । एवं सङ्क्षेपविस्तराभ्यामुभयकृतत्वमभ्युपगम्यत इति न तद्विरोध इत्याहुः ॥

अन्ये तु हयग्रीवकृतेषु ब्रह्मसूत्राणां पुराणानां च परिगणनात् तत्रापि भागद्वयमङ्गीकृत्योक्तरीत्या द्विकर्तृकत्वाभ्युपगमायोगात् पञ्चरात्रभारतादयः सर्वेऽपि ग्रन्थाः सामस्त्येन हयग्रीवकृता एव । 'एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः' 'अष्टादशपुराणानां कर्ता सत्यवतीसुतः', 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्' इत्यादौ सूत्रपुराणपञ्चरात्राणां व्यासनारायणकृतत्वोक्तिस्तु, पुनर्विशेषाकारेण मनुष्यलोकादौ स्थापितत्वाभिप्राया । यथा प्रियव्रतस्य स्वरथनेमिभिः समुद्रनिर्माणवचनं विशदीकरणाभिप्रायम् । यथा वा विष्णुसृष्टायास्त्रि-

लोक्या विशेषतः पुनः सृष्ट्या 'त्रीन् लोकान् ब्रह्मा ससर्ज' इति वचनं विशेषाकारेण निर्माणाभिप्रायं तद्वत् । तथा च पञ्चमस्कन्धतात्पर्ये –

'पूर्वसृष्टान् रथाऽवृत्त्या स्थूलांश्चक्रे प्रियव्रतः ॥
समुद्रांस्तेन तत्कर्तेत्याहुरेनं प्रियव्रतम् ॥' इति ॥

ऐतरेयभाष्ये च

'भूतेभ्योऽनन्तरं त्वण्डं सृष्ट्वा विष्णुः पुरा प्रभुः ॥
लोकभेदांश्च चक्रेऽत्र पश्चाद् ब्रह्मा विशेषतः ॥
सम्यक् चकार लोकांस्त्रींल्लोककर्ता ततश्च सः ॥' इति ॥

अतो हयग्रीवरचितानामेव पञ्चरात्रभारतपुराणानां नारायणावतारव्यासकृतत्वं टीकाया-मभिमतमिति वदन्ति ॥

अत्रेदं वेदितव्यम् । 'इतिहासपुराणः पञ्चमो वेदः' इत्यत्र इतिहासपदोक्तानां भारत-पञ्चरात्रमूलरामायणानां मध्ये भारतपञ्चरात्रयोरिव मूलरामायणस्यापि पूर्वकल्पीयस्यैव हयास्यास्यनिःसृतत्वम् । तस्यैव कालबलेन लीनतायां ब्रह्मरुद्रादिभिरर्थितो भगवान् हयास्यः पुनस्तत्सदृशमेव मूलरामायणं निर्मितवान् । एतच्चोक्तमात्स्यपुराणवचनेन सिद्धमिति ॥

केचित्तु, बृहदारण्यके हयग्रीवस्येतिहासकर्तृत्वमुक्तम् । इतिहासश्च भारतं पञ्चरात्रं, मूल-रामायणं चेति त्रिकरूपः । तत्र भारतस्य व्यासकृतत्वात् पञ्चरात्रस्य नारायणकृतत्वात् परिशेषेणेतिहासशब्दार्थस्य मूलरामायणस्य हयग्रीवकृतत्वं सिद्ध्यतीति भावेन मूलरामायणं हयग्रीवरूपेण कृतमित्युक्तमित्याहुः । भागवतस्य पुराणान्तर्गत्या पुराणशब्देन गृहीतस्यापि पुनर्ग्रहणं न प्रयोजनवदित्याशङ्क्य नात्र भागवतशब्देन 'ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः' इति शास्त्रोक्तं प्रसिद्धं भागवतं गृह्यते । येनाप्रयोजकत्वशङ्का । किन्तु भागवतान्तरमेव । तच्च 'पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय' इति वचनादादिभागवतमेवेति भावेनाऽह– **आदि-भागवतं मूलरूपेणेति ॥**

केचित्तु 'पुराणं भागवतम्' इत्यत्र पुराणशब्दः पुरातनार्थको नूतनभागवतव्यावर्तनायोपात्त

इति भावेन आदिभागवतमित्युक्तमित्याहुः । भारतं पञ्चरात्रं मूलरामायणमादिभागवतं चेति चत्वारो ग्रन्था व्यासनारायणहयग्रीवमूलरूपैर्यथासङ्ख्यं निर्मिता इत्युक्त्वा 'पुराणं भागवतं च' इत्यत्र पुराणशब्देनाष्टादशपुराणानां ग्रहणे भागवतशब्देन वैयर्थ्यपरिहारायाऽदिभागवतग्रहणे च भारतपञ्चरात्रमूलरामायणपुराणादिभागवतानां पञ्चानां ग्रन्थानां मध्ये भारतस्य पुराणानां च व्यासकृतत्वं सुप्रसिद्धम् । इत्तरत्तु यथाटीकं ज्ञातव्यमिति व्याख्यातवन्तः स्वामिनः । नरहरितीर्थ-श्रीमच्चरणास्तु 'अन्यावताररूपैः' इत्येतद् हयास्यकपिलादिरूपैरिति व्याख्यातवन्तः ॥

भावप्रदीपिकायां तु व्यासोऽभूत्वा मूलरूपेण च तेन व्यासरूपेण चान्यावतार-रूपैश्चेत्युक्तवा अन्यावताररूपाणि नारायणहयग्रीवादीनीति व्याख्याय मूलरूपेणाऽदिभागवतं चक्रे । पञ्चरात्रस्य वक्ता नारायणः । मूलरामायणं हयशीर्षश्चकारेत्युक्तम् ॥

## भावदीपिका

पूर्वमेतस्यार्थस्य प्रमाणोक्तत्वानुक्तेस्तच्चेत्ययुक्तमित्यतश्चशब्दो भिन्नक्रम इत्याह– **यदेतदित्यादिना ॥** नन्वधिकारेति वक्तव्येऽधीकारेति दीर्घः कुत? नियामकाभावादित्यत आह– **उपसर्गस्येति ॥** 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'। अत्र 'ढ्रलोपे पूर्वस्य दीर्घोऽण' इति पूर्वसूत्राद् दीर्घ इत्यनुवर्तते । घञन्तोत्तरपदे परेऽमनुष्येऽभिधेये प्रादेरुपसर्गस्य बहुलं दीर्घः स्यात् । परिहास, परीहासः । अमनुष्येति किम्? निषादः । तथाच प्रकृते 'कृञ् करणे' अस्मात् घञि घस्य लोपे अकारमात्रे उर्वरिते ऋवर्णस्य 'अचो ञ्णिति', ञिति णिति च प्रत्यये परेऽचामादेरचो वृद्धिः स्यादिति रपराकाररूपवृद्धौ कारशब्दस्य घञन्तस्य निष्पन्नत्वात् तस्य परतः सत्त्वान्मनुष्याभिधेयत्वाभावादधीत्युपसर्गस्य दीर्घे सति, अधीकारेति रूपम् । ननु स्त्रियादिकमिति कथम् ? स्त्री आदिकमिति स्थिते 'इको यणचि' इति यणादेशे स्त्र्यादिकमिति स्यात् । नच वाच्यम्, 'स्त्रियाः' स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे, इति ईकारस्य इयङा-देशे स्त्रियादिकमिति युक्तमिति । तत्राजादिप्रत्यये पर एवेयङो विधानात् । प्रकृते च आदीत्यस्याजादित्वेऽपि शब्दत्वेन प्रत्ययत्वाभावादत आह– **स्त्रियादिकमितीति ॥**

चशब्दादन्यावतारो भूत्वेति प्रतीयते । तथात्वे 'अन्यावताररूपैश्च' इति पुनरुक्त्यापत्तेः । अतोऽवधारणार्थश्चशब्द इत्याह– **व्यासो भूत्वैवेति ॥** एवकाराभिप्रायमाह– **विलम्बमिति ॥**

**अभूत्वेति** ॥ अत्रापि चशब्द एवार्थः । तथाच भगवान् मूलरूपी व्यासोऽभूत्वा च व्यासत्वेनानवतीर्यैव मूलरूपेणेति यावदित्यर्थः ॥

परशब्दस्य भिन्नार्थत्वं वारयति– **परमिति** ॥ फलितार्थकथनम्– **अतिशयेनेति** ॥ कोऽसौ पञ्चमो वेद इत्यस्य नेदमुत्तरमित्यतः पूरयति– **पञ्चमवेदाख्य इति** ॥ वचनव्यत्ययदोषोऽप्यनेन परिहृतो भवतीति ध्येयम् ॥ **इतीति** ॥ अयमेको विधिः, स च सम्भिन्न इति द्वितीयो विधिरिति ज्ञेयम् । भेदस्य स्वतः सिद्धत्वादाह– **एकार्थतयेति** ॥ मिश्रीभावाख्यसङ्गतत्वा-योगादेकार्थतयेत्युक्तम्, इति ग्रन्थाः सम्भिन्ना इति वाच्ये, इति शास्त्रपुङ्गवः सम्भिन्न इत्येक-वचनं कुत इत्यत आह– **इत्यनेकेष्विति** ॥ एकार्थतया सङ्गतत्वाभिप्रायेणेत्यर्थः । प्रसिद्ध-भागवतस्य व्यासकृतस्य । 'इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्' इति वेदसमत्वोक्त्या वेदादपि परत्वायोगादाह– **आदिभागवतमिति** ॥ भारतं व्यासरूपेण कृतमिति सिद्धत्वान्नोक्तम् ।

## भावप्रकाशः

**उपसर्गस्येति** ॥ उपसर्गस्य घञन्ते उत्तरपदे बहुलं दीर्घः उपसर्गघञन्तसमुदायेना-मनुष्येऽभिधेय इति सूत्रार्थः । **छान्दस इयङिति** ॥ तन्वादीनां छन्दसि बहुलमिति वार्तिकादिति भावः ॥

नन्वार्षग्रन्थे छन्दसि विहितस्य कार्यस्य कथं प्रवृत्तिः गौणमुख्यन्यायेन मुख्ये छन्दस्येव तत्प्रवृत्तेरिति चेन्न । प्रकृतवार्तिके छन्दश्शब्दस्य स्वरितत्वेन प्रतिज्ञानात् स्वरितत्वप्रतिज्ञास्थले च गौणमुख्यन्यायाप्रवृत्तेः । यथोक्तं महाभाष्ये स्वरितेनाधिकार इति सूत्रे विशेषायाधिकं कार्यमिति । स्वरितत्वप्रतिज्ञास्थले च गौणमुख्यन्यायो न प्रवर्तत इति तदर्थः । तथा च स्त्रियादिकमित्यस्यार्षत्वेन छन्दःसदृशत्वात् तत्रापि छान्दसकार्योपपत्तिरिति ।

ननु समुच्चेयाभावात् चशब्दो व्यर्थ इत्यत आह– **भूत्वैवेति** ॥ एवकारार्थमाह– **विलम्बमकृत्वेति** ॥ विजातीयव्यापारव्यवधानमकृत्वेत्यर्थः । अवतारानन्तर्यरूपविशेष-सूचकत्वात् सार्थक्यमिति भावः । नन्वेवं तर्ह्यनेनैव व्यासकृतत्वस्यापि लाभात् तेन चेति व्यर्थ-मित्यतो योजनान्तरं दर्शयति– **अभूत्वेति** ॥ तदर्थमाह– **मूलरूपेण चेतीति** ॥ चशब्दा अन्योन्यसमुच्चयार्था इति सूचयितुं मौलिकचशब्दानुवादः । ननु तेनेत्यनेन भगवत्परामर्श-

मूलरूपार्थकेन व्यासोभूत्वेत्यनेन पुनरुक्तिरित्यत आह– **तेन व्यासरूपेणेति** । मूलरूपव्यास-रूपान्यावताररूपाणामन्योन्यसमुच्चयसूचनायान्यावताररूपैश्चेत्यनुवादः ।

ननु परशब्दस्योत्तमार्थत्वात् उत्तमशब्देन पुनरुक्तिरित्यत आह– **अतिशयेनेति** ॥ इदश्च उत्तममित्यनेनान्वेतीति वक्तुमुत्तममित्यनूदितम् । ननु शास्त्रपुङ्गवो भारतादिभेदेन भिन्न इत्ययुक्तम् । 'ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम् । मूलरामायणं चैव शास्त्रमित्यभिधीयत' इत्यादिविरोधात् । अनुपयुक्तश्च कोऽसौ पञ्चमो वेद इति प्रश्नोत्तरालाभादित्यत आह– **पञ्चमवेदाख्य इति** ॥ ननु भारतादिभेदेन पञ्चमवेदस्यानेकतया पञ्चमवेदमित्येकवचनानु-पपत्तिरित्याशङ्कानिरासकतयापि व्याचष्टे– **अथवेति** ॥ ननु मूलरूपादीनां भारतादीनां च विषमसङ्ख्यत्वात् स्मृतिविरोधाच्च न यथासङ्ख्यमन्वयः । यथायोग्यमन्वयश्च दुर्ज्ञेय इत्यत आह– **अत्रेत्यादिना ॥ नारायणवतारेण कृतमिति** ॥ पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति भारतोक्तेरिति भावः । भारतोक्तं वक्तृत्वं च कर्तृत्वमेव । नारायणस्य स्वतः सर्वज्ञत्वेन सजाती-योच्चारणमनपेक्ष्योच्चारयितृत्वात् । तस्यैव च कर्तृशब्दार्थत्वात् । तेन प्रकृतसिद्धिरिति बोध्यम् ।

ननु बृहद्भाष्ये पञ्चरात्रसंहिता इत्युक्त्वा 'इदं सर्वं जगच्चैव निःसृतं तुरगाननादि'ति पञ्चरात्रस्य हयग्रीवकृतत्वोक्तेस्तद्विरोध इति चेन्न । तत्र कतिपयसंहितानामेव तत्कृतत्वोक्तेः । अत एव संहितापदप्रयोगः । अत्र पुनः सर्वस्य पञ्चरात्रस्य नारायणकृतत्वमुच्यते । अत एव कृत्स्नस्येति विशेषणम् । एवं संक्षेपविस्तराभ्यामुभयकृतत्वान्न विरोध इत्यलम् ॥

**हयग्रीवरूपेणेति** ॥ बृहद्भाष्ये हयग्रीवस्येतिहासकर्तृत्वोक्तेरितिहासपदवाच्यानां च भारत-पञ्चरात्रमूलरामायणानां मध्ये भारतस्य व्यासकृतत्वात्पंचरात्रस्य पृथगुक्तत्वान्नारायणकृतत्वाच्च परिशेषेण मूलरामायणस्यैवेतिहासपदेन ग्राह्यत्वादिति भावः ॥

रूपशब्दः स्वरूपमात्रत्वात्साधारणः । अवतारशब्दस्तु मानुषाद्याकारभगवत्प्रादुर्भाव-वाचित्वादसाधारणः । अत एव मूलरूपादिषु नावतारपदप्रयोग इति संप्रदायविदः । नन्वेवं सति नारायणहयग्रीवयोरेवान्यावताररूपशब्दार्थत्वादन्यावताररूपैरिति बहुवचनमयुक्तमिति चेन्न । कपिलमहिदासादेरपि तच्छब्दार्थत्वेन तदुपपत्तेः, कपलिो भगवानजः प्रोवाच ब्रह्मणे विद्याम् इत्यनेन महिदासाभिधो जज्ञे इत्युक्त्वा यस्तन्त्रं वैष्णवं व्यधादित्युक्त्यादिना च कपिल-

महिदासादेरपि पञ्चरात्रादिकर्तृत्वोपपत्तेः । टीकायामनेककृतस्यापि पञ्चरात्रादेरेकैककर्तृत्वोक्तिस्तु व्यासावतारप्रयोजनस्य भारतनिर्माणेनेव तत्तदवतारप्रयोजनस्य तत्तन्निर्माणेनैव पर्यवसितत्वाभिप्रायेण ॥ यद्वा भाष्ये यौ मूलरूपव्यासावुक्तौ । यौ च टीकायां विशेषवचनबलान्नारायणहयग्रीवौ निर्दिष्टौ तेषां मध्ये पञ्चरात्रादेरेकैककृतत्वमेव नानेककृतत्वमित्याशयेनेति दिक् ।

ननु पुराणशब्देनैव भागवतलाभात्पुनस्तद्ग्रहणं व्यर्थमित्याशंकां परिहरन्नेवाह– **आदिभागवतमिति ॥** इदं च द्वितीयस्कंधोक्तरीत्या यद्भगवता चतुर्मुखायोक्तं तेन च नारदाय तदेवेति केचित् । तंत्रभागवतादिवद् ग्रन्थविशेष इत्यप्याहुः । भारतं पुराणं च व्यासरूपेण कृतमिति प्रसिद्धत्वान्नोक्तमिति ध्येयम् ॥ ननूक्तरीत्या भारतादेः कपिलादिकृतत्वे पठ्यमानभारतादौ किमिदं कपिलादिकृतं व्यासकृतं वेति सन्देहापत्तिरिति चेन्न । कपिलादिकृतभारतादावुत्सन्ने वैवस्वतमन्वन्तरान्तर्गताष्टाविंशद्वापरयुगे वेदव्यासेन भारतादेः कृतत्वेन सन्देहानवकाशात् । यथोक्तं नष्टधर्मज्ञानलोकेत्यादि । क्रमश्च कपिलादिकृतभारतादिक्रमसदृश एव । सर्गे सर्गेन्यथैव तु इति सृष्टिकाल एवान्यथात्वोक्तेः । द्वापरादेश्च सृष्टिकालत्वाभावादित्यन्यदेतत् ।

**भाष्यम्–** **'ब्रह्मापि तन्न जानाति ईषत्सर्वोऽपि जानति ॥**
**बह्वर्थमृषयस्तत्तु भारतं प्रवदन्ति हि ॥' इत्युपनारदीये ।**

**'ब्रह्माद्यैः प्रार्थितो विष्णुर्भारतं सञ्चकार ह ॥**
**यस्मिन् दशार्थाः सर्वत्र न ज्ञेयाः सर्वजन्तुभिः ॥' इति नारदीये ।**

## भावप्रदीपिका

भारतस्यावगाह्यानवगाह्यत्वे प्रमाणम् **ब्रह्मापीति ॥** परोक्षार्थत्वे प्रमाणम् **ब्रह्माद्यैरिति ॥**

## प्रमेयदीपिका

**ब्रह्माऽपि** बृहस्पतिरपि (इत्येके)। 'कृत्स्नम्' इति शेषः । **सर्वोऽपि** जनो **जानति** जानाति । **बह्वर्थमिति प्रवदन्ति ॥**

## भावदीपः

**ब्रह्माऽपि** इत्यपिपदेन समुच्चेयमाह– **ब्रह्मा बृहस्पतिरपीत्येके ॥** प्राज्ञास्तु 'ब्रह्मा' इत्यनुवादेन 'बृहस्पतिरपि' इत्यर्थोक्तिरित्याहुः। उक्तं हि तृतीयस्कन्धतात्पर्ये सप्तविंशाध्याये 'ब्रह्मा बृहस्पतिरित्यादीति' इत्याहुः ॥ 'तन्न जानाति' इत्यत्रोत्तरवाक्याविरोधाय शेषमाह– **कृत्स्नमिति शेष इति ॥**

## वाक्यार्थप्रदीपः

ननु ज्ञा अवबोधन इत्यतो लटि तस्य तिपि क्र्यादिभ्यश्श्नेति विकरणप्रत्यये ज्ञाजनोर्जेति जादेशे जानातीत्येकवचनेन भवितव्यम् । जानतीति तु कथमित्यतः च्छान्दसोऽयं ह्रस्व इत्याशयेनाह– **जानातीति ॥**

## भावरत्नकोशः

'ब्रह्माऽपि तन्न जानाति' इत्ययुक्तम् । 'दुर्विज्ञेयमतः सर्वैर्भारतं तु सुरैरपि' इति सर्वावेद्यार्थत्वमभिधाय सकर्तृकत्वस्य साधिकारिकत्वस्य च सम्पत्तये 'स्वयं व्यासो हि तद्वेद ब्रह्मा वा तत्प्रसादतः' इति भारतार्थस्याऽपादितभगवत्प्रसादेन ब्रह्मणा चतुर्मुखेन ज्ञातव्यत्वाभिधानादित्यत आह– **ब्रह्मा बृहस्पतिरिति ॥** 'बृहस्पतिः पुरोधाश्च ब्रह्मा च ब्रह्मणस्पतिः' इति तृतीयतात्पर्योक्तेर्नात्र ब्रह्मशब्देन चतुर्मुखो गृह्यते । येनोक्तानुपपत्तिः स्यात् । किन्तु बृहस्पतिरेवेति भावः । तथा च तैत्तिरीयब्राह्मणे 'बृहस्पतिर्देवानां ब्रह्मा । अहं मनुष्याणाम्' इति ॥ अनेनैव अपिपदसमुच्चेयं वक्तुं बृहस्पतिरपीति टीकोक्तिः । अन्यथा ब्रह्मशब्दार्थमात्रवर्णनाभिप्रायेऽपिपदानुवादो व्यर्थ इति व्याचक्षाणाः परास्ता इति स्वामिनः । तेषामयं भावः। ब्रह्मेत्यनुवादेन बृहस्परितिरिति व्याख्यानम् । समुच्चेयाभिधानाभिप्राये रुद्रादिरपीत्युक्तिप्रसङ्गात् । 'ब्रह्मा वा तत्प्रसादतः' इत्युक्तप्रमाणविरोधाच्च । अपिपदानुवादस्तु न तस्य यत्र काप्यन्वयोऽपि तु यथान्यासमिति वक्तुमिति ॥ यद्यपीन्द्रादयोऽपि न भारतार्थं कृत्स्नं जानन्ति । तथाऽपि 'बृहस्पतिसमौ मतौ' इत्यादिलोकप्रसिद्ध्यनुसारेण बृहस्पतौ महामतिमत्तामभ्युपगम्योक्ततात्पर्यवचनेन ब्रह्मशब्दस्य तत्र रूढिमङ्गीकृत्य च भाष्ये बृहस्पतिरभिसंहितः । अपिपदं तु इतरे न जानन्तीति किमु वक्तव्यमित्येतत्तात्पर्यकमिति भावेन टीकायामेवमुक्तम् ॥

ननु बृहस्पतिर्न जानातीत्यप्ययुक्तम् । 'ईषत् सर्वोऽपि जानति' इत्युत्तरवाक्यविरोधादित्यत आह– **कृत्स्नमिति शेष इति ॥** ननु स्वयं व्यासो वेद । तत्प्रसादेन चतुर्मुखोऽपि वेदेति व्यासचतुर्मुखयोः कृत्स्नार्थवेदनावेदनेनेषदित्युक्त्यनुपपत्तिरित्यत आह– **सर्वोऽपि जन इति ॥** इतरो जननादिदोषवदधिकारिवर्ग एवेषज्जानाति । न पुनर्व्यासचतुर्मुखावप्यपिपदसमुच्चेयाविति भावः ॥

'ज्ञा अवबोधने' इत्यस्य जाभावे श्नाविकरणे जानातीत्येव रूपम् । विकरणह्रस्वता तु छान्दसीति भावेनाऽह– **जानति जानातीति ॥** केचित्तु जानते इति पठित्वा तत्र वचनव्यत्यय-श्छान्दस इति जानातीति व्याख्यानमित्याहुः ॥

ननु 'बह्वर्थमृषयस्तत्तु भारतम्' इत्यत्र यद् बह्वर्थग्रन्थजातं तद् भारतं प्रवदन्तीति प्रतीय-मानमनुपपन्नम् । 'अनन्तार्थविशेषिणो वेदाः' इत्यादौ 'अनन्तोऽर्थः प्रकटितस्त्वयाऽणौ भाष्य-सङ्ग्रहे' इत्यादौ च वेदादेरपि बह्वर्थत्वावेदनेन भारतत्वप्रसङ्गात् । अतो वक्तव्यं भारतं बह्वर्थं प्रवदन्तीति सम्बन्ध इति ॥ तत्र शङ्क्यते । भारतं बह्वर्थयुक्तं प्रवदन्तीत्युक्ते बहवोऽर्था ऋषिभि-र्ज्ञातव्याः स्युः । तदज्ञाने तत्प्रवदनस्यायोगात् । विशिष्टगामिनो विधेर्विशेषणेऽपि प्रसरस्य लम्बकर्णमानयेत्यादौ दृष्टेः । तथा च 'ईषत् सर्वोऽपि जानति' इति स्ववचनविरोध इत्यत आह– **बह्वर्थमिति प्रवदन्तीति ॥**

एवमितिशब्दमध्याहरता भारतप्रवदने बह्वर्थत्वं प्रकार इत्युक्त्या भारते बहवोऽर्थास्सन्ति, तांश्च सर्वज्ञो भगवान् आपादितवेदव्यासप्रसादो विरिञ्चो वा जानीयादिति प्रवदन्तीत्यतो नोक्तविरोध इत्युक्तं भवति ।

## भावदीपिका

ब्रह्मशब्देन चतुर्मुखग्रहणे 'स्वयं व्यासो हि तद् वेद ब्रह्मा वा तत्प्रसादत' इति वचन-विरोधपरिहाराय ब्रह्मशब्दार्थमाह– **ब्रह्मेति ॥** ब्रह्मशब्दस्य बृहस्पतिवाचित्वं च 'यस्मिन् ब्रह्मा राजनि पूर्व एति' इति वैदिकप्रयोगसिद्धमिति भावः । अपिशब्दस्तु उपनारदीयग्रन्थे पूर्वप्रकृत-समुच्चायक इति द्रष्टव्यम् । ननु तर्हि भारतस्य देवैरवगाह्यार्थत्वोक्तिविरोध इत्यत आह– **कृत्स्नमिति ॥** तत् कृत्स्नं भारतोक्तं प्रमेयमित्यर्थः । सर्वशब्दः सङ्कुचितवृत्तिरित्याह– **जन इति ।**

## भावप्रकाशः

ननु ब्रह्मापि तन्न जानातीत्ययुक्तम् । स्वयं व्यासो हि तद्वेद ब्रह्मा वा तत्प्रसादत इति वाक्यविरोध इत्यत आह– **बृहस्पतिरपीति ॥** बृहस्पतिः पुरोधाश्च ब्रह्मा च ब्रह्मणस्पतिरिति तृतीयस्कन्धतात्पर्योक्तेरिति भावः । ननु बृहस्पतिर्न जानातीत्ययुक्तम् । ईषत्सर्वोपि जानतीत्यग्रिमवाक्यविरोधादित्यत आह– **कृत्स्नमिति ॥ शेष इति ॥** सर्वोपीषज्जानातीत्ययुक्तमीश्वरे बाधादित्यत आह– **जन इति ॥** जानतीत्यत्र विकरणह्रस्वत्वमार्षमिति भावेनाह– **जानातीति ॥** ननु ऋषयो बह्वर्थं भारतं प्रवदन्तीत्ययुक्तं विशिष्टस्य यद्भवति तद्विशेषणस्यापि भवतीतिन्यायेन बह्वर्थानां च कथनप्राप्तौ ईषत्सर्वोपि जानतीत्युक्तविरोधात्, बह्वर्थज्ञानाभावे तत्कथनस्य दूरापास्तात् । नच भारतं बह्वर्थं प्रवदन्तीति कथने प्रकारप्रदर्शनाय बह्वर्थमिति विशेषणामिति वाच्याम्, प्रकारवाचिशब्दाभावादित्यत आह– **बह्वर्थमिति प्रवदन्तीति ॥**

**भाष्यम्– 'भारतं चापि कृतवान् पञ्चमं वेदमुत्तमम् ।**
**दशावरार्थं सर्वत्र केवलं विष्णुबोधकम् ।**
**परोक्षार्थं तु सर्वत्र वेदादप्युत्तमं तु यत् ।' इति स्कान्दे ।**

## भावप्रदीपिका

वेदोत्तमत्वभगवत्परत्वपरोक्षार्थत्वेषु प्रमाणं **भारतं चापीति ॥**

## प्रमेयदीपिका

भारतं चापीति पूर्वोक्तेन समुच्चयः ॥ दश अवरा येषु ते तथा । तेऽर्थाः यस्येति विग्रहः ॥

याजकादेराकृतिगणत्वाद् 'विष्णुबोधकम्' इति समासः । करणार्थघञन्तेन वा समासः। पश्चादल्पाद्यर्थे कः ॥ उत्तममित्युक्तस्यैव विवरणम्– **वेदादप्युत्तममिति ॥** एषु वाक्येषु यथासम्भवं पूर्वोक्तार्थोऽवगन्तव्यः ॥

## भावबोधः

**पूर्वोक्तेन समुच्चय इति ॥** स्कान्द एव पूर्वोक्तेनेत्यर्थः । दशभ्योऽवरा इति प्रतीति-

निसायार्थमाह– **दाश अवरा येष्विति** ॥ याजकादेरिति ॥ तेन तृजकेत्यस्यापवादादिति भावः । **घञन्तेनेति** ॥ 'बुध अवगमे' इत्यतः बुध्यतेऽनेनेति करणे घञि 'लघूपधगुणे च बोध' इति घञन्तेन विष्णोर्बोध इति विगृह्य विष्णुबोध इति समास इत्यर्थः । **विवरणमिति** वेदादित्यवध्युक्तेरिति भावः । **यथासम्भवमिति** ॥ लोकेशा ब्रह्मरुद्राद्याः प्रार्थयामासुर्देवेशं पुरुषोत्तममित्यनेन 'ब्रह्माद्यैः प्रार्थितो विष्णुः' इत्यनेन च ब्रह्मरुद्रेन्द्रादिभिरर्थित इत्यस्य, संसारे क्लेशिनामित्यनेन संसारे क्लिश्यमानानामित्यस्य, वेदार्थाज्ञमित्यनेन वचनवृत्त्युपलक्षणाभ्यामिष्टा-निष्टप्राप्तिपरिहारसाधनादर्शनाद्वेदार्थाज्ञानाच्चेत्यस्य, अधिकारवर्जितं स्त्रियादिकमित्यनेन वेदा-नधिकारिणां स्त्रीशूद्रादीनां चेत्यस्य, अवेक्ष्येत्यनेन अवलोक्योत्पन्नकृपैरिति यावदित्युक्तप्रकारेण नष्टधर्मज्ञानलोककृपालुभिरित्यस्य, ततः प्रसन्न इत्यनेन ज्ञानप्रदर्शनायेत्यस्य, भगवान् व्यासो भूत्वेत्यनेन भगवान् व्यासोऽवततारेत्यस्य अवधारणार्थकचशब्दशिरस्कभूत्वेत्यनेन विलम्बम-कृत्वेत्यर्थकेन अवतारानन्तरमेवेत्यर्थकस्य ततश्चेत्यस्य, 'वेदानुक्तार्थभूषितम्' 'केवलेनात्मबोधेन दृष्टमित्यनेन तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तामित्यस्य, वेदार्थसंयुतमित्यनेन सर्ववेदाद्यर्थोप-बृंहितामित्यस्य, वेदादपि परमित्यनेन तदनुक्तेत्यनेन अर्थाल्लब्धस्य वेदोत्तममित्यस्य, ब्रह्मापि तन्न जानातीत्यनेन श्लोकेन सर्वप्राणिनामवगाह्यानवगाह्यस्वरूपामित्यस्य, तस्मिन्दशार्थास्सर्वत्र न ज्ञेया इत्यनेन दशावरार्थं सर्वत्रेत्यनेन चानवगाह्यस्वरूपामित्यस्य, केवलं विष्णुबोधक-मित्यनेन केवलभगवत्स्वरूपपरामित्यस्य, परोक्षार्थमित्यनेन परोक्षार्थामित्यस्य, 'भारतं चक्रे' 'भारतं स चकार ह' 'भारतं चापि कृतवान्' इत्यनेन महाभारतसंहितामचीक्लृपदित्यस्य, समानार्थेति यथासम्भवमित्यर्थः ॥

## भावदीपः

**पूर्वोक्तेनेति** ॥ स्कान्दपुराण एव पुराणादिग्रन्थानुक्त्वा पश्चाद् '**भारतं चापि**' इत्युक्तत्वात् तेन समुच्चय इत्यर्थः ॥

'कर्तरि च' (पा.सू.२.२.१६) इति सूत्रे 'कर्त्रर्थकतृजकाभ्यां योगे या कर्मणि षष्ठी सा न समस्यते' इत्युक्तेः कथं 'विष्णुबोधकम्' इति षष्ठीसमासः? इत्यत आह– **याजकादेरिति** ॥ द्वितीयाध्यायद्वितीयपादे 'याजकादिभ्यश्च' (पा.सू.२.२.९) इति सूत्रे याजकादिशब्दैः षष्ठी

समस्यत इति प्रतिप्रसवात् तस्य आकृतिशब्दितस्वभावसिद्धगणवत्वादयमपि शब्दः तन्मध्ये बोध्यत इति भावः । वृत्त्यादावाकृतिगणत्वानुक्तेराह– **करणार्थ इति।।** बुद्ध्यतेऽनेनेति व्युत्पत्त्या 'बुध अवगमने' (पा.धा.११७२) इत्यतः 'अकर्तरि च कारके सञ्ज्ञायाम्' (पा.सू. ३.३.१९) इत्यनेन घञ्प्रत्यये 'पुगन्त'(पा.सू.७.३.८६) इति गुणे अवबोध इति सिद्धे विष्णोर्बोधः विष्णुबोधः । अल्पो विष्णुबोधो विष्णुबोधक इति रूपसिद्धेरिति भावः ।।

पञ्चमे तृतीयपादे 'अल्पे'(पा.सू.५.३.८५) इति सूत्रे अल्पत्वविशिष्टेऽर्थे कप्रत्ययो भवतीत्युक्तेः,अल्पं तैलं तैलकमित्यादाविव भगवद्विषयाल्पज्ञानजनकमित्यर्थः । आदिपदात् स्वार्थ इति ग्राह्यम् ।। **विवरणमिति** ।। 'वेदात्' इत्यवध्युक्तेः । अतो न पुनरुक्तिरिति भावः ।। **यथासम्भवमिति** ।। 'लोकेशा ब्रह्मरुद्राद्याः, प्रार्थयामासुः देवेशं पुरुषोत्तमम्' इत्यनेन 'ब्रह्माद्यैः प्रार्थितो विष्णुः' इत्यनेन च 'ब्रह्मरुद्रादिभिरर्थितः' इत्यस्यार्थः; 'संसारे क्लेशिनम्' इत्यनेन 'संसारे क्लिश्यमानानाम्' इत्यस्य; 'वेदार्थाज्ञम्' इत्यनेन च 'इष्टानिष्ट' इत्यादि 'वेदार्था-ज्ञानाच्च' इत्यन्तस्य; 'अधीकारवर्जितम्' इत्यनेन 'वेदानधिकारिणाम्' इत्यादेः;'अवेक्ष्य' इत्यनेन 'अवलोक्योत्पन्नकृपालुभिः' इत्यस्य; 'ततः प्रसन्नः' इत्यादिना 'ज्ञानप्रदर्शनाय' इत्यस्य; 'भगवान् व्यासो भूत्वा' इत्यनेन 'व्यासोऽवततार' इत्यस्य, 'व्यासो भूत्वैव' इत्यनेन; ('भूत्वा'इत्यनेन च)'ततश्च' इत्यस्य; 'वेदानुक्तार्थभूषितम्' इत्यादिना 'तदनुक्त' इत्यादेः; 'वेदार्थसंयुतम्' इत्यनेन 'सर्ववेदार्थ' इत्यादेः; 'ब्रह्मापि तन्न जानाति' इत्यादिना, 'यस्मिन् दशार्थाः' इत्यादिना च 'सर्वप्राणिनामनवगाह्य' इत्यादेः;'केवलं विष्णुबोधकम्' इत्यनेन 'केवलभगवत्' इत्यस्य; 'परोक्षार्थम्' इत्यनेन 'परोक्षार्थम्' इत्यस्य 'अर्थ उक्तः' इत्यादिरूपेण ध्येय इत्यर्थः ।।

## वाक्यार्थप्रदीपः

ननु बुध इत्यतो ण्वुलि तस्याकादेशे लघूपधगुणे च निष्पन्नबोधकशब्दस्य कर्त्रर्थकाक-प्रत्ययान्तत्वेन तद्योगे जयादित्यमतेन कर्तरि चेति वा यौक्तमतेन तृजकाभ्यां कर्तरीति वा षष्ठीसमासनिषेधात् कथं विष्णुबोधकमिति षष्ठीसमास इत्यतः ताभ्यां कृल्लक्षणषष्ठीसमासस्यैव आकरे निषेधस्थित्या शेषषष्ठीसमासनिषेधेन तत्समाससम्भवादिति सत्येव समाधाने

षष्ठीसमासमात्रनिषेधकत्वं तयोरभ्युपेत्य याजकादिभ्यश्चेति प्रतिप्रसवान्न तदनुपपत्तिरिति समाधत्ते– **याजकादेरिति ॥**

> 'स्युर्याजकोद्वर्तककर्तृकारकाः प्रयाजकोत्सादकभर्तृवर्तकाः ।
> अध्यापकस्नापकगोप्तृपूजकाः' इति

गणपाठे बोधकशब्दस्यापठितत्वेन तेन प्रतिप्रसवानुपपत्तिशङ्कापरिहाराय आकृतिगणत्व-पर्यन्तं धावनमिति द्रष्टव्यम् । अस्मिन् पक्षे पठितगणस्याकृतिगणत्वमाश्रयणीयं भवतीत्य-परितोषात् पक्षान्तरमाह– **करणार्थेति ॥** बुद्ध्यतेऽनेनेति बोध इति करणे धञि लघूपदगुणे च निष्पन्नबोधशब्दस्य विष्णुशब्देन षष्ठीसमास इत्यर्थः । तथा च कर्तरि चेति वा तृजकाभ्यामिति वा न षष्ठीसमासनिषेधप्रसक्तिरपीति भावः । नन्वत्र पक्षे विष्णुबोध इत्येव रूपापत्त्या विष्णु-बोधकमित्यस्यानुपपत्तिप्रसङ्गात् तदुपपत्तये ण्वुल एवाश्रयणीयत्वादुक्तनिषेधतादवस्थ्यमित्यतः अन्यथाऽपि तदुपपत्तिमाह– **पश्चादल्पाद्यर्थ इति ॥** आदिपदेनाज्ञाताद्यर्थपरिग्रहः । तथा चाल्पो विष्णुबोध इति अल्पार्थे अज्ञातो विष्णुबोध इति अज्ञातार्थे वा विष्णुबोध एवेति स्वार्थे वा कप्रत्यये विष्णुबोधकशब्दनिष्पत्तिरिति भावः ॥

## भावरत्नकोशः

पुराणान्तरस्थे 'भारतं चापि कृतवान्' इति श्लोके समुच्चायकेन चापीत्यनेन भाष्योदाहृत-नारायणाष्टाक्षरकल्पप्रकृतपुराणादेः समुच्चयव्याख्यानस्याचतुरस्रत्वात् समुच्चेयमाह– **पूर्वोक्ते-नेति ॥** स्कान्दपुराण एव पूर्वोक्तेन व्यासकृतग्रन्थान्तरेणेत्यर्थः । 'दशावरार्थम्' इत्यत्र दशभ्योऽवरा दशावरा इति व्याख्याने 'यस्मिन् दशार्थाः सर्वत्र' 'दशार्थाः सर्वभारते' इत्यादि-स्मृतिविरोध इत्यत आह– **दशावरा येष्विति ।** दशाधिका बहवोऽर्था भारते सन्ति । अवरपक्षे दशार्थत्वम् । न तु दशार्थेभ्यो न्यूनार्थत्वं द्रष्टव्यम् । 'यस्मिन् दशार्थाः सर्वत्र' 'दशार्थाः सर्वभारते' इत्यादिवचनान्यप्युक्ततात्पर्याणि व्याख्यातव्यानीति भावः ॥

यद्यपि 'भारतार्थस्त्रिधा प्रोक्तः' इति निर्णये भारतस्यार्थत्रयवत्त्वं प्रतीयते । तथाऽपि तत्रैव 'मन्वादि केचिद् ब्रुवते ह्यास्तीकादि तथाऽपरे । तथोपरिचराद्यन्ये भारतं परिचक्षते । धर्मो भक्त्यादिदशकः' इत्यादिना मन्वास्तिकौपरिचररूपसर्वप्राण्यवगाह्यानवगाह्यरूपार्थत्रयविवक्षया

'भारतार्थस्त्रिधा प्रोक्तः' इत्युक्तम् । अत्र पुनरौपरिचररूपसर्वप्राण्यनवगाह्यार्थविवक्षयैव भारतस्थानि सर्वाण्यपि पदानि प्रत्येकं भगवत्सामर्थ्यमभिदधति दशार्थानीत्युच्यते । तथा चोक्तम्–

'नारायणस्य नामानि सर्वाणि वचनानि तु । तत्सामर्थ्याभिधायीनि' इति ॥

अतो न विरोधः । अत एव 'यस्मिन् दशार्थाः सर्वत्र न ज्ञेयाः सर्वजन्तुभिः' इत्युक्तमित्याहुः । यस्येत्यनन्तरं तदिति शेषः । तस्य च 'दशावरार्थम्' इति भाष्येण सम्बन्धः ॥

नन्वेवं विग्रहप्रदर्शनं दशार्थापेक्षयाऽधिकार्थत्वे युक्तं स्यात् । तदेव कथमिति चेदुच्यते । भारतान्तर्गतविष्णुसहस्रनाम्नां 'विष्णोः सहस्रनामापि निरन्तरशतार्थकम्' इति वचनेन शतार्थत्वावेदनात् 'सहस्रनामतस्तुल्यं रामनाम वरानने' इति रामनाम्नः सहस्रनामसमसङ्ख्यार्थत्वावेदनाच्च दशार्थाधिकार्थत्वं युक्तमिति ॥

ननु 'विष्णुबोधकम्' इत्यत्र अन्यसमासानुशासनाभावात् षष्ठीतत्पुरुषसमास इति वक्तव्यम्। नैवं युज्यते । बोधकमित्यस्य बुधेः कर्तर्येव निष्पन्नतया 'तृजकाभ्यां कर्तरि' कर्त्रर्थकतृजकाभ्यां षष्ठी न समस्यते, अपां स्रष्टा, सतामर्चक इति निषेधादित्यत आह– **याजकादेरिति ॥** यद्यपि याजकादिगणो वृत्तौ पठितः । तथाऽपि 'प्रयोगप्राचुर्यदर्शनं तद्विशेषकम्' इति महाभाष्यप्रयोगस्य 'जनिकर्तुः प्रकृतिः', 'तत्प्रयोजको हेतुश्च' इति निर्देशेन 'तृजकाभ्याम्' इति निषेधस्य अनित्यत्वज्ञापनात् समास इति कैयटेन समर्थितत्वात् कैयटवचनं चाऽऽकृतिगणत्वज्ञापकमिति भावेन 'आकृतिगणत्वात्' इत्युक्तमित्याहुः । उपलक्षणमेतत् । शेषषष्ठ्या समासे न कोऽपि दोषः । तृजकाभ्यामित्यनेन कर्मणि या षष्ठी तस्याः समासनिषेधात् । अत एव 'ब्राह्मणकारकम्' इति भाष्ये शेषषष्ठ्या समास इति कैयट इति च समाधानमवधातव्यम् ॥

आकृतिगणत्वस्य प्रसाध्यत्वादधुनातनवैयाकरणैरनङ्गीकाराच्च पक्षान्तरमाह– **करणार्थेति ॥** बुध अवगमन इति धातोर्बुद्ध्यतेऽनेनेति करणार्थे 'हलश्च' इति घञ्प्रत्यये लघूपधलक्षणे गुणे च लेख इतिवन्निष्पन्नेन बोधशब्देन विष्णुशब्दस्य षष्ठीसमास इत्यर्थः ॥

ननु 'हलः' इति सूत्रे 'पुंसि सञ्ज्ञायाम्' इति सूत्रात् सञ्ज्ञायामित्यनुवर्तते । अत एव

लेखो वेद इत्युदाहृतम् । न चायं बोधशब्दः सञ्ज्ञा । तत्कथमत्र तेन घञ् भविष्यतीति चेन्न । 'अवे तृस्त्रोर्घञ्' इति पूर्वसूत्रवृत्तौ कथमवतारो नद्याः ? न हीदं सञ्ज्ञेत्याक्षिप्य 'घः प्रायेण' इत्यतः प्रायेण ग्रहणानुवृत्तेरसञ्ज्ञायामपि भवतीति समाधानेनेहाप्यसञ्ज्ञायामपि घञुपपत्तेरिति केचित् । अन्ये तु 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादसञ्ज्ञायामपि घञ् भविष्यतीत्याहुः । 'अकर्तरि च कारके सञ्ज्ञायाम्' इति करणे घञ् ।। यद्यपि सञ्ज्ञायां प्रत्ययः शिष्टः । तथाऽपि चकारस्य सञ्ज्ञाव्यभिचारार्थत्वान्नानुपपत्तिरिति स्वामिनः । करणार्थकघञन्तेनेत्यपि पाठो दृश्यते । नन्वेवं प्रत्ययाङ्गीकारे ण्वुलोऽभावात् कथं बोधकमिति श्रवणमित्यत आह– **पश्चादिति ।।** घञ्प्रत्ययान्ततया परिनिष्ठितादिति यावत् । अल्पाद्यर्थे अल्पाज्ञाताद्यर्थे । 'अल्पे', 'अज्ञाते' इति सूत्रद्वयविहितकप्रत्यय इत्यर्थः । भारतेनापि न विष्णुमहिमानोऽशेष-विशेषाकारेण प्रतिपादयितुं शक्याः । 'अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कथञ्चन' इत्यादेः सामान्येन बोधनाभिप्रायकत्वात् । बोध्यमानाश्च विशेषाः सर्वप्राणिनामनवगाह्या इति ज्ञापनाय कप्रत्ययाश्रयणादिति भावः । आदिपदेन स्वार्थ इति ग्राह्यम् । अस्मिन् पक्षे क इत्यस्य 'न सामिवचने' इति ज्ञापकसिद्धः कप्रत्यय इत्यर्थः इति स्वामिनः ।।

अत्र सर्वत्र पक्षे 'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति बोधशब्दस्य घञन्ततया बोधकशब्दस्यापि पुंस्त्वेन भाव्यमिति शङ्का 'क्वचिदतिवर्तते च । गुडकल्पा यवागूः' इति भाष्यकारवचनादभिधेयलिङ्गतया बोधकमिति नपुंसकत्वमिति परिहरणीया । वृत्तावपि 'कुटीशमीशुण्डाभ्यो रः' इत्यत्र ह्रस्व इत्यनुवर्त्य ह्रस्वा कुटी कुटीरः शुण्डार इत्युदाहृत्य 'स्वार्थिकत्वेऽपि प्रत्ययस्य पुंलिङ्गता लोकाश्रयत्वाल्लिङ्गस्य' इत्युक्तम् । ततोऽपि नपुंसकत्वं युक्तमिति ।। क्वचित्तु स्वार्थे क इति पाठः ।

भगवद्बोधनं च न सङ्कीर्णतया । अपि तु निकृष्टतयेति ज्ञापनाय केवलमित्युक्तं भाष्ये । परोक्षार्थम् अत्यन्तगूढार्थम् ।। **विवरणमिति ।।** वेदादित्यवध्युक्तेर्विवरणत्वम् । तच्चोत्तमत्व-मुक्तमप्यौपचारिकमिति शङ्काव्युदासार्थमिति न पुनरुक्ततेति भावः । एतेषु वाक्येषु 'लोकेशा ब्रह्मरुद्राद्याः' इत्यादि 'वेदादप्युत्तमं तु यद्' इत्यन्तेषु वचनेषु पर्यालोचितेष्वित्यर्थः । **यथा-सम्भवमिति ।।** 'लोकेशा ब्रह्मरुद्राद्याः प्रार्थयामासुर्देवेशं पुरुषोत्तमम्' इत्यनेन, 'ब्रह्माद्यैः प्रार्थितो विष्णुः' इत्यनेन च 'ब्रह्मरुद्रेन्द्रादिभिरर्थितः' इत्यस्य, 'संसारे क्लेशिनं जनम्' इत्यनेन

'संसारे क्लिश्यमानानाम्' इत्यस्य, 'वेदार्थाज्ञम्' इत्यनेन 'इष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद् वेदार्थाज्ञानाच्च' इत्यस्य, 'अधिकारवर्जितं च स्त्रियादिकम्' इत्यनेन 'वेदानधिकारिणां स्त्री-शूद्रादीनां च' इत्यस्य, 'अवेक्ष्य' इत्यनेन 'अवलोक्योत्पन्नकृपैः' इत्युक्तप्रकारेण 'नष्टधर्मज्ञान-लोककृपालुभिः' इत्यस्य, 'ततः प्रसन्नः' इत्यनेन 'ज्ञानप्रदर्शनाय' इत्यस्य, 'भगवान् व्यासो भूत्वा' इत्यनेन 'भगवान् व्यासोऽवततार' इत्यस्य अवधारणार्थकचशब्दशिरस्केन 'भूत्वा' इत्यनेनावतारानन्तरमेवेत्यर्थकस्य 'ततश्च' इत्यस्य, 'वेदानुक्तार्थभूषितम् । केवलेनाऽत्मबोधेन दृष्टम्' इत्यनेन 'तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्ताम्' इत्यस्य, 'वेदार्थसंयुतम्' इत्यनेन 'सर्व-वेदाद्यर्थोपबृंहिताम्' इत्यस्य, 'वेदादपि परम्' इत्यनेन 'तदनुक्तेः' इत्यस्य, 'ब्रह्माऽपि तन्न जानाति' इत्यादिना 'सर्वप्राणिनामवगाह्यानवगाह्यरूपाम्' इत्यस्य, 'यस्मिन् दशार्थाः सर्वत्र न ज्ञेयाः सर्वजन्तुभिः । दशावरार्थं सर्वत्र' इत्यनेन 'अनवगाह्यरूपाम्' इत्यस्य, 'ईषत् सर्वोऽपि' इत्यनेन 'अवगाह्य' इत्यस्य, 'केवलं विष्णुबोधकम्' इत्यनेन 'केवलभगवत्स्वरूपपराम्' इत्यस्य, 'परोक्षार्थम्' इत्यनेन 'परोक्षार्थाम्' इत्यस्य, 'भारतं चक्रे', 'भारतं स चकार ह', 'भारतं चापि कृतवान्' इत्यनेन 'महाभारतसंहितामचीक्लृपत्' इत्यस्य चावगमाद् यथासम्भवं सर्वोऽपि पूर्वोक्तार्थः प्रमाणसंवादीति भावः ॥

## भावदीपिका

**पूर्वोक्तेनेति ॥** स्कान्दपुराण एव पूर्वोक्तेनेत्यर्थः । दशभ्योऽवरा इति प्रतीति-वारणायाऽह– **दशेति ॥** येषु अर्थेषु तेऽर्था तथा दशावराः ॥ ननु बुध अवबोधनेऽस्मात् कर्तरि ण्वुल्प्रत्यये 'युवोरनाकौ' इत्यकादेशे गुणे च सति बोधकेति रूपम् । तथाच 'तृजकाभ्यां कर्तरि' कर्त्रर्थतृजकाभ्यां योगे षष्ठी न समस्यते । अपां स्रष्टा, सतामर्चक, इतिवद् विष्णो-र्बोधकमित्येव स्यान्न तु विष्णुबोधकमिति षष्ठ्या समास इत्यत आह– **याजकादेरिति ॥** 'याजकादिभिश्च' याजकादिभि षष्ठीः समस्यते । द्विजस्य याजको द्विजयाजक इति प्रतिप्रसवा-दत्रापि षष्ठ्या समासो युक्त इति भावः । याजकादिगणे पाठाभावादुक्तम्– **याजकादेरा-कृतिगणत्वादिति ॥** एवमाकृत्या एवमाकारेण ये शब्दास्ते सर्वेऽप्येतद्गणस्था इत्याकृति-गणशब्दार्थ इत्याहुः ॥

**करणार्थेति ॥** बुध अवगमने अस्मात् बुध्यतेऽनेनेति करणे घञि घस्य लोपे उपधाभूतस्योकारस्य लघुत्वेन 'पुगन्तलघूपधस्य च' इति लघूपधगुणे बोधेति रूपम् । तथाच करणार्थघञन्तेन बोधशब्देन षष्ठ्यन्तविष्णुशब्दस्य समासोपपत्तिरिति भावः । कप्रत्ययवैयर्थ्य-माशङ्क्याऽह– **पश्चादिति ॥** करणार्थघञन्तशब्देन समासानन्तरम् । आदिपदादज्ञात-कुत्सितयोर्ग्रहणम् । 'प्रागिवात् क' । 'इवे प्रतिकृतौ' इत्यतः प्राक् कप्रत्ययाधिकार इत्युक्त्वा, 'अल्पे' अल्पार्थे प्रागधिकृतकप्रत्ययः स्यात् । अल्पो वृक्षो वृक्षकः । 'अज्ञाते' सम्बन्धि-तयाऽज्ञातेऽर्थे कः स्यात् । कस्यायमश्वोऽश्वकः । 'कुत्सिते' कुत्सितार्थे कः स्यात् । कुत्सि-तोऽश्वः, अश्वकः । एवञ्च प्रकृतेऽल्पार्थे कप्रत्ययेऽल्पो विष्णोर्बोधो यस्मात् तद् विष्णुबोधक-मित्यर्थो द्रष्टव्यः ॥

ननु अल्पाद्यर्थ इत्युक्तत्वाद् अज्ञाताद्यर्थोपपादनं कथमिति चेन्न । अज्ञाताद्यर्थोपपादनाय नात्राऽदिपदम् । किं नाम ? वस्तुत अल्पाद्यर्थे कप्रत्ययो विहितोऽस्ति । सोऽत्रैकस्मिन्नर्थे उपपादनीय इत्यर्थात् । एवञ्च प्रकृते 'अल्पे' इति सूत्रेणाल्पार्थ एव कप्रत्ययो द्रष्टव्य इत्याहुः । वस्तुतस्तु आदिपदात् स्वार्थे कप्रत्ययो ग्राह्यः । तथाच विष्णुर्बुध्यतेऽनेनेति विष्णुबोधं, विष्णुबोधमेव विष्णुबोधकमिति विग्रहो द्रष्टव्यः **॥ विवरणमिति ॥** अत्र वेदादित्य-वधिकथनादिति भावः ॥

**यथासम्भवमिति ॥** लोकेशा ब्रह्मरुद्राद्याः, प्रार्थयामासुर्देवेशं पुरुषोत्तममित्यनेन संसारे क्लिश्यमानानामित्यस्य, वेदार्थाज्ञमित्यनेन वेदार्थाज्ञानाच्चेत्यस्य, अधीकारवर्जितं च स्त्रियादिक-मित्यनेन वेदानधिकारिणां स्त्रीशूद्रादीनाञ्चेत्यस्य, अवेक्ष्येत्यनेन अवलोक्योत्पन्नकृपैरिति यावदित्युक्तप्रकारेण नष्टधर्मज्ञानलोककृपालुभिरित्यस्य, प्रसन्न इत्यनेन ज्ञानप्रदर्शनायेत्यस्य, भगवान् व्यासो भूत्वेत्यनेन भगवान् व्यासोऽवततारेत्यस्य, अवधारणार्थकचशब्दशिरस्केन भूत्वेत्यनेन विलम्बमकृत्वेत्यर्थकेन अवतारानन्तरमेवेत्यर्थकस्य ततश्चेत्यस्य, वेदानुक्तार्थभूषितं केवलेनाऽत्मबोधेन दृष्टमित्यनेन तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तमित्यस्य, वेदार्थसंयुतमित्यनेन सर्ववेदाद्यर्थोपबृंहितमित्यस्य, वेदादपि परमित्यनेन तदनुक्तेत्यनेनार्थाल्लब्धस्य वेदोत्तममित्यस्य, 'ब्रह्माऽपि तन्न जानाति' इति श्लोकेन सर्वप्राणिनामवगाह्यानवगाह्यरूपामित्यस्य, 'यस्मिन् दशार्था सर्वत्र न ज्ञेयाः' इत्यनेन 'दशावरार्थं सर्वत्र' इत्यनेन चानवगाह्यरूपामित्यस्य, केवलं

विष्णुबोधकमित्यनेन केवलभगवत्स्वरूपपरामित्यस्य, परोक्षार्थमित्यनेन परोक्षार्थामित्यस्य, 'भारतं चक्रे', 'भारतं स चकार', 'भारतं चापि कृतवान्' इत्यनेन महाभारतसंहितामचीक्लृपदित्यस्य, समानार्थत्वमवगन्तव्यमित्यर्थः । इष्टानिष्टप्राप्तिपरिहारसाधनादर्शनादित्युक्तार्थसंवादस्य उक्तप्रमाणेष्वदर्शनाद् यथासम्भवमित्युक्तम् ॥

## भावप्रकाशः

**पूर्वोक्तेनेति** स्कन्दपुराण एव पूर्वोक्तेनेत्यर्थः । दशभ्योऽवरा इति व्याख्याने यस्मिन् दशार्था इति स्मृतिविरोध इत्यत आह– **दश अवरा येष्विति ॥** नन्वनेनावरपक्षे भारतं दशार्थं न तु ततो न्यूनार्थकमिति प्राप्तं तथा च भारतार्थस्त्रिधा प्रोक्त इति भारततात्पर्यनिर्णयविरोध इति चेन्न यतस्तत्र मन्वास्तिकोपरिचररूपसर्वप्राण्यवगाह्यानवगाह्यार्थाविवक्षया त्रित्वमुक्तम् अत्र पुनरौपरिचररूपसर्वप्राण्यनवगाह्यार्थपक्ष एव भारतस्थानि सर्वाण्यपि पदानि प्रत्येकं दशार्थानीत्यभिप्रेतम् । अत एव 'सर्वश्चे'ति 'न ज्ञेयाः सर्वजन्तुभि'रिति चोक्तम् । ततश्च न कोऽपि विरोधः । ननु दशार्थापेक्षयाधिकार्थत्वे प्रमितेऽवरपक्षे दशार्थत्वं वाच्यं तदेव कुत इति चेत् । भारतान्तर्गतविष्णुसहस्रनाम्नां विष्णोः सहस्रनामापि निरन्तरशतार्थकमिति शतार्थकत्वस्य प्रमितत्वेन सर्वसामञ्जस्यात् ।

ननु कथं विष्णुबोधकमिति समासः तृजकाभ्यां कर्तरीतिसूत्रेण कर्त्रर्थतृजकाभ्यां षष्ठ्याः समासनिषेधादित्यशङ्क्य याजकादिभिश्चेति प्रतिप्रसवसूत्रेण समास इत्याह– **याजकादेरिति ॥** **आकृतिगणत्वादिति ॥** शिवशमरिष्टस्य कर इत्यादौ कर इत्यादिनिर्देशात् पचादेराकृतिगणत्ववत्तत्प्रयोजको हेतुश्चेत्यादिनिर्देशाद्याजकादेरप्याकृतिगणत्वस्याङ्गीकार्यत्वादिति भावः । उपलक्षणमेतत् । जनिकर्तुः प्रकृतिः तत्प्रयोजको हेतुश्चेति निर्देशात् तृजकाभ्यामिति निषेधोऽनित्य इति वा शेषषष्ठ्या समास इति वा समाधानमवधातव्यम् । आकृतिगणत्वस्य शाब्दिकैरनङ्गीकारात् पक्षान्तरमाह– **करणार्थेति ॥** बुध अवगमन इत्यस्माद् बुध्यतेनेनेति करणे घञि लधूपधगुणे च निष्पन्नेन बोधशब्देन विष्णुशब्दस्य षष्ठीसमास इत्यर्थः । ननु कथं करणे घञ् ल्युटा बाधात् । न च वासरूपविधिः क्तल्युट्तुमुन् खलर्थेषु वासरूपविधिर्नास्तीत्युक्तेरिति चेत् । उच्यते । ल्युडपवादेनात्र हलश्चेति घञ् । न च पुंसि सञ्ज्ञायामित्यतः सञ्ज्ञायामित्यनुवृत्तेः प्रकृते चासञ्ज्ञात्वात् कथं हलश्चेति घञिति वाच्यम् । बाहुलकाश्रयणात् ॥

**अल्पाद्यर्थ इति ॥** आदिपदादज्ञातार्थसङ्ग्रहः । अल्पे अज्ञाते इति सूत्राभ्यां कप्रत्यय-विधानादिति भावः । नचाल्पत्वाद्याभिधानवैयर्थ्यम् । भारतेनापि विष्णुगताशेष विशेषाः प्रातिस्विकाकारेण न बोध्यन्ते केषांचित् सामान्यतो बोधनात् । बोधाश्च विशेषाः सर्वप्राणिनामनवगाह्या इति ज्ञापनार्थत्वात् । व्यर्थं सदिति न्यायात् ।

**भाष्यम्– 'यदि विद्याच्चतुर्वेदान् साङ्गोपनिषदान् द्विजः ॥**
**न चेत् पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥'(म.भा..१.१.२६८)**

**'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।'**
**बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति।' (म.भा.आदि..२९३)**

## प्रमेयदीपिका

**'यदि विद्यात्'** इत्यादि भारतवाक्यपर्यालोचनया चोक्तं तदवसीयत इति सम्बन्धः । चत्वारश्च ते वेदाश्चेति विशेषणसमास एवायं न द्विगुः। अङ्गानि चोपनिषदश्च अङ्गोपनिषदमिति समाहारद्वन्द्वः । तेन 'द्वन्द्वाच्चुदषहान्तात् समाहारे' (पा.सू.५.४.१०६) इति समासान्तोऽकारः । ततो बहुव्रीहिः **। प्रचलिष्यति** प्रचालयिष्यतीति ॥

## भावबोधः

ननु 'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रोक्तसमासे 'सङ्ख्यापूर्वो द्विगुः' इति द्विगुसंज्ञायां 'द्विगुरेकवचनम्' इति एकवचने 'द्विगोः' इति ङीपः प्राप्तौ चतुर्वेदीमिति भवेत् । चतुर्वेदानिति कथमित्यत आह– **विशेषणसमास इति ॥ बहुव्रीहिरिति ॥** अङ्गोपनिषदेन सहिताः साङ्गोपनिषदा इत्यर्थः ।

## भावदीपः

'अवसीयते' इत्यस्य कर्माप्रतीतेः 'तच्चोक्तम्' इत्यनेनान्वयमाह– **यदि विद्यादित्यादि भारतवाक्येति ॥**

ननु 'चतुर्णां वेदानां समाहारः' इत्यत्र 'तद्धितार्थोत्तरपदसमाहारे च' (पा.सू. २.१.५१)

इति सूत्रे तद्धितार्थे विषये उत्तरपदे च परतः समाहारे वाच्ये 'दिक्सङ्ख्ये समस्येते' इति समासे 'सङ्ख्यापूर्वो द्विगुः' (पा.सू.२.१.५२) इति द्विगुसञ्ज्ञायाम्, 'द्विगोः'(पा.सू.४.१.२१) इति ङीप्प्रत्यये 'चतुर्वेदी' इति स्यादित्यत आह– **चत्वारश्च त इति ॥** 'विशेषणं विशेष्येण बहुलम्' (पा.सू.२.१.५७) इति सूत्रेण विशेषणसमास इत्यर्थः ॥ **द्वन्द्वादिति ॥** चवर्गान्ताद् दकारान्तात् षकारान्ताद् हकारान्ताद् द्वन्द्वात् समाहारे च टच्प्रत्ययो भवतीति पञ्चमान्त्य-पादीयसूत्रार्थः । 'चुटू' (पा.सू.१.३.७) 'हलन्त्यम्' (पा.सू.१.३.३) इत्येताभ्यां टकार-चकारयोरपगमे अङ्गोपनिषदमिति रूपम् । तेन सहितानिति बहुव्रीहिरित्यर्थः ॥

## वाक्यार्थप्रदीपः

चत्वारो वेदाः समाहृता इति तद्धितार्थोत्तरपदसमाहारे चेति समासे तस्य सङ्ख्यापूर्वकत्वेन सङ्ख्यापूर्वो द्विगुरिति द्विगुसंज्ञायां द्विगुरेकवचनमिति एकवचने अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः इति स्त्रीत्वे द्विगोरिति ङीपः प्राप्तौ चतुर्वेदी इति स्यात् चतुर्वेदानिति तु कथमित्यत आह– **विशेषणसमास इति ॥** न च विशेषणं विशेष्येण इति विहितविशेषणसमासस्य दिक्-सङ्ख्ये संज्ञायामिति नियमितत्वात् कथमत्र विशेषणसमास इति वाच्यम् । षोडशपदार्थ-पञ्चस्कन्धादिशब्दवत् विशिष्टस्यापि चतुर्वेदशब्दस्य सामयिकसंज्ञात्वेन तदुपपत्तेरित्याशयात् । नन्वङ्गानि चोपनिषदश्चाङ्गोपनिषदः अङ्गोपनिषद्भिः सहिताः साङ्गोपनिषद इत्येव स्यात् साङ्गोपनिषदानिति तु कथमित्यत आह– **अङ्गानि चेत्यादि ॥ तेनेति ॥** चवर्गान्तात् दकार-षकारहकारान्तात् द्वन्द्वात् टच्प्रत्ययो भवति । स च द्वन्द्वः समाहारे, नेतरेतरयोगे इति सूत्रार्थः। तथाच दकारान्तसमाहारद्वन्द्वात् टच्प्रत्यये साङ्गोपनिषदेति अकारान्तशब्द-निष्पत्तिरित्यर्थः ॥ **ततो बहुव्रीहिरिति ॥** अङ्गोपनिषदेन सहिताः साङ्गोपनिषदा इति तेन सहेति तुल्ययोग इत्यनेन बहुव्रीहिरित्यर्थः ॥

ननु चलतेरकर्मकत्वात् मामिति कर्माभिधानमयुक्तमित्यतोऽण्यन्तस्याकर्मकत्वेऽपि ण्यन्तस्य सकर्मकत्वात् तदभिधानं न दोषायेत्याह– **प्रचालयिष्यतीति ॥**

## भावरत्नकोशः

'अवसीयते' इति भाष्ये कर्मप्रत्यायनाय 'यदि विद्यात्' इत्यादेर्भारतान्तर्गतत्वज्ञापनाय चाऽह– **यदि विद्यादित्यादि भारतेति ॥** तेन तद्वाक्येत्यत्र तच्छब्दो भारतार्थ इत्युक्तं भवति ।

ननु चतुर्वेदानिति कथम् ? 'तद्धितार्थोत्तरपदसमाहारे च' तद्धितार्थे विषये उत्तरपदे च परतः समाहारे वाच्ये दिग्वाचिसङ्ख्यावाचिशब्दावैकार्थ्येन समस्येते, इति सूत्रेण अतद्धितार्थ-त्वादनुत्तरपदपरत्वाच्च समाहारे वाच्ये चतुर्णां वेदानां समाहार इति विगृह्य समासे 'सङ्ख्यापूर्वो द्विगुः' इति द्विगुसंज्ञायां 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीत्वे 'द्विगुरेकवचनम्' इति एकवद्भावे 'द्विगोः' इति ङीपि च सति चतुर्वेदीमिति भवितव्यत्वादित्यत आह– **विशेषणसमास इति ॥** विशेषणसमासत्वमेव स्फोरयितुमुक्तं– **चत्वारश्च ते वेदाश्चेतीति ॥** एवशब्दव्यावर्त्यं **न द्विगुरिति ॥** तेनोक्तरीत्या चतुर्वेदीमिति स्यादिति चोद्यानवकाश इति वाक्यशेषः ॥

अयं भावः । 'तद्धितार्थ' इति सूत्रेण समाहारप्राधान्य एव समासो विहितो न तु समाहृतप्राधान्ये । 'समाहारे वाच्ये' इति व्याकरणात् । पञ्चपूलीति समास एकवचनदर्शनाच्च । प्रकृते च समाहारप्राधान्यस्याविवक्षितत्वात् 'विशेषणं विशेष्येण बहुलम्' इति सूत्रविहित-विशेषणसमास एवेष्यते । न च विशेषणसमासत्वे सङ्ख्यापूर्वकत्वाद् द्विगुसञ्ज्ञा स्यादेवेति वाच्यम् । 'तद्धितार्थे' इत्यत्रोक्तस्त्रिविधः सङ्ख्यापूर्वो द्विगुसञ्ज्ञः स्यादित्यर्थस्य वैयाकरणै-रभ्युपगतत्वादिति ॥ ननु 'दिक्सङ्ख्ये सञ्ज्ञायाम्' इति सञ्ज्ञायामेव सङ्ख्यावाचिशब्दस्य विशेषणसमास इति नियमितत्वादत्रासञ्ज्ञात्वात् कथं समास इति चेन्न । 'पूर्वकालैकसर्व' इत्यत्रैकशब्दग्रहणेन सञ्ज्ञायामिति नियमस्यानित्यत्वज्ञापनादिति केचित् ॥

अन्ये तु 'पूर्वकालैक' इति सूत्रे वैयाकरणैरेकशब्दो 'दिक्सङ्ख्ये सञ्ज्ञायाम्' इति नियमात् प्राप्त्यर्थमेवेत्यङ्गीकारेणैकशब्दग्रहणस्य ज्ञापकत्वाभावोऽत एवैकशाटीत्युदाहरणमिति दूषयित्वा, अन्वर्थत्वेऽपि समुदायरूढ्या पञ्चाऽम्रास्सप्तर्षय इतिवच्चतुर्वेदशब्दस्य सञ्ज्ञात्वानपायात् । असञ्ज्ञात्वेऽपि बहुलग्रहणबलेनैव समासोपपत्तेश्च युक्त उक्तसमास इत्याहुः ।

अपरे तु 'दिक्शब्देभ्य उत्तरस्य तीरशब्दस्य तारादेशो वा वक्तव्यः' इति वार्तिकोदाहरणे

दक्षिणतारं दक्षिणतीरमित्यत्र यदि 'दिक्सङ्ख्ये सञ्ज्ञायाम्' इति नियमोऽभिमतस्तर्हि दक्षिण-तीरशब्दस्य सञ्ज्ञात्वपक्षे दिक्शब्देभ्यः उत्तरस्येति वचनमयुक्तं स्यात् । दक्षिणतीरशब्दस्य सञ्ज्ञात्वापातश्च । तेन ज्ञायते 'दिक्सङ्ख्ये सञ्ज्ञायाम्' इति न नियम इति ॥ तथा च प्रकृतेऽप्यसञ्ज्ञात्वेऽपि चत्वारश्च वेदाश्चेति विशेषणसमासो नानुपपन्न इति वदन्ति ॥

यत्तु 'विशेषणसमास एवायम्' इत्यनेन 'विशेषणं विशेष्येण बहुलम्' इत्यस्य विवरणरूपे समानाधिकरणाधिकारे 'शाकपार्थिवादीनामुपसङ्ख्यानमुत्तरपदलोपश्च' इति वार्तिके शाकप्रियः पार्थिवः शाकपार्थिवः, एकत्वयुक्तो वीर एकवीरः, त्रित्वविशिष्टा लोकास्त्रिलोका इत्यत्र योऽय-मुत्तरपदलोपी समासो विहितस्तस्य ग्रहणम् । तथा च चतुष्ट्वयुक्ता वेदाश्चतुर्वेदा इति समास इति । तत्तु 'चत्वारश्च ते वेदाश्च चतुर्वेदाः' इति टीकाक्षरास्वारस्यादचतुरस्रम् ॥

'अङ्गानि चोपनिषदश्च' इत्यनन्तरं तासां समाहार इत्युपस्कर्तव्यमिति केचित् । विग्रहस्थ-चशब्द एव समाहारार्थ इति नोपस्कार इत्यपरे । अत एव चाऽह– **अङ्गोपनिषदमिति समाहारद्वन्द्व इति** ॥ एतदङ्गीकारप्रयोजनमाह– **तेनेति** ॥ चवर्गान्ताद् दषहान्ताच्च द्वन्द्वात् टच्प्रत्ययो भवति समासान्तः स चेद् द्वन्द्वः समाहारे वर्तते नेतरयोग इति सूत्रार्थः । 'अकारः' इति मुक्तानुबन्धप्रत्ययग्रहणं टीकाकारीयम् अनुबन्धप्रयोजनस्य प्रकृतेऽविवक्षितत्वात् । **ततो बहुव्रीहिरिति** ॥ 'तेन सहेति तुल्ययोगे' समाने सम्बन्धे द्योतकत्वेन वर्तमानं सहेत्येतत् तृतीयान्तेन समस्यते । स बहुव्रीहिः । 'वोपसर्जनस्य' इति सहशब्दस्य सभावे अङ्गोपनिषदेन सह वेदनीयाः साङ्गोपनिषदाः, तानिति बहुव्रीहिः, टच्प्रत्ययोत्पादनानन्तरमित्यर्थः ॥

ननु चलतेरकर्मकत्वात् कथमत्र मामिति कर्मान्वय इत्यत आह– **प्रचालयिष्यतीति** ॥ यद्यपि चल गताविति धातुर्गत्यर्थः । गत्याद्यर्थाश्च धातवः सकर्मकाः । 'गत्यर्थाकर्मक' इति सूत्रात् । तथा च प्रकृते मां प्रचलिष्यति प्राप्स्यतीत्यर्थाभ्युपगमे नानुपपत्तिः । चोरो मां प्राप्स्यतीति बिभेति देवदत्त इति लोके व्यवहारात् । तथाऽपि नासावत्र प्राप्त्यर्थः । व्याकुली-भावस्यात्यन्तमप्राप्तेः । किन्तु कम्पनार्थः । 'कम्पने चलिः' इति सूत्रात् । तत्र च कम्पत इत्यत्रेव चलिष्यतीत्यत्रापि कर्मान्वयायोगात् तदन्वयायान्यार्थत्वे वक्तव्येऽत्यन्तविलोलन-स्फोरणाय चालयिष्यतीति व्याख्येयम् ॥ तथा च अन्तर्भावितण्यर्थश्चलतिरत्रेति न कर्मान्वयानु-पपत्तिरिति भावः । यद्यपि 'कम्पने चलिः' इति मित्त्वस्मरणात् 'मितां ह्रस्वः' इति ह्रस्वत्वे

चलयिष्यतीति वक्तव्यम् । तथाऽपि 'वा चित्तविरागे' इत्यतो वाग्रहणानुवृत्तेर्ह्रस्वविकल्पे 'चालयन् पृथिवीं सर्वाम्' इति प्रयोगः साधुरिति शरणदेववचनादत्रापि चालयिष्यतीति दीर्घः साधुरिति ज्ञातव्यम् ।।

## भावदीपिका

ननु 'तद्धितार्थोत्तरपदसमाहारे च' इति समाहारे च वाच्ये सङ्ख्यापूर्वस्य द्विगुसञ्ज्ञायां 'द्विगुरेकवचनम्' इत्येकवचने 'अकारान्तो द्विगुः समाहारे स्त्रियामिष्ट' इति स्त्रीलिङ्गत्वे 'द्विगोः' इति ङीपः प्राप्तौ चतुर्णां वेदानां समाहारश्चतुर्वेदीति स्यात् । न च पात्रादित्वात् ङीबभावः । तथात्वे पञ्चपात्रमितिवत् चतुर्वेदमिति भवेत् । चतुर्वेदानिति तु कथमत आह– **चत्वारश्च त इति** ।। न समाहारोऽत्र विवक्षितः । येन द्विगुप्राप्तिः । किं नाम? 'विशेषणं विशेष्येण बहुलम्' भेदकं भेद्येन समस्यत इति सूत्रप्राप्तकर्मधारयोऽयमिति भावः । अङ्गानि चोपनिषदश्चेत्यनन्तरं तयोः समाहार इति शेषः ।।

ननु तर्हि अङ्गोपनिषदिति स्यात् । कथमङ्गोपनिषदमित्यत आह– **तेनेति** ।। समाहार-द्वन्द्वाश्रयेण ।। **द्वन्द्वादिति** ।। च्वन्तात् दान्तात् षान्तात् हान्ताच्च द्वन्द्वात् टच् स्यात् समाहारे । वाक् च त्वक् च तयोः समाहारो वाक्त्वचम् । शमीदृषदोः समाहार शमीदृषदम् । वाक्त्विषोः समाहार वाक्त्विषम् । छत्रोपानहोः समाहारश्छत्रोपानहम् । समाहारेति किम्? प्रावृट्शरदौ । तयोः ऋत्वोरेकदा समाहाराभावात् । तथा चाङ्गोपनिषत् अस्मात् 'झलां जशोऽन्ते' इति तकारस्य दत्वे, द्वन्द्वादिति समासान्तटच्प्रत्यये, 'चुटू' इति टकारलोपेऽकार-मात्रे उर्वरिते, 'हलन्त्यम्' इति चकारलोपे, अङ्गोपनिषदेत्यकारान्तप्रातिपदिकनिष्पत्तौ, 'सर्वो द्वन्द्वो विभाषयैकवद् भवति' इति परिभाषयैकवद्भावे, 'स नपुंसकम्' इति नपुंसकत्वेऽङ्गोप-निषदमिति जातेऽङ्गोपनिषदेन सह विद्यमानाः साङ्गोपनिषदाः, तानिति सहपूर्वपदोऽयं बहुव्रीहिरिति भावः ।।

ननु सहपूर्वपदबहुव्रीहित्वे सहाङ्गोपनिषदानिति स्यादिति चेन्न । 'वोपसर्जनस्य' उपसर्जन-भूतस्य सहेत्यस्य सो वा स्यात् । पुत्रेण सहाऽगतः, सपुत्र आगतः, सहपुत्रो वाऽऽगत इति विहितत्वादत्रापि सहेत्यस्य सादेशे सति सहपूर्वपदत्वेऽपि साङ्गेति साध्विति मन्तव्यम् ।। ननु

चलधातोरकर्मकत्वान्मामिति कथं कर्मोक्तिरित्यत आह– **प्रचालयिष्यतीति ॥** णिजन्ताश्च सकर्मका इति भावः ॥

## भावप्रकाशः

ननु चतुर्णां वेदानां समाहार इति विग्रहे तद्धितार्थोत्तरपदसमाहारे चेति समासे सङ्ख्यापूर्वो द्विगुरिति द्विगुसञ्ज्ञायाम् अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट इति स्त्रीत्वे द्विगोरिति ङीपि च सति चतुर्वेदीमिति स्यात् । चतुर्वेदानिति तु कथमित्यत आह– **विशेषणसमास एवायमिति ॥** तद्धितार्थेति सूत्रेण समाहारप्राधान्य एव समासः नतु समाहृतप्राधान्ये समाहारेवाच्य इत्युक्त-त्वात् समासे एकवचनप्रयोगाच्च । प्रकृते च समाहारप्राधान्यस्याविवक्षितत्वात् विशेषणंविशेष्येण बहुलमिति विशेषणसमास एवेत्यर्थः । न च सञ्ज्ञात्वात् कथं विशेषणसमासः दिक्सङ्ख्ये सञ्ज्ञायामित्यनेन सञ्ज्ञायामेव सङ्ख्याशब्दस्य विशेषणसमास इति नियतत्वादिति वाच्यम् । अन्वर्थत्वेऽपि समुदायरूढ्या पञ्चाम्राः सप्तर्षय इतिवत् चतुर्वेदशब्दस्यापि सञ्ज्ञात्वानपायात् । असञ्ज्ञात्वेऽपि बहुलग्रहणबलेन समासोपपत्तेश्च । अत एव शब्दकौस्तुभे एकवीर इत्यत्र पूर्वकालैकेति बाधित्वा परत्वात्पूर्वापरप्रथमेति समाहारे वीरैक इति स्यादित्याशङ्क्य बहुलग्रहणबलेन समाहितमिति भावः ॥

**समाहारद्वन्द्व इति ॥** स नपुंसकमिति समाहारे यौ द्विगुद्वन्द्वौ तयोर्नपुंसकत्वं समाहार-स्यैकत्वादेकवचनं च युक्तमिति बोध्यम् । **द्वन्द्वादिति ॥** चवर्गान्तादकारषकारहकारान्ताच्च द्वन्द्वाट्टच् स्यात् समाहार इति सूत्रार्थः । टकारचकारयोः लोपे अकारमात्रमवशिष्यत इत्यभि-प्रेत्य समासान्तोकार इत्येवोक्तम् । **बहुव्रीहिरिति ॥** अङ्गोपनिषदेन सह साङ्गोपनिषदा इति बहुव्रीहिरित्यर्थः । वोपसर्जनस्येति सहशब्दस्य सत्वमिति बोध्यम् ॥

ननु मामयं प्रचलिष्यतीति कथम् । चलतेरकर्मकत्वादित्यतोऽन्तर्णीतण्यर्थोऽयमतो नोक्तानुपपत्तिरित्यभिप्रेत्याह– **प्रचालयिष्यतीति ॥**

**भाष्यम्– 'मन्वादि केचिद् ब्रुवते ह्यास्तीकादि तथापरे ।**
**तथोपरिचराद्यन्ये भारतं परिचक्षते ।' (म.भा.आदि.१.६६)**

**'भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ।**
**देवैर्ब्रह्मादिभिस्सर्वैः ऋषिभिश्च समन्वितैः ॥**
**व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ।' (ब्रह्माण्डपुराणे)**

**'महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ॥**
**निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।' (म.भा.१.३००)**

**'यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित्'( म.भा.आदि ५.५०)**

**'विराटोद्योगसारवान्' (म.भा.१.८९) इत्यादि तद्वाक्यपर्यालोचनया, ऋषि-सम्प्रदायात्, 'को ह्यन्यः पुण्डरीकाक्षात् महाभारतकृद्भवेत्' (वायुप्रोक्तवचनम्) इत्यादि पुराणग्रन्थान्तरगतवाक्यार्थान्यथानुपपत्त्या नारदाध्ययनादिलिङ्गैश्चावसीयते ॥**

## भावप्रदीपिका

भारतवाक्यपर्यालोचनया ऋषिसम्प्रदायादिलिङ्गैश्चैतद्भारतस्य वेदोत्तमत्वादि ज्ञायत इत्याह– **यदीत्यादि** । 'विराटोद्योगसरवान्' इति भारतस्य कल्पवृक्षतया वर्णितत्वं द्रष्टव्यम् ।

## प्रमेयदीपिका

'भारवत्त्वात्' इत्यनेन मत्वर्थे तप्रत्यय इत्युक्तं भवति ॥ भारतप्रामाण्यमप्यङ्गीकृत्यैव इतरदनङ्गीकुर्वाणं प्रतीदमुक्तम् । युक्त्यनुसन्धानेन विनाऽभिप्रेतार्थोऽत्र न प्रतीयते। अतः 'पर्यालोचनया' इत्युक्तम् । अनुसन्धानप्रकारं च लेशेन दर्शयिष्यति । ऋषीणां वैशम्पायनादीनां सम्प्रदायात्, शिष्येभ्यः प्रदानाच्चैतद् अवसीयते । न हि प्रामाण्यादिरहितम् ऋष्यादयः शिष्येभ्यः श्रेयसे व्याकुर्युरिति युज्यते । 'कोऽह्यन्यः' इत्यादि पुराणलक्षण ग्रन्थान्तरगतवाक्यार्था-न्यथानुपपत्त्या च तदवसीयते । 'ग्रन्थान्तर' इति विशेषणस्य प्रयोजनं स्वयमेव वक्ष्यति । वाक्यस्योक्तार्थे सामर्थ्याभावात् 'अन्यथानुपपत्त्या' इत्युक्तम् । तच्च प्रदर्शयिष्यते ॥

नारदस्याध्ययनव्याख्यानादिलिङ्गैश्चोक्तार्थोऽवसीयते । 'ऋषिसम्प्रदायात्' इत्यनेनैव गत-मेतदिति चेत्– न । ऋषीणां गृहस्थत्वेन परार्थोऽन्यविषयो व्यवहारः कथञ्चित् सम्भाव्येतापि ।

नारदस्य तु परमहंसस्य स्वार्थोऽपि व्यापारोऽन्यविषयो न सम्भवतीति ज्ञापनार्थत्वात् । अत एव 'सम्प्रदायात्' इति 'अध्ययन' इति चोक्तम् ॥

## भावबोधः

**इतरदिति ॥** वेदार्थज्ञानोपायत्वं वेदोत्तमत्वमित्यादिकमित्यर्थः । **कथञ्चिदिति ॥** अन्यथा शिष्याणां श्रेयसे कथं व्याकुर्युरित्युक्तविरोधः स्यादिति भावः ।

## भावदीपः

'यदि विद्यात् चतुर्वेदान्' इत्यादिवाक्यानामुक्तेरुपयोगमाह– **भारतप्रामाण्यमिति॥ इतरदिति ॥** धर्मज्ञानद्वारा मोक्षहेतुत्वं सर्ववेदार्थबृंहितत्वं 'तदनुक्तकेवलेश्वर' इत्यादिनोक्तमित्यर्थः ॥ **इदमिति ॥** 'यदि विद्यात्' इत्यादिकम् ॥ **लेशेन दर्शयिष्यतीति ॥ 'कथमन्यथा'** इत्यादिनेति भावः ॥ **प्रदानाच्चेति ॥** 'न केवलम्' इत्यादिवाक्यपर्यालोचनया इति चार्थः ॥ 'प्रामाण्यादि' इत्यादिपदेन 'इतरत्' इत्यत्रोक्तस्य सङ्ग्रहः ॥ **वक्ष्यतीति ॥** 'ग्रन्थान्तरगतत्वाच्च' इत्यादिनेति भावः ॥ **प्रदर्शयिष्यत इति ॥** 'कथं चान्यस्य' इत्यादिनेति भावः ॥ उक्तार्थः प्रामाण्यादिः ॥ 'मन्वादि केचिद् ब्रुवते' इति श्लोको भारततात्पर्यनिर्णये द्वितीये (२.१३७)

'सकृष्णान् पाण्डवान् गृह्य योऽयमर्थः प्रवर्तते ।
प्रातिलोम्यादिवैचित्र्यात्तमास्तीकं प्रचक्षते'

इत्यादिना व्याख्यानादत्र न व्याख्यातः ॥

## वाक्यार्थप्रदीपः

ननु भारवत्त्वादिति निर्वचने भारवदिति स्यात् भारतमिति तु कथमित्यत आह– **भारवत्त्वादित्येनेनेति ॥** नच तप् पर्वतमरुद्भ्यामिति विशेषोक्तेः कथमन्यत्र मत्वर्थे तद्व्युत्पादनमिति वाच्यम् । तस्मिन् सूत्रे अस्याप्युपसङ्ग्रहेयत्वे तात्पर्यात् ॥

## भावरत्नकोशः

**तप्रत्यय इति ।।** 'तद्धिताः' इति बहुवचनज्ञापितस्तप्रत्ययो भारशब्दान्निष्पादनीय इत्यर्थः । 'पर्वमरुद्भ्याम् तप्' इति वक्तव्ये तप् पर्वमरुद्भ्याम्' इति पाठे प्रत्ययस्याऽदावुच्चारणाद् वाऽत्र तप्प्रत्यय इति केचित् ।।

ननु 'यदि विद्यादित्यादिभारतवाक्यपर्यालोचनया चोक्तं तदवसीयते' इति वाक्ये भारत-प्रामाण्यदुर्गमार्थत्वादि तदित्यनेनाभिसंहितम् । नैतद् युक्तम् । भारतप्रामाण्ये विप्रतिपद्यमानं प्रति तद्वाक्येन तत्साधनस्यानुचितत्वादित्यत आह– **भारतप्रामाण्यमङ्गीकृत्येति ।। इतरत्** विषय-प्रयोजनादि दुर्गमार्थत्वं च । वेदार्थज्ञानोपायत्वादिकं वा । इदमुक्तं भारतवाक्यमुदाहृतम् । पर्यालोचनाशब्दार्थविवेचनायोक्तम्– **अनुसन्धानेति ।।** उपपत्त्यनुचिन्तनेत्यर्थः । **दर्शयिष्यति** 'कथमन्यथा भारतनिरुक्तिज्ञानमात्रेण सर्वपापक्षयः' इत्यनेन । ऋषिसम्प्रदायशब्दयोरर्थं वदन्नेव हेतौ चशब्दान्वयमाह– **ऋषीणामिति ।।** सम्प्रपूर्वाद् दा दान इति धातोर्भावे घञि 'आतो युक्चिण्कृतोः' इति युकि च सम्प्रदायशब्द उपदेशपरम्परार्थ इति भावेनोक्तं– **शिष्येभ्य इति ।।** शिष्याणां श्रेयसे व्याकरणाच्च इत्यर्थः । अत्र साध्यार्पणम् **एतदवसीयत इति ।।**

ऋषिसम्प्रदायाच्च भारतप्रामाण्यविषयप्रयोजनदुर्गमार्थत्वाद्यवसीयत इत्येतदुपपादयति– **नहीति** ।। शिष्याणामिति प्रामाण्यम्, श्रेयस इति विषयप्रयोजनाभिसम्बन्धः, व्याकुर्युरिति दुर्गमार्थत्वं च विभावितम् । नह्यप्रमाणमतिरोहितार्थं च शासनीयविनेयेषु व्याकुर्वत इति युक्त-मिति ।। पुराणं च ग्रन्थान्तरं चेति विग्रहभ्रमं निरसितुमुक्तम्– **पुराणलक्षणेति ।। वक्ष्यति** 'ग्रन्थान्तरगतत्वाच्च' इत्यत्र । **प्रदर्शयिष्यते** 'कथं चान्यस्य' इत्यत्र । भाष्यस्थादिशब्दार्थो **व्याख्यानेति ।।** अत्राऽदिपदाच्छ्रवणसङ्ग्रहः । अक्षरोच्चारणपूर्वकमर्थग्रहणमध्ययनम् । तद्विनाऽर्थ-ग्रहणं श्रवणमिति तयोर्भेद इति केचित् । गुरूच्चरणानूच्चारणमध्ययनम् । औपदेशिकवाक्यार्थाव-बोधः श्रवणमित्यपरे ।।

ननु व्याख्यानं नाम शिष्येषु प्रदानम् । तथा च 'ऋषिसम्प्रदायात्' इत्यनेन प्राप्तमेतदिति शङ्कते– **ऋषीति । गतं** प्राप्तम् । गृहस्थत्वेऽप्यृषीणां तद्व्यवहारस्यान्यविषयत्वमयुक्तम् । मोक्षार्थव्यवहारस्य तथात्वानौचित्यादित्यत उक्तम्– **परार्थ इति ।।** शिष्यार्थ इत्यर्थः ।

माऽभून्मोक्षार्थो व्यवहारः । तथाऽपि परार्थव्यवहारोऽन्यविषयोऽपि सम्भाव्यते गृहस्थत्वादिति सम्भावनायामपिशब्दः । ऋषयो गृहस्था अपि कथं शिष्याणां श्रेयसे प्रामाण्यादिरहितं व्याकुर्यु-रित्यतः कथञ्चिदित्युक्तम् । भगवदाज्ञाकारिदधीच्यादिव्यवहारस्यान्यविषयत्वदर्शनादिति भावः । स्वार्थः मोक्षार्थः । ज्ञापनार्थत्वादिति वदन् सार्थकमर्थतः पुनर्वचनमदोषायेत्यभिप्रैति । अत्रोपष्टम्भकमाह– **अत एवेति** ॥ यत एवमृष्यादिव्यापारः सम्भावितपरार्थताकः, नारद-व्यापारस्तु मोक्षार्थोऽत एवेत्यर्थः । सम्प्रदायशब्दस्य प्रदानार्थत्वादध्ययनस्य च स्वार्थत्वे-नोक्तार्थसूचनादिति भावः ॥

## भावदीपिका

**मत्वर्थ इति** ॥ भारशब्दात् सोऽस्यास्तीति मत्वर्थे तप्रत्यये भारतेति रूपम् ॥ ननु भारताप्रामाण्यवादिनं प्रति तस्योत्तमत्वनिश्चयाय कथं भारतवाक्योदाहरणमित्यत आह– **भारतेति** ॥ **इतरत्** ॥ वेदार्थज्ञानोपायवेदोत्तमत्वादिकमित्यर्थः । इदम् उत्तमत्वम् ॥ **दर्शयिष्यतीति** ॥ कथमन्यथेत्यादिना अनुपदमेवेति शेषः । उदाहृतेषु सर्वेषु वाक्येषु पर्यालोचनाया अक्रियमाणत्वात् लेशेनेत्युक्तम् । शिष्येभ्यो जनमेजयादिभ्यः । प्रामाण्या-दीत्यत्राऽदिपदेनोत्तमत्वं ग्राह्यम् । **तत्** उत्तमत्वादि ॥ **वक्ष्यतीति** ॥ ग्रन्थान्तरगतत्वाच्चेत्यनेनेति शेषः ॥ **वाक्यस्येति** ॥ 'को ह्यन्य' इति वाक्यस्येत्यर्थः ॥ तच्चेति अन्यथानुपपत्तिकथनम् ॥ **प्रदर्शयिष्यत इति** ॥ कथं चान्यस्येत्यनेनेति शेषः । अध्ययनादीत्यत्राऽदिपदार्थमाह– **व्याख्यानादीति** ॥ अध्ययनं श्रवणम् । व्याख्यानं मननम् । आदिपदेन तदुक्तप्रकारेण ध्यानं ग्राह्यम् ॥ **ऋषीति** ॥ नारदस्यापि देवर्षित्वादिति भावः ॥ **अन्यविषय इति** ॥ अप्रमाणा-नुत्तमग्रन्थविषय इत्यर्थः । एवमुत्तरत्रापि ज्ञेयम् । व्यवहारो व्याख्यानादिरूपः ॥ **कथञ्चिदिति** ॥ अन्यथा शिष्याणां श्रेयसे कथं व्याकुर्युरित्युक्तविरोधः स्यादित्याशयः ॥ **अत एवेति** ॥ ऋषीणां गृहस्थत्वेन परार्थान्यविषयव्यापारसम्भावनासूचनाय सम्प्रदायादित्युक्तम् । परमहंसस्य नारदस्य स्वार्थव्यापारो नान्यविषय इति सूचनायाध्ययनेत्युक्तमिति भावः ।

## भावप्रकाशः

**मत्वर्थे तप्रत्यय इति** ॥ तद्धिता इति बहुवचनस्यानुक्ततद्धितसङ्ग्रहार्थत्वादिति भावः ।

ननु भारतप्रामाण्यमनङ्गीकुर्वाणं प्रति कथं तत्साधनाय भारतवाक्योदाहरणमित्यत आह– **भारतप्रामाण्यमिति ।। इतरदिति ।।** विषयादिसम्बन्धदुर्गमार्थत्वं चेत्यर्थः । **दर्शयिष्यतीति ।।** कथमन्यथा भारतनिरुक्तिज्ञानमात्रेण सर्वपापक्षय इत्यादिनेति शेषः । **वक्ष्यतीति ।।** ग्रन्थान्तर-गतत्वाच्चेत्यादिनेति शेषः । **प्रदर्शयिष्यत इति ।।** कथं चान्यस्य कर्तुं न शक्यत इत्यनेनेति शेषः। **व्याख्यानादीति ।।** आदिपदाच्छ्रवणसङ्ग्रहः । अक्षरोच्चारणपूर्वकमर्थग्रहणमध्ययनं तद्भिनार्थग्रहणं श्रवणमिति तयोर्भेदात् । ननु ऋषीणां गृहस्थत्वेऽपि तद्व्यवहारोऽन्यविषयः इत्ययुक्तं मोक्षार्थव्यवहारस्य तथात्वाभावादित्यत उक्तम्– **परार्थ इति ।।** शिष्यार्थ इत्यर्थः । माभून्मोक्षार्थो व्यवहारः तथापि परार्थव्यवहारोऽन्यविषयोऽपि सम्भाव्यते । दधीच्यादि-व्यवहारस्य परार्थस्यान्यविषयत्वदृष्टेरिति भावः । ननु शिष्याणां श्रेयसे प्रामाण्यादिरहितस्य व्याख्यानमयुक्तमित्यत उक्तम्– **कथञ्चिदिति ।। स्वार्थ इति ।।** स्वमोक्षार्थ इत्यर्थः । **अत एवेति ।।** यत एवं ऋषिव्यापारः परार्थः नारदव्यापारस्तु स्वार्थोऽत एवेत्यर्थः । सम्प्रदायशब्दस्य प्रदानार्थत्वेनाध्यायनस्य च स्वार्थत्वेनोक्तव्यवस्थासूचनादिति भावः ।।

**भाष्यम्– कथम् अन्यथा भारतनिरुक्तिज्ञानमात्रेण सर्वपापक्षयः । प्रसिद्धश्च सोऽर्थः ।।**

## भावप्रदीपिका

न भारतं हरिपरम् । 'यस्मिन्नृणां ग्राम्यकथानुवादैर्मतिर्गृहीता न हरेः कथायाम् इत्युक्तत्वा-दित्यत आह– **कथमिति ।। अन्यथा** हरिकथां विना ग्राम्यकथानुवादित्व इत्यर्थः । **निरुक्ति-मस्येति** । भारतमिति निरुक्तिज्ञानादुच्यमानः पापक्षयादिरुपचरितः किं न स्यात् इत्यत आह– **प्रसिद्धश्चेति ।।** सोऽर्थः पापक्षयाख्यो जनमेजयादौ प्रसिद्धश्चातो न वचनमुपचरितार्थमित्यर्थः । निरुक्तिज्ञानस्यापि भारतज्ञानमन्तरेणासम्भवान्नासङ्गतिः ।।

## भावप्रकाशिका

एतेनैतत्सुनिरस्तम् । यद्भ्रान्तैरुच्यते 'भारतेऽधिगम्यमाने ग्राम्यसुखानुवादे एव मातिर-वरुध्यते न हरिकथायाम्' इति ।। तथा सति तन्नामनिरुक्तिज्ञानात् सर्वपापक्षयो न स्यादित्याह– **कथमन्यथेति ।।** न केवलं तन्नामनिरुक्तिज्ञानात् पापक्षयो भवतीति पावनिकः, किन्त्वानुभाविकोऽपि जनमेजयादीनामिति भावेनाह– **प्रसिद्धश्चेति ।।**

## प्रमेयदीपिका

'तद्वाक्यपर्यालोचनया' इत्युक्तम् । कीदृशी सा पर्यालोचना? इत्यतो लेशेन दर्शयति– **कथमिति ॥** 'महत्त्वात्' इति वाक्ये भारतशब्दं निरुच्य तज्ज्ञानात् सर्वपापक्षयोऽभिधीयते। नतु भारतस्योत्तमत्वं साक्षात् । तथाऽपि पर्यालोचनया गम्यत एव । यथा हि नारायणादि-भगवन्नामनिरुक्तिज्ञानाद् भवन् पापक्षयोऽभिधेयस्य सर्वोत्तमत्व एव तथाऽयमपि । **अन्यथा** भारतस्य सर्वशास्त्रोत्तमत्वाभावे । कथं तच्छब्दनिरुक्तिज्ञानमात्रेण सर्वपापक्षयः स्यात्? शब्दान्तरनिरुक्तिज्ञानेन तदभावादिति ॥

स्यादेतदनुमानम् । यदि हेतूकृतोऽर्थः प्रमितः स्यात् । न चैवम् । अयथार्थप्रशंसाया अपि दर्शनेन वचनस्यान्यथासिद्धेरित्यत आह– **प्रसिद्धश्चेति ॥** धियां तावत् प्रामाण्यं स्वतः। बाधकादप्रामाण्यम् । न चेह तदस्ति । अर्थवादानां चाबाधिते स्वार्थे प्रामाण्यमस्त्येव । अतो हेतूकृतो योऽर्थो भारतशब्दनिरुक्तिज्ञानेन सर्वपापक्षयः **स प्रसिद्धः** प्रमित एवेति । सर्वपापक्षये तदैव मुक्तिः स्यादिति चेत् तर्हि सर्वशब्दार्थ एव सङ्कोच्यताम् । न तु सर्वो वाक्यार्थः ॥

## भावबोधः

**स्यादेतदनुमिानमिति ॥** भारतं सजातीयोत्तमं, सर्वपापक्षयहेतुज्ञानविषयनिर्वचनोपेत-शब्दवाच्यत्वात्, यथा नारायण इत्यनुमानमित्यर्थः ।

## भावदीपः

एवं दृष्टान्तं स्वयमुक्त्वा वाक्यार्थमाह– **तथाऽयमपीत्यादिना ॥** 'अयमपि' इत्यस्य 'सर्वपापक्षय' इत्यनेनान्वयः । 'अन्यथा' इत्यनुवादः 'भारतस्य' इत्यादि व्याख्या ॥ 'भारतम्' इति पदमत्त्युत्तमाभिधेयकम् । सर्वपापक्षयहेतुज्ञानविषयनिरुक्तिकत्वान्नारायणादिनामवदित्युक्तं भवति **॥ अयथार्थेति ॥** 'गङ्गास्नानेन वा मुक्तिः' इत्यादाविति भावः ॥

**न चात्रेति ॥** 'निरुक्तिमस्य यो वेद' इत्यादिवाक्ये तत्र बाधकं नास्तीत्यर्थः ॥ वाक्यार्थमाह– **अतो हेतूकृत इत्यादिना ॥**

## भावरत्नकोशः

**तद्वाक्येति** ।। भारतवाक्येत्यर्थः । साक्षात् शब्दार्थतया । 'अन्यथा' इति भाष्यमनूद्यार्थमाह– **भारतस्य सर्वशास्त्रोत्तमत्वाभाव इति** ।। **एतदनुमानम्**– भारतशब्दः स्वसजातीयोत्तमाभिधायकः । सर्वपापक्षयहेतुज्ञानविषयनिरुक्तिकत्वात् । यथा नारायणशब्द इति ।। भारतं सजातीयसर्वशास्त्रोत्तमम् । सर्वपापनिवृत्तिहेतुज्ञानगोचरनिरुक्तिमच्छब्दवाच्यत्वात् । यदेवं तदेवम् । यथा सजातीयसर्वचेतनोत्तमो नारायण इति वाऽनुमानम् । तदैवार्थसाधनसमर्थं **स्यादि**ति भावः । कथं न चैवम्? 'सर्वपापैः प्रमुच्यते' इति वचनस्यैव प्रमाणत्वादित्यत उक्तं– **वचनस्यान्यथासिद्धेरिति** ।। तत्र हेतुः **अयथार्थप्रशंसाया अपि दर्शनेनेति** ।। 'गङ्गास्नानेन वा मुक्तिः' इत्यादौ साक्षान्मोक्षपरत्वेन प्रशंसाया इवेति भावः । स्वतः ज्ञानग्राहकग्राह्यम् । इह 'निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते' इति वाक्यजन्यधियाम् । **तत्** बाधकम् । सर्वपापक्षयवाक्यस्यार्थवादत्वेनार्थवादानां 'तस्माद् धूम एवाग्नेर्दिवा ददृशे नार्चिः' इत्यादिरूपाणां न स्वार्थे प्रामाण्यमित्यर्थवादत्वमेव बाधकमित्याशङ्क्याऽह– **अर्थवादानां चेति** ।। नार्थवादत्वमात्रमप्रमापकत्वप्रयोजकमिति भावेनोक्तं– **अबाधिते स्वार्थ इति** ।। प्रत्यक्षादिबाधितार्थानामुदाहृतार्थवादानां तथात्वेऽपि न प्रकृतस्य तथात्वम् । प्रमाणबाधाभावादिति भावः ।।

बाधकं शङ्कते– **सर्वपापक्षय इति** ।। सर्वशब्दार्थः सर्वपापैरित्यत्र । 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति शास्त्रेण मन्त्रगतेन्द्रशब्दो यथा स्वोचितैश्वर्यवद् गार्हपत्यार्थतया सङ्कोचितस्तथाऽत्रापीति भावः । **वाक्यार्थः** भारतशब्दनिरुक्तिज्ञानेन बहुतरपापान्यप्रारब्धानि निवर्तन्त इति समग्रवाक्यार्थः । बाधकाभावादिति भावः ।।

## भावदीपिका

तथाऽपीत्युत्तरश्रवणाद् यद्यपीत्यादावध्याहार्यम् ।। **अभिधेयस्येति** ।। नामवाच्यस्य नारायणस्य ।। **तथाऽयमपीति** ।। भारतशब्दनिरुक्तज्ञानेनोक्त सर्वपापक्षयो भारतस्योत्तमत्वं विना न सम्भवतीत्यर्थः । अनेन, 'भारतं सर्वशास्त्रोत्तमम् । सर्वपापक्षयहेतुभूतज्ञानविषयीभूतनिरुक्तिमच्छब्दवाच्यत्वात् । नारायणवत्' इत्यनुमानमुक्तं भवति । अत्राप्रयोजकताशङ्कायां विपक्षे हेतूच्छित्तिरूपबाधककथनपरत्वेनान्यथेति मूलं व्याख्याति– **अन्यथेति** ।। अनुमाने ज्ञानासिद्धिमाशङ्कते– **स्यादेतदिति** ।। प्रमापकप्रमाणाभावादिति भावः ।।

ननु 'महत्त्वात्' इति वचनमेव प्रमापकं प्रमाणमित्यत आह– **अयथार्थेति** ॥ **अन्यथासिद्धेरिति** ॥ अयथार्थप्रशंसापरत्वेनान्यथासिद्धेरित्यर्थः । ननु 'न गङ्गा न गया काशी' इत्याद्यर्थवादानां स्वार्थेऽप्रामाण्यदर्शनादस्यापि वचनस्य तथात्वमित्यर्थवादत्वमेव बाधकमस्तीत्यत आह– **अर्थवादानाञ्चेति** ॥ **अतः** प्रामाण्यस्य स्वतस्त्वेनेतरप्रमापकापेक्षाभावात् । चशब्द एवार्थ इत्यभिप्रेत्याऽह– **प्रमित एवेति** ॥ बाधकमाशङ्कते– **सर्वपापक्षय इति** ॥

## भावप्रकाशः

**स्यादेतदनुमानमिति** ॥ भारतं सजातीयोत्तमं सर्वपापनिवर्तकज्ञानविषयनिर्वचनोपेतशब्दवाच्यत्वात् नारायणवदित्यनुमानमित्यर्थः । ननु निरुक्तमिति वाक्यमेव प्रमापकमित्यत आह– **अयथार्थेति** ॥ **दर्शनेनेति** ॥ प्रयागमरणेन वेत्यादाविति शेषः । नन्वर्थवादस्य स्वार्थे प्रामाण्याभावो बाधक इत्यत आह– **अर्थवादानां चेति** ॥ प्रयागमरणेन वेत्याद्यर्थवादस्य स्वार्थे प्रामाण्याभावादाह– **अबाधित इति** ॥ अनेनैतत् सूचितं द्विविधोऽर्थवादो बाधिताबाधितभेदात् । तत्राद्यः प्रयागेत्यादिर्न स्वार्थे मानं दृष्ट्वैव तं मुच्यत इति स्मृतिबाधात् । किन्तु प्राशस्त्यलक्षकः । अन्त्याः निरुक्तमस्येत्यादिः स्वार्थे प्रमाणमेवेति । सर्वशब्दार्थ एव सङ्कोच्यतामिति ॥ त्यजेदेकं कुलस्यार्थे इति न्यायादिति भावः ॥

## प्रमेयदीपिका

एवमन्यान्यपि भारतवाक्यानि पर्यालोचनीयानि । तथाहि 'यदि विद्यात्' इति वाक्ये यद्यपि भारतं नोक्तम् । तथाऽपि उत्तरत्रेतिहासशब्देन गृहीतत्वात् पुराणपदं तदुपलक्षणमिति ज्ञायते । न ह्यनुक्तस्योपपादनं युक्तम् । ततश्च भारतस्य वेदार्थज्ञानोपायताऽनेन सिद्ध्यति । अचेतनत्वपर्यालोचनायां 'बिभेति' इत्येतद् बिभेतीव स्वार्थमन्तर्धापयतीति ज्ञेयम् ॥

यद्यपि 'मन्वादि' इत्येतदापाततो न प्रकृतं कमप्यर्थं प्रत्याययति । तथाऽपि भगवत्पादैरन्यत्रोदाहृतस्य एतद्व्याख्यानरूपवाक्यस्यानुसन्धाने भारतस्य भगवत्परत्वादि गमयति ॥

तुलारोपणं भारवत्त्वं च प्रतिनिधिद्वारेणोपपादनीयम् ॥ 'यदिह' इत्यस्य स्तुतिपरत्वोपपत्तये 'तदेवान्यत्र' इति व्याख्याने सर्ववेदाद्यर्थोपबृंहितत्वादिकं सिद्ध्यति ॥

'विराट' इत्येतत् पूर्वोत्तरवाक्यानुसन्धानेन भारतस्य कल्पतरुतां प्रतिपादयद् भारतस्य सर्वपुरुषार्थहेतुतां गमयतीति ॥

## भावबोधः

अन्यत्रेति ॥

'सकृष्णान् पाण्डवान् गृह्य योऽयमर्थः प्रवर्तते ॥
प्रातिलोम्यादिवैचित्र्यात्तमास्तीकं प्रचक्षते ॥
धर्मो भक्त्यादिदशकः श्रुतादिश्शीलवैनयौ ॥
सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधाः ॥
नारायणस्य नामानि सर्वाणि वचनानि तु ॥
तत्सामर्थ्याभिधायीनि तमौपरिचरं विदुः ॥'

इति महाभारततात्पर्यनिर्णये उदाहृतस्येत्यर्थः । आदिपदेन धर्मदेवतापरत्वग्रहणम् ।

## भावदीपः

**पुराणपदमिति** ॥ 'नचेत् पुराणम्' इत्यत्र विद्यमानं पुराणपदमित्यर्थः ॥ **अन्यत्रेति**॥ भारततात्पर्ये ॥ **स्तुतित्वोपपत्तय इति** ॥ भारतमाहात्म्योक्तिपरत्वसिद्धय इत्यर्थः ॥ **विराटेत्येतदिति** ॥ गमयतीत्यन्वयः ॥ **पूर्वोत्तरेति** ॥ भारत एव तत्पूर्वोत्तरवाक्येत्यर्थः ॥

## भावरत्नकोशः

**उत्तरत्र** 'इतिहासपुराणाभ्याम्' इतिवाक्ये । पर्यालोचनशब्दितयुक्त्यनुसन्धानप्रकारं दर्शयति– **न ह्यनुक्तस्येति** ॥ अनेनोक्तार्थस्य कस्य सिद्धिरित्यत आह– **ततश्चेति** ॥ 'वेदार्थाज्ञानाच्च' इति भाष्ये यद् भारतस्य वेदार्थज्ञानोपायत्वं सूचितं तत् सिद्ध्यतीत्यर्थः ॥ ननु वेदो बिभेतीत्ययुक्तम् । वर्णराशिविशेषरूपस्य वेदस्याचेतनत्वेन तत्र भयशब्दितमनोदौर्बल्यस्य प्रसक्त्यनौचित्यादित्यत आह– **अचेतनत्वेति** ॥ 'भीत्रार्थानां भयहेतुः' इत्यल्पश्रुतस्यापादानता। **प्रचालयिष्यतीति** बिभेति । आपाततः शास्त्रान्तरानवमर्शदशायाम् । कमप्यर्थम् भारतस्य परोक्षार्थत्वादिरूपम् । अन्यत्र भारततात्पर्यनिर्णये । अनुसन्धाने पर्यालोचनायाम् ॥

तथा चायमर्थः । मन्वादीत्यत्राऽदिशब्दस्तावदादीयते प्रतिपाद्यत इति व्युत्पत्त्या प्रतिपाद्यार्थवाची । 'भारतार्थस्त्रिधा प्रोक्तः' इति प्रतिज्ञाय मन्वादि आस्तिकादि उपरिचरादीत्युदाहरणात् । प्रभृत्यर्थत्वे तद्विरोधः । 'धर्मो भक्त्यादिदशकः' इत्यादिश्लोकत्रयेण मन्वास्तिकोपरिचररूपार्थव्याख्यानवदादिपदोपात्तार्थव्याख्यानप्रसङ्गाच्च । अतो भारतं मन्वर्थकमास्तिकार्थकमुपरिचरार्थकमित्येव भारतार्थस्त्रिविध इति वक्तव्यम् । आङ्पूर्वाद् ददातेः कर्मणि क्विप्प्रत्यय आदिशब्दनिष्पत्तेः । मन ज्ञान इति धातोः 'ताभ्यामन्यत्रोणादयः' इत्युप्रत्यये मन्यते ज्ञायते एभिः परमात्मेति मनुशब्दवाच्याः धर्मः भक्त्यादिदशकः श्रुतादिः शीलविनयौ ब्रह्मशब्दोदितो वेदश्च । त एते यत्र प्रस्तूयन्ते तत्र भागे धर्माभिमानित्वान्मनुपदवाच्यो धर्मराजः, भक्तिज्ञानवैराग्यप्रज्ञामेधाधृतिस्थितियोगप्राणबलशब्दितगुणदशकाभिमानित्वान्मनुशब्दाभिधेयः श्रीभीमसेनः, श्रुतमताभिमानित्वान्मनुशब्दवाच्योऽर्जुनः, शीलविनयाभिमानित्वान्मनुपदबोध्यौ नकुलसहदेवौ, वेदाभिमानित्वान्मनुनामधेया द्रौपदी चेत्येते पञ्च आदयः प्रतिपाद्याः यस्य तं भागं मन्वर्थकं केचिद् ब्रुवते । अभिमन्यमानमुखेन तदभिमानिनां पञ्चपाण्डवानां दौपद्याश्च महिमप्रकटनाय भारतं प्रवृत्तमिति कवयो वदन्तीत्यर्थः । तदुक्तम्

'धर्मो भक्त्यादिदशकः श्रुतादिः शीलवैनयौ ।
सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधाः' इति ॥

अपरे भारतमास्तीकार्थं प्रचक्षते । अस्ति परलोकोऽस्ति परदेवतेति जानन्तः पाण्डवाः पाञ्चाली चाऽस्तिका उच्यन्ते । 'अस्ति नास्ति दिष्टं मतिः' इति ठगनुशासनात् । त आदयः प्रतिपाद्या यस्य तदास्तिकादि । धर्मादिकमनन्तर्भाव्य केवलमास्तिकान् पाण्डवान् पाञ्चालीं च विषयीकृत्य तदुत्पत्तितच्चरित्रतद्युद्धादिरूपो योऽयमर्थो वर्ण्यते सोऽयमास्तिकः । 'अर्थः प्रवर्तते' इत्यत्रार्थशब्दग्रहणादादिशब्द उक्तरीत्या प्रतिपाद्यार्थ इति विज्ञायते । परमास्तिकशिरोमणयः पुण्यश्लोकाः सकृष्णाः पाण्डवा यत्र भागेऽनन्योपाधिकतया वर्ण्यन्ते स भाग आस्तिकार्थ उच्यत इति ॥ तथा चोक्तम्

'सकृष्णान् पाण्डवान् गृह्य योऽयमर्थः प्रवर्तते ।
प्रातिलोम्यादिवैचित्र्यात् तमास्तीकं प्रचक्षते ॥' इति ॥

'आस्तिक एवाऽस्तीकः । मनुष्यादिभ्य आस्तिक्यातिशयद्योतनाय दीर्घः । पाञ्चाली पाण्डवाश्च यत्राऽहत्य प्रशस्यन्ते तद् भारतमास्तीकादि ब्रुवत' इति ॥

सर्वोत्तमत्वादुपरिचरनामा भगवान् विष्णुरेवाऽदिमध्यावसानेषु आदिः प्रतिपाद्यो यस्य तदुपरिचरादि । परममुख्यवृत्त्या स्वरवर्णपदवाक्यात्मकस्य सकलस्यापि भारतस्य विष्णुप्रतिपादकत्वमिति ॥ तदाहुः

'नारायणस्य नामानि सर्वाणि वचनानि तु ।
तत्सामर्थ्याभिधायीनि तमौपरिचरं विदुः ॥' इति ।

अत्र वाक्य उत्तरोत्तरं बलीय इति मन्तव्यमिति ॥

**भगवत्परत्वादीति ॥** औपरिचरमिति सर्वोत्तमभगवत्परत्वम् । आदिशब्देन धर्मदेवतादिपरत्वं सर्वप्राणिनामवगाह्यानवगाह्यरूपत्वं परोक्षार्थत्वं च ग्राह्यम् । 'धर्मो भक्त्यादिदशकः' इति धर्मप्रतिपादकत्वं, 'सकृष्णान्' इति पाण्डवानां देवशिरोमणित्वेन देवताप्रतिपादकत्वं, 'नारायणस्य नामानि' इति पदसमन्वयस्यासर्वाधिकारिकत्वात् सर्वप्राणिनामनवगाह्यरूपत्वं तत एव परोक्षार्थत्वं च मन्वादीत्येतदवगमयतीति भावः ॥

अत्रेदं वेदितव्यम् । मन्वादित्वं तावत् सर्वस्यापि भारतस्याऽस्तिकादिभागेऽप्यस्त्येव । तत्रत्ययुधिष्ठिरादिशब्दैस्तदभिमतधर्मादिः प्रतिपाद्यत्वाभ्युपगमात् । तदुक्तम्'भक्तिज्ञानादिदशकं वृकोदरः' इति ॥ यत्र च भारतभागेऽज्ञानमिथ्याज्ञानाद्युक्तिस्तत्रापि धर्मादिरूपमनुप्रशंसासिद्धये तन्निवर्त्याज्ञानादिकीर्तनेन मनुतात्पर्यकत्वमस्त्येव । दुर्योधनदुःशासनाद्यर्थकभागे च 'अज्ञानादि स्वरूपस्तु कलिर्दुर्योधनः स्मृतः' इति तदभिमताज्ञानादिग्रहणेन मन्वर्थकत्वमविकलम् । एवञ्च सर्वस्यापि भारतस्य मन्वादित्वं सिद्ध्यति । तदुक्तम्– 'एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते' इति ॥ एवमास्तिकादित्वमपि सर्वभारतस्यैव । न तदेकदेशस्य । यत्र धर्मादिकमुच्यते तत्राप्यभिमान्यधिकरणन्यायेन पाण्डवा गृह्यन्ते । दुर्योधनाद्यर्थकभागेऽपि पाण्डवतात्पर्यमुक्तरीत्याऽस्त्येव । एवंविधानपि दुर्योधनादीन् पाण्डवा हतवन्त इति पाण्डवमहिमप्रख्यापनाय दुर्योधनादिवर्णनात् । अज्ञानाद्यर्थकभागेऽपि तत्तदभिमानिदुर्योधनादिग्रहणात् पाण्डवतात्पर्यकत्वलाभः । एवं सर्वस्यापि भारतस्य मन्वादित्वाऽस्तिकादित्वेऽपि केचिदित्याद्युक्तिरधिकारिभेदादिति ॥

महत्त्वं भारवत्त्वं चावगमयितुं 'भारतं सर्ववेदाश्च' इत्यादिवचनं प्रवृत्तम् । वेदशब्दश्च सर्वसच्छास्त्रवचन इत्यन्यत्रोक्तम् । तत्र शङ्क्यते नित्यसर्वगतद्रव्यात्मकवर्णराशिरूपस्य भारतस्य तुलारोपणगौरवयोरयोग इति ॥ तत्राऽह– तुलारोपणं भारवत्त्वं च प्रतिनिधिद्वारेणेति । समपल-परिमाणमौक्तिकमणिपद्मरागमाणिक्यादिरूपः प्रतिनिधिः । समपलपरिमाणयोरेकस्य भारवत्त्वं घटयितुं 'व्यासस्यैवाऽज्ञया तत्र त्वत्यरिच्यत भारतम्' इति वचनमत्रापि योजनीयम् । तथा च ब्राह्मे चतुस्त्रिंशेऽध्याये

'बद्धा सुपूजिता तत्र तुला तस्यां मणिद्वयम् ।
देवैः क्षिप्तं द्विजमुखैर्भारतात्मा मणिर्गुरुः ।
अभूत् तदा ब्राह्मणोऽयं जग्राहेमं मणिं परम् ।
भाराद् भारतमेतस्य नाम चक्रुस्तदा सुराः' इति ॥

यदिह भारतेऽस्ति तदेवान्यत्र वेदवैदिकग्रन्थ इति सावधारणव्याख्यान एव भारते गुणाभिधानलक्षणा स्तुतिरुपपद्यते । अन्यथा यदिहास्ति तदन्यत्रास्ति यन्नेहास्ति न तदन्यत्रेति यथार्थवर्णने भारतं वेदाद्यनतिरिक्तार्थमेव ज्ञायत इति न भारते माहात्म्यातिशयो लभ्यते । अत एवं व्याख्याने भारतस्य सर्ववेदवैदिकग्रन्थोपबृंहितार्थत्वं तत् सर्वमन्यत्रेत्यनुक्तेस्तदनुक्तार्थ-भूषितत्वं च सिद्ध्यतीति भावेनाऽह– **यदिहेत्यस्येति ॥** उपबृंहितत्वादिकमित्यत्राऽदिशब्देन वेदाद्यनुक्तार्थभूषितत्वं गृह्यते । इत्येतत् 'विराटोद्योगसारवान्' इति वाक्यम् । प्रतिपाद-यदित्यन्वयः । कथं कल्पतरुतां प्रतिपादयतीत्यत उक्तं– **पूर्वोत्तरवाक्यानुसन्धान इति ॥**

'सङ्ग्रहाध्यायबीजोऽसौ पौलोमास्तीकमूलवान् ।
सम्भवस्कन्धविस्तारः सभारण्यविटङ्कवान् ॥
अरण्यपर्वरूपाढ्यो विराटोद्योगसारवान् ।
भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ॥
कर्णपर्वशुभैः पुष्पैः शल्यपर्वसुगन्धिभिः ।
स्त्रीपर्वैषीकविश्रामः शान्तिपर्वमहाफलः ॥
अश्वमेधामृतरस आश्रमस्थानसंश्रयः ।
मौसलश्रुतिसङ्क्षेपः शिष्टद्विजनिषेवितः ॥

सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति ।
पर्जन्य इव भूतानां पक्षिणां भारतद्रुमः ॥'

इति आदिपर्वगतपूर्वोत्तरवाक्यानुसन्धाने इत्यर्थः । यद्यप्यत्र 'भारतद्रुमः' इति तरुरूपतैव प्रतीयते, तथाऽपि महाफलः अमृतरस इति वाक्यावमर्शे कल्पवृक्षत्वमेव गम्यत इति भावेन अनुसन्धान इत्युक्तम् । **सर्वपुरुषार्थेति ॥** अत एव 'धर्मज्ञानद्वारा मोक्षो भवेद्' इत्युक्तं मोक्षोपायत्वं च सिद्ध्यतीति भावः । इतिशब्दस्य तथा हीति पूर्वेणान्वयः ॥

## भावदीपिका

**उत्तरत्र** 'इतिहासपुराणाभ्याम्' इति वाक्ये । गृहीतत्वात् भारतस्येति शेषः ॥ **उपलक्षणमिति ॥** तथाच 'न चेत् पुराणं भारतं च संविद्यात्' इति द्रष्टव्यमिति भावः ॥ **अनुक्तस्येति ॥** 'यदि विद्यात्' इति वाक्ये उपलक्षणतया भारतं यदि नोक्तं स्यात् तदा पुराणमात्राज्ञानिनः विचक्षणत्वाभावोक्तौ तत् कथमिति शङ्कायां 'इतिहास' इत्युत्तरवाक्ये पुराणमात्रं विहाय इतिहासस्यापि सर्ववेदार्थज्ञानोपायत्वरूपमुपपादनं क्रियमाणमयुक्तं स्यादित्यनुक्तस्योपपादनायोगादित्यर्थः । वेदस्य चाचेतनत्वात् कथं बिभेतीति भयोक्तिरत आह– **अचेतनत्वेति ॥** भययुक्तपुरुषसादृश्याद् गौणोऽयं व्यपदेश इति भावः । तदेव सादृश्यं दर्शयति– **स्वार्थमिति ॥** यथा हि चेतनो भयवान् कश्चित् स्वार्थं धनादिकमन्तर्धायाऽच्छादयति एवं वेदोऽपि स्वाभिधेयमितिहासपुराणाज्ञं प्रति न ज्ञापयतीत्याशयः । अनेनापि सर्ववेदार्थज्ञानोपायत्वमुक्तं भवति ॥ **आपातत इति ॥** प्रमाणान्तरेण विना वाक्यार्थविचारदशायाम् ॥ **प्रकृतं कमपीति ॥** उत्तमत्वादिरूपमित्यर्थः ॥ **अन्यत्रेति ॥**

'सकृष्णान् पाण्डवान् गृह्य योऽयमर्थः प्रवर्तते ॥
प्रातिलोम्यादिवैचित्र्यात् तमास्तीकं प्रचक्षते ॥
धर्मो भक्त्यादिदशकः श्रुतादिः शीलवैनयौ ।
सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधाः ॥
नारायणस्य नामानि सर्वाणि वचनानि तु ॥
तत्सामर्थ्याभिधायीनि तमौपरिचरं विदुः ॥'

इति महाभारततात्पर्यनिर्णये उदाहृतस्येत्यर्थः । आदिपदेन धर्मदेवतापरत्वग्रहणम् ॥

ननु भारतस्य 'महत्त्वाद् भारवत्त्वात्' इत्यनेनोच्यमानं भारवत्त्वं कुतोऽवगम्यते ।

न च

'भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ।।
देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः ।।
व्यासस्यैवाऽज्ञया तत्र त्वत्यरिच्यत भारतम्'

इति वाक्यादिति वाच्यम् । वर्णानाममूर्तत्वेन व्याप्ततया तदात्मकभारतादौ तुलारोपणस्य भारते वर्णात्मके गुरुत्वगुणाभावेन 'अत्यरिच्यत' इत्यस्य चायोगेन वाक्यस्य बाधितार्थत्वादित्यत आह– **तुलारोपणमिति ।।** भारतसर्ववेदसञ्ज्ञकं समभरं मणिद्वयं समभ्यर्च्य तस्य तुलारोपणे भारतसञ्ज्ञको मणिरत्यरिच्यतेत्यर्थः ।।

ननु भारतोक्तस्यान्यत्र वेदादौ सत्त्वेऽपि ततोऽधिकस्यापि तत्र सत्त्वे भारतस्य सर्ववेदाद्यर्थोपबृंहितत्वं न सिद्ध्यतीत्यत उक्तम्– **तदेवेति ।।** अन्यत्र वेदादौ स्थितं सर्वमत्रत्यमेव, नात्रत्यं सर्वमप्यन्यत्रत्यमिति प्राप्त्या सर्ववेदाद्यर्थोपबृंहितत्वमादिपदाद् वेदानुक्तकेवलेश्वर-ज्ञान-दृष्टार्थयुक्तत्वं च सिद्ध्यतीत्यर्थः । विराटेत्येतद्वाक्यं भारतस्य कल्पतरुतां प्रतिपादयत् सर्वपुरुषार्थहेतुतां भारतस्यावगमयतीत्यन्वयः । ततश्च सर्वशास्त्रोत्तमत्वमनेन सिद्ध्यतीत्याशयः कथमित्यत उक्तम्– **पूर्वोत्तरवाक्यानुसन्धान इति ।।**

'सङ्ग्रहाध्यायबीजोऽयं पौलोमास्तीकमूलवान् ।।
सम्भवस्कन्धविस्तारः सभारण्यविटङ्कवान् ।।
अरण्यपर्वरूपाढ्यो विराटोद्योगसारवान् ।।
भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ।।
कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगन्धिभिः ।।
स्त्रीपर्वैषीकविश्रामः शान्तिपर्वमहाफलः ।।
अश्वमेधामृतरसस्त्वाश्रमस्थानसंश्रयः ।।
मौसलश्रुतिसङ्क्षेपः शिष्टद्विजनिषेवितः ।।
पर्जन्य इव भूतानामक्षयो भारतद्रुमः ।।
सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति'

इत्यादिपर्वणि व्यासं प्रति ब्रह्मवाक्यम् ।। एवं विराटेत्यतः पूर्वोत्तरवाक्यानुसन्धान इत्यर्थः ।।

## भावप्रकाशः

**मन्वादीत्येतदिति ॥** अयमर्थः । मन्वादीतिश्लोके आदिशब्दस्तावदादीयते प्रतिपाद्यते इति व्युत्पत्त्या प्रतिपाद्यवाची । प्रभृत्यर्थत्वे भारततात्पर्यनिर्णये भारतार्थस्त्रिधा प्रोक्त इति प्रतिज्ञाय मन्वादीति श्लोकोदाहरणविरोधात् अर्थषट्कादिलाभेऽपि त्रित्वालाभात् । मन्वादीत्येतद्व्याख्यानरूपेण धर्मो भक्त्यादिदशक इत्यादिश्लोकत्रयेण मन्वास्तीकौपरिचररूपार्थत्रयकथनवदादिपदोक्तार्थकथनप्रसङ्गाच्च । ततश्च मन्वादीति वाक्यं भारतं मन्वर्थकमास्तीकार्थकमुपरिचरार्थकमित्येव प्रतिपादयति **नतु भारतस्य परोक्षार्थत्वादिकमिति ।** ननु सकृष्णान् पण्डवानित्यादिश्लोकत्रयपर्यालोचनया मन्वादीति वाक्यमपि प्रकृतप्रतिपादकमेवेत्यत उक्तम्– **आपातत इति ॥ अन्यत्रेति ॥** भारततात्पर्यनिर्णय इत्यर्थः । **वाक्यस्येति ॥**

सकृष्णान् पाण्डवान् गृह्य योयमर्थः प्रवर्तते ।
प्रातिलोम्यादिवैचित्र्यात् तमास्तीकं प्रचक्षते ॥ १ ॥

धर्मो भक्त्यादिदशकः श्रुतादिः शीलवैनयौ ।
सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधाः ॥ २ ॥

नारायणस्य नामानि सर्वाणि वचनानि तु ।

तत्सामर्थ्याभिधायीनि तमौपरिचरं विदुरिति वाक्यत्रयस्येत्यर्थः । **भगवत्परत्वादीति ॥** आदिपदेन धर्मदेवतापरत्वस्य सर्वप्राणिनामनवगाह्यावगाह्यरूपत्वस्य परोक्षार्थत्वस्य च सङ्ग्रहः । तथा हि नारायणस्य नामानीति श्लोके पुरुषविशेषेण सर्वाणि पदवर्णस्वरात्मकवचनानि यतस्तत्सामर्थ्याभिधायीनि तस्मान्नारायणस्य नामानीत्येवं पदसमन्वयगम्यो योऽर्थः तं विष्णुं सर्वेषामुपरि चरतीति उपरिचरः स एवौपरिचरः इति व्युत्पत्त्या औपरिचरं विदुरित्युक्तम् । तथा च भारतस्योपरिचरादित्वोक्त्या भगवत्परत्वं, पदसमन्वयस्यासर्वाधिकारिकत्वेन सर्वप्राणिनामनवगाह्यरूपत्वं परोक्षार्थत्त्वञ्च सिद्धम् । एवं सकृष्णानिति श्लोके आस्तीकशब्दार्थ उक्तः । ततश्च भारतस्यास्तीकादित्वोक्त्या सर्वप्राणिनामवगाह्यरूपत्त्वं सिद्धम् । पांडवानां देवत्वेन देवतारूपापरतत्वप्रतिपादकत्वञ्च सिद्ध्यति । तथा धर्मो भक्त्यादिदशक इत्यत्र श्लोके यत्र ग्रन्थे धर्मादयः प्रतिपाद्यन्ते तं भारतग्रन्थं मन्वादिं विदुः । अवबोधकरणत्वेन धर्मादीनां मनुशब्द-

वाच्यत्वादित्यभिहितम् । तेन भारतस्य मन्वादित्वोक्त्या धर्मादिपरत्वं लब्धम् । एवञ्च मन्वादीति श्लोको भारतस्य भगवत्परत्वादि गमयतीति दिक् ॥

ननु तथापि भारते प्रदेशभेदेनैव मन्वादित्वमास्तीकादित्वं चोपलभ्यते । न सर्वत्रात एकस्यैव विरुद्धानेकार्थत्वाभावात् मन्वादीति श्लोके केचिदित्याद्युक्तिरयुक्तेति चेत्, अत्र ब्रूमः, मन्वादित्वं तावत्सर्वस्यैव भारतस्य यत्र त्वास्तीकार्थ उच्यते तत्रापि मन्वादित्वमस्त्येव । सोमं राजानं जुह्वति तं देवा भक्षयन्तीत्यत्र सोमशब्देन तदभिमतलताग्रहणवत् युधिष्ठिरादिशब्दैस्तत्तदभिमतस्य धर्मादेर्ग्रहणात् । अनेनैवाभिप्रायेण भारततात्पर्यनिर्णये भीमादीनां भक्त्यादिदशकाद्यभिमानित्वस्योक्तत्वात् यत्र च भारतैकदेशेऽज्ञानमिथ्याज्ञानाद्युक्तिस्तत्रापि मनुतात्पर्यकत्वमस्त्येव । धर्मादिरूपमनुप्रशंसार्थमेव तन्निवर्त्याज्ञानादिकीर्तनात् । दुर्योधनाद्यर्थकभागे च तदभिमताज्ञानादिग्रहणान्मनुतात्पर्यकत्वलाभः । ततश्च सर्वभारतस्य मन्वादित्वसिद्धिः । तदुक्तं 'एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते' इति ॥

एवमास्तीकादित्वमपि सर्वभारतस्यैव नतु तदेकदेशस्य । यत्र तु धर्मादिकमुच्यते तत्रापि अभिमन्यधिकरणन्यायेन पाण्डवग्रहणात् दुर्योधनद्यर्थकभागेऽपि पाण्डवतात्पर्यकत्वरूपमास्तीकादित्वमस्त्येव । अहो बाहुशालिनः पाण्डवा यदेवं विधानापि पाण्डवा हतवन्त इति पाण्डवप्रशंसार्थमेव दुर्योधनादिवर्णनात् । अज्ञानाद्यर्थकभागे च तत्तदभिमानिदुर्योधनादिग्रहणात् पाण्डवतात्पर्यकत्वलाभः । एवञ्च सर्बस्यापि भारतस्याधिकारिभेदेन मन्वादित्वादास्तीकादित्वाच्च केचिदित्याद्युक्तिर्युक्तैवेत्यलम् ॥

**स्तुतिपरत्वोपपत्तय इति ॥** अन्यथा यदिहेत्युक्तान्वयव्यतिरेकबलात् भारतं वेदाद्यनूनानतिरिक्तार्थकमिति लभ्येतेति भावः । **सर्ववेदाद्यर्थोपबृंहितत्वादिकमिति ॥** आदिपदात् तदनुक्तार्थयुक्तत्वग्रहणम् । तथाहि तदेवान्यत्रेत्यस्य भारतप्रतिपाद्यमेवान्यप्रतिपाद्यमिति फलितार्थः । एवञ्च भारतप्रतिपाद्यत्वमित्युत्सर्गः । तथाच भारतप्रतिपाद्यत्वमन्यप्रतिपाद्ये ततोऽधिके चास्तीति यदिहेत्यस्य स्तुतित्वलाभः । ततश्च भारतस्य सर्ववेदाद्यर्थोपबृंहितत्वं तदनुक्तार्थयुक्तत्वं च सिध्यतीति बोध्यम् । **पूर्वोत्तरवाक्येति ॥**

'सङ्ग्रहाध्यायबीजो वै पौलोमास्तीकमूलवान् ।।
सम्भवस्कन्धविस्तारः सभारण्यविटङ्कावान्
अरणीपर्वरूपाढ्यो विराटोद्योगसारवान्
भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान्
कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगन्धिभिः ।।
स्त्रीपर्वैषीकविश्रामः शान्तिपर्वमहाफलः
अश्वमेधामृतरसस्त्वाश्रमस्थानसंश्रयः ।।
मौसलश्रुतिसङ्क्षेपः शिष्टद्विजनिषेवितः ।।
सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति ।
पर्जन्य इव भूतानां पक्षिणां भारतद्रुम'

इत्यादिपर्वगतपूर्वोत्तरवाक्येत्यर्थः । यद्यप्युक्तवाक्यं भारतस्य वृक्षत्वमात्रं प्रतिपादयति तथाऽपि यदश्वमेधामृतरस इति अमृतरसोपेतत्वमुक्तं यच्च सर्वेषामित्यनेन सर्वकविमुखोपजीव्यत्व-मुक्तं तदन्यथाऽनुपपत्त्या कल्पवृक्षत्वं प्रतिपादयत्येवेति भावेनोक्तम्– **अनुसन्धानेनेति ।।**

यद्यपि चोक्तरीत्योत्तरवाक्यानुसन्धानेन भारतस्य कल्पतरुताप्रतिपादनं गम्यते न तु पूर्व-वाक्यानुसन्धानेन । तथाऽपि भारतस्य द्रुमत्वप्रतिपादनात् पूर्वं त्वया भारतसूर्येण नृणां विनिहतं तम इत्यादिना सूर्यत्वादेः प्रतिपादनात् तदनुसारेणात्र कल्पतरुत्वप्रतिपादनमेवाभिप्रेतम् । अन्यथा तत्साहाचर्यविरोधादित्याशयेन पूर्ववाक्यानुसन्धानेनेत्युक्तम् । **सर्वपुरुषार्थहेतुतामिति ।।** यद्यपि मोक्षहेतुत्वमेव प्राक् प्रतिज्ञातत्वात् प्रमाणेन साधनीयं तथाऽपि वस्तुस्थितिकथनायैवमुक्तम् ।।

**भाष्यम्– कथश्चान्यस्य कर्तुं न शक्यते ।।**

## भावप्रदीपिका

इतश्च न भारतस्य ग्राम्यकथानुवादितेत्याह– **कथं चेति ।।** अत्राप्यन्यथेति ग्राह्यम् ।

## भावप्रकाशिका

इतोऽप्युक्तगुणोपपन्नं भारतमित्याह– **कथं चेति ।।**